# निबन्धमाला

**पञ्चमं पुष्पम्**

अङ्कः ५ वर्षः २०१५– २०१६


## राष्ट्रियसंस्कृतसंस्थानम्

भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा “ए” श्रेण्या प्रत्यायितम्)

**गुरुवायूर् परिसरः**

पुरनाट्टुकरा, त्रिश्शूर् – ६८०५५१, केरलप्रदेशः

| प्रकाशकः | **Publisher** |
|---|---|
| प्राचार्यः | Principal |
| राष्ट्रियसंस्कृतसंस्थानम् | Rashtriya Sanskrit Sansthan |
| (मानितविश्वविद्यालयः) | Deemed University |
| गुरुवायूर् परिसरः | Guruvayoor Campus |
| पुरनाट्टुकरा, | Puranattukara |
| त्रिश्शूर् – ६८०५५१, केरलाप्रदेशः | Thrissur – 680551, Kerala |

ISSN No. 2277-2359

Email: rss.guruvayoor@gmail.com
Website: www.sanskritguruvayoor.org

| गुरुवायूर् परिसरः | Guruvayoor Campus |
|---|---|
| पञ्चमी सञ्चिका २०१५-२०१६ | Fifth Issue 2015-2016 |
| प्रतिलिपयः १५० | Copies - 150 |
| रु. ४००/- | Rs.400/- |

## सम्पादकमण्डलम्

| **मुख्यसम्पादकः** | **CHIEF EDITOR** |
|---|---|
| प्रो. सी हेच्. एल्. एन्. शर्मा | Prof. Ch. L. N. Sharma |
| प्राचार्यः | Principal |

| **सम्पादकाः** | **EDITORS** |
|---|---|
| प्रो. सि. एल्. सिसिली | Prof. C. L. Cicily |
| डा. एन्. आर्. श्रीधरन् | Dr. N. R. Sridharan |
| डा. ओ. आर्. विजयराघवन् | Dr. O. R. Vijayraghavan |
| डा. विजयलक्ष्मी राधाकृष्णन् | Dr. Vijayalakshmi Radhakrishnan |
| डा. सुशान्तकुमाररायः | Dr. Susanta Kumar Raya |
| डा. पि.आर. रम्या | Dr. P. R. Remya |

**Typeset : Smt. G. V. L. Keerthi Sudha**
**Printed at: Geedi Printers, Ayyanthole, Thrissur -680003.**

राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के तत्वाधान में संचालित)
56–57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली–110058

RASHTRIYA SANSKRIT SANSTHAN
DEEMED UNIVERSITY
(Established under the Auspices of the Ministry of Human Resource Development, Govt. of India)
56-57, Institutional Area, Janakpuri, New Delhi-110058

क्रमांक
No ..............................

दिनांक
Date 10.03.2016

# शुभाशंसा

## सत्यं परं धीमहि

महतः प्रमोदस्यायं विषयो वर्तते यत् प्रतिवत्सरमिव अस्मिन्वर्षेऽपि अनेकविधविषयसुगन्धिभिर्व्याप्तैर्विविधभाषात्मकैः पुष्पैर्गुम्फिता निबन्धमाला केरलेष्ववस्थितात् गुरुवायूरपरिसरात्प्रकाश्यते इति। अस्यां निबन्धामालायां भारतीयशास्त्रसम्पदः संरक्षकाणि अतिगभीरचिन्तनपराणि निबन्धनानि विद्योतन्ते। विविधशास्त्रेष्ववस्थितं ज्ञानरत्नं संरक्षितुं समुत्सुकाः विद्वांसोऽस्यां स्वविचारान्निबन्ध्नन्तः धन्यवादार्हाः सन्ति।

सेयं निबन्धमाला भवतां करकमलेषु समानेतुं कृतभूरिपरिश्रमान् गुरुवायूरपरिसरस्थितान् छात्रान्नध्यापकवरेण्याँश्च शुभकामनाभिर्वर्धापयामि ।

इत्थं

(एस. सुब्रह्मण्य शर्मा)
कुलसचिवः (प्र.)

(VC) TEL.: 28523949 FAX : 011-28521948 (REGISTRAR) TEL.: 28520979 FAX: 28520976
E-PABX : 011-28520977, 28521994, 28524993,95 TELEFAX : 28524532 (ADMN.) 28521258 (EXAM.) 28524387 (N.F.S.E.)
Gram : 'SAMSTHAN' e-mail : rsks@nda.vsnl.net.in Website : www.sanskrit.nic.in

# सम्पादकीयम्

श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम्।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम्॥

सृष्टिस्थितिलयकारकस्य अखिलाण्डकोटिब्रह्माण्डनायकस्य परमकारुणिकस्य परमेश्वरस्य लीलया प्रवर्तमानेऽस्मिन् जगति भारतभूतले भारतसर्वकारस्य मानवसंसाधनविकास-मन्त्रालयस्य अधीने प्रवर्तमानस्य राष्ट्रियसंस्कृतसंस्थानस्य एकादशसु परिसरेषु अन्यतमोऽयं गुरुवायूरुपरिसरः साहित्यव्याकरणाद्वैतवेदान्तन्यायशिक्षाशास्त्राधुनिक-विषयशोधविभागैः सम्पन्नः केरलराज्ये तृश्शूर् मण्डले पुरनाट्टुकराग्रामे विराजते। परिसरेऽस्मिन् प्रतिवत्सरं छात्राणामध्यापकानाञ्च तत्तच्छास्त्रविषयकं ज्ञानं वर्धयितुं प्रतिविभागम् एका विचारगोष्ठी, एकं विस्तृतव्याख्यानञ्च आयोज्यते। अन्ये च संस्कृतसप्ताहप्रभृतयः केचन कार्यक्रमाः सञ्चाल्यन्ते।

विचारगोष्ठीषु विभिन्नविश्वविद्यालयेभ्यः, विभिन्नराज्येभ्यश्च समागताः महान्तः विद्वांसः तत्तच्छास्त्रेषु निष्णाताः स्वीयान् विचारान् प्रस्तुवन्ति। तथैव शोधकार्ये प्रवृत्ताः अनुसन्धातारः, आचार्यच्छात्रा अपि महता उत्साहेन भागं स्वीकुर्वन्ति। तत्र कदाचित् पर्याप्तसमयाभावात् विस्तृतशोधपत्राणां संक्षेपेण प्रस्तुतिः क्रियते। तेषां समग्रं लेखं जिज्ञासमानानाम् उपकाराय सर्वेषां शोधपत्राणां ग्रन्थरूपेण प्रकाशनमपेक्ष्यते। एवं मुद्रितोऽयं ग्रन्थः ग्रन्थालयेषु संरक्षितः भाव्यध्येतृणामप्युपकाराय कल्पते। विचारगोष्ठीषु पठितानामेषां शोधपत्राणां प्रकाशनस्य अन्यदप्यनुपेक्षणीयं प्रयोजनमस्ति। विश्वविद्यालयानुदानायोगेन विचारगोष्ठीषु भागग्रहणाय, शोधपत्राणां प्रस्तुतये, शोधपत्रिकासु तेषां प्रकाशनाय समुचिताः अङ्काः निर्धारिताः सन्ति। तेषामङ्कानामाधारेण उद्योगे प्रोन्नतिर्भविष्यति। एवं निबन्धमालेयं विदुषः बहुधा उपकुर्वती लोके प्रतिष्ठां प्राप्नोत्विति, एतस्याः सम्पादने, प्रकाशने च सहकुर्वद्भ्यः सर्वेभ्यः भगवान् सर्वेश्वरः गुरुवायुपुराधीश्वरः सकलविधम् आयुरारोग्यसौभाग्यं वितनोत्विति सविनयं प्रार्थये।

इति विद्वद्विधेयः

च.ल.ना.शर्मा

# विषयानुक्रमणिका


| विषयः | लेखकः | पृष्ठसंख्या |
|---|---|---|
| 1. मङ्गलाचरणम् | प्रो.चल्ला लक्ष्मीनारायणशर्मा | 1 |
| 2. प्रतिशाख्यस्वरूपम्- शैलीविमर्शश्च | प्रो. सि.एल्. सिसिली | 7 |
| 3. कालनिरूपणम् | प्रो. पि.सी.मुरलीमाधवन् | 12 |
| 4. वैयाकरणमतमनुसृत्य ध्वनिविमर्शः | डा. वि.के.शैलजा | 16 |
| 5. ध्वनेरर्थविचारः | डा. सि.शान्ता | 22 |
| 6. विद्मस्तं मोहहानतः | डा.बालमुरुगन् | 26 |
| 7. तन्त्रयुक्तयः आधुनिकानुसन्धानञ्च | डा. के.के.शैन् | 32 |
| 8.मारकविचारः-लघुपाराशर्याः विशिष्टसन्दर्भे | डा.सुनीता | 37 |
| 9.पाणिनीयव्याकरणे परिभाषाणां स्थानम् | डा.प्रसन्ना उण्णित्तान् | 41 |
| 10. पूर्वत्रासिद्धम्- सूत्रार्थविचारः | डा. विजयलक्ष्मी राधाकृष्णन् | 48 |
| 11.नागेशमतेन लक्ष्यासाधिकाःपरिभाषाः | डा. नन्दकिशोर तिवारी तथा शम्भुशरण तिवारी | 51 |
| 12.भर्तृहरेः साहित्यमकुटः | डा. ई.पि.श्रीदेवी | 59 |
| 13. काव्यस्यामा स एवार्थः | डा. रामचन्द्रः जोयिस् एच् | 66 |
| 14. तेजोऽभावः तमः | डा. ओ.आर्.विजयराघवन् | 68 |
| 15. संस्कृतपत्रायनस्य समीक्षणम् | डा. निधीष् एम्.जी | 71 |
| 16. शाङ्करस्तोत्रेषु मूल्यशिक्षा | डा. सुशान्तकुमाररायः | 76 |
| 17. योगाः | विजयानन्द् अडिगः बि. | 82 |
| 18. योगशिक्षा | डा. पि.विद्याधरः | 85 |
| 19.केरलस्य नवोत्थानप्रक्रियायां वैकुण्ठ-स्वामि-चट्टम्पिस्वामि-श्रीनारायणगुरु-ब्रह्मानन्दशिवयोगिनां योगदानम् | डा. गायत्रीदेवी जि. | 90 |
| 20. ब्रह्मसूत्रशाङ्करभाष्यव्याख्यासु प्रकटार्थविवरणस्य प्राधान्यम् | डा. आर्. प्रतिभा | 100 |
| 21. दक्षिणामूर्तिस्तोत्रे तत्त्वमसिवाक्यार्थः | डा. राधाकान्तपण्डा | 105 |
| 22. संस्कृतवाङ्मये भाषणकौशलम् | डा. इ.वेङ्कटेश्वर्लु | 109 |

| | | |
|---|---|---|
| 23. होराफलविसंवादित्वे हेतुः | प्रसादभट्टः | 115 |
| 24.महामहोपाध्यायः भैरवमिश्रः | वि.श्रीनिवासनारायणः | 117 |
| 25. नारायणभट्टपादः | कविता के. | 124 |
| 26. सुगमरामायणे सुभाषितानि | जिन्सीमोल् एस्. | 128 |
| 27. पदपदार्थदोषनिरूपणं-वामनमते | गोविन्दन्.एन् | 130 |
| 28. व्याप्तिपञ्चलक्षण्यां प्रथमलक्षणे साध्याभाववत्तासम्बन्धविचारः | वि.वि.एस्.आर्.लक्ष्मीः | 134 |
| 29. व्याकरणशास्त्रे विकल्पसूत्रस्य उपयोगः | जि.वि.लक्ष्मी कीर्तिसुधा | 139 |
| 30. अद्वैतशास्त्रे कर्मणएव वन्ध-मोक्षकारणत्वं कर्मयोगस्य च नैतिकमूल्याङ्कनम् | मृत्युञ्जय चक्रबर्ति | 143 |
| 31.चाणक्यनीतिदर्पणे अनुसन्धानकार्यपरामर्शाः | डा.डि.वेणुगोपालरावः | 149 |
| 32.Polonius' advice to his son Laertes | Dr.Murthy S.V.R | 156 |
| 33.Vedantic Undercurrents in Indian Renascent Movements | Dr.Ramankutty.P.V | 159 |
| 34. Atharva- vedic Hymns as the Source for Developing the Basic Theory of Treatment and Maintenance of Health in Ayurveda | Dr. G.Asokan | 169 |
| 35. Library Stock Verification: A Study | Vikramjeet | 179 |
| 36. Tribute to Karuthamma | Dr. Sheeba | 188 |
| 37. Posture and Posture Deformities | Sudhir K.R | 192 |
| 38.Bilateral Filtering Face Recognition Across Non-uniform Motion Blur, Illumination And Pose | Smt.Manichitra | 201 |
| 39.Green IT-Environment Friendly Computing in ICTs | Smt.Nisha Vinod | 209 |
| 40. Relevance of Yoga for value education | Sreejish P.M | 211 |
| 41.प्रतिहारकालीन भारत की आर्थिक स्थिति | डा. अरविन्द सिंह गौर | 215 |
| 42.सुभद्राकुमारी चैहान की काव्य संवेदना | डॉ.पी.आर.रम्या | 220 |
| 43. ജ്ഞാനപ്പാന – സമകാലികപ്രസക്തി | ശ്രീമതി .കെ.എ.ജെസ്സി | 225 |
| 44.अवच्छेदकत्वनिरुक्तौ द्वितीयलक्षणम् | डा.एन्.आर्.श्रीधरन् | 231 |

# मङ्गलाचरणम्

**आचार्य.च.ल.ना.शर्मा, प्राचार्योः**

लोके आस्तिकाः सर्वे दैवप्रार्थनां कुर्वन्ति कामपि कामनामवाप्तुम्। तदेव मङ्गलमिति पदेन व्यवहरन्ति पण्डिताः संस्कृतसाहित्ये। अमरकोशे तु - **कल्याणं मङ्गलं शुभम्  इत्युक्तं वर्तते।** लोके प्रायः गणेशस्तोत्ररूपं मङ्गलं सर्वेषां कार्याणां निर्विघ्नपरिसमाप्त्यर्थं कार्यप्रारम्भे कुर्वन्ति। यथा -

**सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।**
**लम्बोदरश्च विकटो विघ्नराजो गणाधिपः॥**
**धूम्रकेतुर्गणाध्यक्षः फालचन्द्रो गजाननः।**
**वक्रतुण्डः शूर्पकर्णो हेरम्बः स्कन्दपूर्वजः॥**
**षोडशैतानि नामानि यः पठेच्छृणुयादपि।**
**विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा॥**
**सङ्ग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते।**

भारते प्राचीनकालादारभ्य सम्प्रदायोऽयं प्रवर्तते। शिष्टैः परम्परया आचरितत्वात् अयं शिष्टाचारो भवति। श्रुतिस्मृत्योरस्य प्रमाणाभावेऽपि शिष्चाचारोऽत्र  प्रमाणत्वेन गृह्यते। शिष्टस्य लक्षणं यथा शब्दकल्पद्रुमे -

**न पाणिपादचपलो न नेत्रचपलो मुनिः।**
**न च वागङ्गचपल इति शिष्टस्य लक्षणम्॥**
**धर्मो नाभिगतो यैस्तु वेदः सपरिबृंहणः।**
**ते शिष्टा ब्राह्मणाः प्रोक्ता नित्यमात्मगुणान्विताः॥**
**मन्वन्तरेषु ये शिष्टा इह तिष्ठन्ति धार्मिकाः।**
**मनुःसप्तर्षयश्चैव लोकसन्तानकारणात्॥**
**तिष्ठन्तीह च धर्मार्थं तान् शिष्टान् परिचक्षते।**
**तैः शिष्टैः पालितो धर्मः स्थाप्यते वै युगे युगे॥'**

**एवं शिष्टाचारः** – शिष्टश्चासावाचारः, शिष्टानामाचारो वा भवति। साधुव्यवहार इत्यर्थः।

**त्रयी वार्ता दण्डनीतिः प्रजा वर्णाश्रमेज्यया।**
**शिष्टैराचर्य्यते यस्मात्  शिष्टाचारः स शाश्वतः॥'**

इति शब्दकल्पद्रुमः। वेदमन्त्राणामुच्चारणस्य प्रारम्भे प्रणवस्योच्चारणं माङ्गलिकं भवति। तदुक्तं कविकुलगुरुणा महाकविना कालिदासेन रघुवंशे - ' आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव' इति। प्रणवस्य महत्त्वं बहुधा निगदितं श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन। यथा - '**पिताहमस्य जगतः .....वेद्यं पवित्रमोङ्कारः**' (अ.९.लो.१७) '**ओमित्येकाक्षरं ब्रह्म**' (अ.८.लो.१३.) '**प्रणवः सर्ववेदेषु**' (अ.७.लो.८.) '**ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः**' (अ.१७.श्लो.२३.) '**तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः प्रवर्तन्ते**' (अ.१७.श्लो.२४.) इति।

एवं विभिन्नैराचार्यैः सूत्रग्रन्थानामादौ मङ्गलार्थोऽथ शब्दः प्रयुक्तो दृश्यते। अथशब्दस्य मङ्गलार्थत्वमित्थं प्रतिपादयति अमरकोशकारः अमरसिंहः। यथा - **मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ** इति। **अभिप्रेतार्थसिद्धिः मङ्गलमिति** शब्दकल्पद्रुमः। **अथ योगानुशासनम्** - पातञ्जलयोगसूत्रम् - १.१., **अथ शब्दानुशासनम्** – महाभाष्ये पस्पशाह्निकम्, **अथातो धर्मजिज्ञासा** - जैमिनीयन्यायसूत्रम् १.१., **अथातो ब्रह्मजिज्ञासा**- ब्रह्मसूत्रम् - १.१. इति सूत्रग्रन्थेषु मङ्गलार्थकः अथशब्दः दृयते। उक्तञ्च अभियुक्तैः-

**'ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।**
**कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ॥** इति।

ओङ्कारं वेदेषु, अथकारं भाष्येषु' (कात्या.प्रा.१.१८,१९.)। अत्र भाष्यते एभिः शास्त्रीयो विषय इति व्युत्पत्त्या भाष्यपदेन सूत्राणि भाष्याणि च गृह्यन्ते इत्यनन्तदेवः।

शब्दानुशासनस्य प्रणेता पाणिनिः 'वृद्धिरादैच्' १.१.१. इति सूत्रेण अष्टाध्यायीमारभते। तस्य भाष्यं भाषमाणो भगवान् पतञ्जलिः सूत्रमिदमित्थं व्याख्याति - **माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते, मङ्गलादीनि हि शास्त्राणि प्रथन्ते, वीरपुरुषकाणि भवन्ति, आयुष्मत्पुरुषकाणि च, अध्येतारश्च वृद्धियुक्ता यथा स्युरिति** इति। एवं सूत्रकारः पाणिनिः महतः शास्त्रससूहस्य समाप्तिम्, अध्येतॄणां समृद्धिञ्च कामयमानः वृद्धिशब्दमादौ प्रायुङ्क्तेति। महाभाष्यस्य व्याख्याता प्रदीपकारः कैयटोऽत्र कथयति - **मङ्गलार्थम् - अगर्हिताभीष्टार्थसिद्धिर्मङ्गलम्। तत्प्रयोजन आचार्यो माङ्गलिकः प्रथन्त** इति - अध्ययनस्याविच्छेदात्। वीरपुरुषाणीति – श्रोतॄणां परैरपराजयात्। आयुष्मत्पुरुषाणीति-शास्त्रानुष्ठाने धर्मोपचयादायुर्वर्धनात्' इति।

प्राचीनकाले ग्रन्थरचनाप्रारम्भे ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थम् अथशब्दं, वृद्धिशब्दं, सिद्धशब्दं वा प्रयुञ्जते स्म। तेन तस्य ग्रन्थस्य अध्येतृणाम् अध्ययनमपि निर्विघ्नं परिसमाप्तं स्यात्। अध्येतारः अपि मङ्गलं कथं, किमर्थं कर्तव्यमिति शिक्षिताः भवेयुः। ततः परम् इष्टदेवतानमस्कारात्मकं मङ्गलं ग्रन्थादौ निबद्धं दृश्यते। यथा – कारिकावल्याः प्रारम्भे विश्वनाथपञ्चाननभट्टाचार्येण मङ्गलं रचितमस्ति –

**नूतनजलधररुचये गोपवधूटीदुकूलचौराय।**

**तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय॥** इति।

शास्त्राणां रचनायाम्, अध्ययने च दैवानुग्रहवत् गुर्वनुग्रहोऽपि आवयकः।

**गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।**

**गुरुस्साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः॥** इति।

गुरोः देवतास्वरूपत्वं प्रसिद्धमस्तीति हेतोः केचन ग्रन्थकारागुरुनमस्कारात्मकं मङ्गलं समाचरन् ग्रन्थादौ। यथा पञ्चदश्याः प्रारम्भे विद्यारण्यस्वामिना –

**नमः श्रीशङ्करानन्दगुरुपादाम्बुजन्मने।**

**सविलासमहामोहग्राहग्रासैककर्मणे॥**

इति पद्यं गुरुनमस्कारात्मकं निबद्धमस्ति। तत्र श्रीरामकृष्णेन पददीपिकाख्यायां व्याख्यायामेवं वर्णितम् - **प्रारिप्सितस्य ग्रन्थस्य अविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिप्राप्तमिष्टदेवतानमस्कारलक्षणं मङ्गलाचरणं स्वेनानुष्ठितं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति** इति। केचित् ग्रन्थकारास्तु देवतावन्दनं, गुरुवन्दनञ्च समकार्षुः। यथा तर्कसङ्ग्रहे अन्नम्भट्टेन –

**निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।**

**बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः॥** इति।

शिष्टाचारोऽयं काव्यनिर्माणे कविभिरप्यादृतो दृश्यते। यथा रघुवंशे कालिदासेन –

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**

**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥** इति।

तत्र सञ्जीविन्यां टीकायां मल्लिनाथो व्याख्याति यथा - **इह खलु सकलकविकुलशिरोमणिः कालिदासः - काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतयेकान्तासम्मिततयोपदेशयुजे॥** इत्यालङ्कारिकवचनप्रामाण्यात् काव्यस्य

अनेकश्रेयः साधनतां, 'काव्यालापांश्च वर्जयेत्' इति निषेधशास्त्रस्य असत्काव्यविषयताञ्च पश्यन् रघुवंशाख्यं महाकाव्यं चिकीर्षुः चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधन-भूतविशिष्टेष्टदेवतानमस्कारस्य शिष्टाचारपरिप्राप्तत्वात् 'आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम्' इत्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च, काव्यनिर्माणस्य विशिष्टशब्दार्थप्रतिपत्तिमूलत्वेन विशिष्टशब्दार्थयोश्च

**शब्दशास्त्रमशेषन्तु धत्ते शर्वस्य वल्लभा।**
**अर्थस्वरूपमखिलं धत्ते मुग्धेन्दुशेखरः॥**

इति वायुसंहितावचनबलेन पार्वतीपरमेश्वराय तत्वदर्शनात् तत्प्रतिपित्सया तावेवाभिवादयते - वागर्थाविवेति।" इति।

एवं कवयः काव्यारम्भे शिष्टाचारस्य परिपालनाय, काव्यस्य निर्विघ्नपरिसमाप्तये, श्रोतृणां श्रेयः कामनया च साभिप्रायकं किमपि मङ्गलं निबध्नन्ति। आलङ्कारिकैः मङ्गलाचरणस्य वैविध्यमाश्रित्य काव्यारम्भलक्षणत्वेन निर्दिष्टमस्ति – **आशीर्नम-स्क्रियावस्तुनिर्देशो वापि तन्मुखम्** इति। आशीर्वचनं, नमस्कारः, काव्यवस्तुनिर्देशो वा काव्यारम्भे मङ्गलं भवितुमर्हति। किरातार्जुनीये भारविणा - **श्रियः कुरूणामधिपस्य पालनीम्** इति, शिशुपालवधे माघेन **श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि** इति च काव्यारम्भे श्रीशब्दः प्रायुज्यत। शिशुपालवधस्य व्याख्यायां सर्वङ्कषायां मल्लिनाथेनैवं प्रत्यपादि - ----काव्यफलशिशुपालवधबीजभूतं भगवतः श्रीकृष्णस्य नारददर्शनरूपं वस्तु आदौ श्रीशब्दप्रयोगपूर्वकं निर्दिशन् कथामुपक्षिपति - श्रिय इति। अत्रादौ श्रीशब्दप्रयोगात् वर्णगणादिशुद्धेरभ्युच्चयः। तदुक्तम्-

**देवतावाचकाः शब्दाः ये च भद्रादिवाचकाः।**
**ते सर्वे नैव निन्द्याः स्युः लिपितो गणतोऽपि वा॥ इति।**

एवं काव्यादौ देवतावाचकशब्दाः, मङ्गलार्थकाः शब्दाश्च लिपेः, गणानाञ्च उत्कर्षताप्राप्त्यर्थं प्रयोक्तुं शक्यन्ते। दृश्यकाव्येष्वपि प्रारम्भे नान्दीपद्यस्य प्रस्तुतिः मङ्गलार्थैव। प्रतापरुद्रीये नाटकप्रकरणे नान्दीस्वरूपमित्थं निरूप्यते – **अर्थतः शब्दतो वापि मनाक् काव्यार्थसूचनम्। यत्राष्टभिर्द्वादाभिरष्टादशभिरेव वा। द्वाविंशत्या पदैर्वापि सा नान्दी परिकीर्तिता। नाटकादिरूपकाणामादौ विहितं पद्यं नान्दीत्युच्यते।** इति।अत्र कुमारस्वामिकृतायां रत्नापणव्याख्यायाम् - **तस्य प्रत्याहारादीनि द्वाविंशतिरङ्गानि,**

**तन्मध्ये अवश्यं कर्तव्या नान्दी।** तदुक्तं बादरायणेन - **यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके। तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये॥** इति। अतः तत्स्वरूपं निरूप्यत इत्याह। **तत्र नान्दीति।** **'चन्द्रनामाङ्किता प्रायो मङ्गलार्थपदोज्ज्वला। आशीर्नमस्क्रिया वस्तुनिर्देशो वा प्रकल्प्यते॥ इत्यादिविशेषोऽप्यत्र द्रष्टव्यः।** इति।

नन्दयति इष्टानिति नान्दी। विघ्नविनाशार्थं नटैः क्रियमाणो मङ्गलाचरणविशेषः नान्दीत्युच्यते। तदुक्तं साहित्यदर्पणे विश्वनाथकविराजेन - **आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते। देवद्विजनृपादीनां तस्मान्नान्दीति कथ्यते।** इति। अत्रोदाहरणं चन्द्रनामाङ्किता अष्टपदात्मिका आशीरलङ्कृता नान्दी भवभूतेः मालतीमाधवे यथा –

**चूडापीडकपालसङ्कुलगलन्मन्दाकिनीवारयः**
**विद्युत्प्रायललाटलोचनशिखिज्वालाविमिश्रत्विषः।**
**पान्तु त्वामकठोरकेतकशिखासन्दग्धमुग्धेन्दवो**
**भूतेशस्य भुजङ्गवल्लिवलयप्राङ्गद्धजूटा जटाः॥** इति।

अस्मिन् पद्ये 'मुग्धेन्दवः' इति चन्द्रनाम, अष्ट पदानि च सन्ति। अयं पदनियमः कैश्चिन्नाभ्युपगम्यते। चन्द्रनामाङ्कनस्य रहस्यं तावदेवमुक्तम् –

**चन्द्रनामाङ्किता कार्या रसानां स यतो निधिः।**
**प्रीते चन्द्रमसि स्फीता रसश्रीरिति वालुकिः॥** इति।

मङ्गलाचरणस्य फलस्य विषये नैयायिकैः सयुक्तिकं विचारितम्। नास्तिकानां ग्रन्थे मङ्गलं विनापि निर्विघ्नपरिसमाप्तिदर्शनात् मङ्गलं विघ्नध्वंसं प्रति, ग्रन्थसमाप्तौ प्रति वा कारणं न भवति। नास्तिकादीनां ग्रन्थे मङ्गलरूपकारणाभावेऽपि समाप्तिरूपस्य, विघ्नध्वंसरूपस्य वा फलस्य दर्शनेन कारणाभावे कार्योत्पत्तिरूपव्यतिरेकव्यभिचार-सद्भावेन समाप्तेः, विघ्नध्वंसस्य वा मङ्गलफलत्वानुपपत्त्या, फलान्तरस्य तार्किकैरप्य-नङ्गीकारेण, यावत्फलविशेषशून्यत्वरूपहेतोः स्वरूपासिद्धत्वाभावेन मङ्गले निष्फलत्व-सिद्धेरिति चेत् न, मङ्गलं सफलं विषयत्वात् कृष्यादिवत्, अध्ययनवद्वा इत्यनुमानेन मङ्गले सफलत्वसिद्ध्या तदाचरणस्यावयकत्वात्।

अविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वं सिद्धम्। अविगीतत्वञ्च बलवदनिष्टाननुबन्धित्वम्। एवं मङ्गलस्य सफलत्वे सिद्धे कार्यसमाप्तिरूपदृष्टफलकत्वे सिद्धे, स्वर्गाद्यदृष्टफलकल्पनाया अन्याय्यत्वात् समाप्तिरेव फलं कल्प्यते। तथा च यत्र

नास्तिकानां ग्रन्थेषु मङ्गलं न दृश्यते, तत्रापि जन्मान्तरीयं मङ्गलं कल्प्यते। अथवा तत्र विघ्नात्यन्ताभाव एव कारणं स्यात् समाप्तेः। यत्र किरणावल्यादौ मङ्गलसत्त्वेऽपि समाप्तिर्न दृश्यते, तत्र विघ्नानां प्राचुर्यमेव समाप्त्यभावे कारणम्। बलवत्तरविघ्ननाशं प्रति बलवत्तरमङ्गलस्य कारणता स्वीक्रियते। मङ्गले बलवत्तरत्वं धर्मविशेषः समाप्त्यनन्तरसंवेद्यः। मङ्गलं विघ्नध्वंसद्वारा समाप्तेः कारणमिति प्राचीनाः नैयायिका अभिप्रयन्ति। नव्यास्तु मङ्गलस्य फलं विघ्नध्वंस एव। ग्रन्थसमाप्तिस्तु बुद्धिप्रतिभादि-कारणकलापात् इत्याशेरते।

एवमभीष्टफलसाधनाय इष्टदेवताप्रार्थनामाचरन्तः भक्ताः भगवतेऽपि मङ्गलमाशासते –

**श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम्।**
**श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम्॥** इति॥

# प्रतिशाख्यस्वरूपम्- शैलीविमर्शश्च

**प्रो. सि. एल्. सिसिली, व्याकरणविभागाध्यक्षा**

अस्ति वैदिकवाङ्मये प्रातिशाख्यस्य महत्वपूर्णं स्थानम्। प्रातिशाख्यं वेदस्य लक्षणग्रन्थः भवति। प्रतिशाखमधिकृत्य कृतं शास्त्रं विद्यते। वैदिकसंहितानां सम्यगवबोधाय तथा वैदिकमन्त्राणां शुद्धोच्चारणार्थं च प्रातिशाख्यानामध्ययनमनिवार्यम्। भाषायाः बाह्यस्वरूपमवगन्तुं व्याकरणस्य यादृशं प्राधान्यं वर्तते तादृशं प्राधान्यं प्रातिशाख्यानामपि वर्तते वेदमन्त्राणां बाह्यस्वरूपज्ञानार्थम्। वैदिकध्वनिविज्ञानस्य विषये अस्य महत्वपूर्णं योगदानं विद्यते।

संहिता विषयकं विधानमस्य प्रमुखप्रतिपाद्यं पदानां सन्धिभिस्संहिता निष्पद्यत इत्यस्य सिद्धान्तः। अत एवात्र स्वचरणस्य सन्धिविषयकाः नियमाः विहिताः। संहितासु प्रयुक्तानां पदानां मूलस्वरूपं सम्यगवबोधयितुं तच्चरणस्य पदपाठविषयकं विधानमपि निर्दिष्टम्। वर्ण एव पदानां मूलघटकः, अत एवात्र चरणविशेषस्य संहितासु प्रयुक्ताः वर्णाः तेषाम् उच्चारणप्रक्रिया चोपदिष्टा। उदात्तादयः स्वराः वैदिकभाषायाः मुख्यं वैशिष्ट्यम्। अतः स्वरविषयकं विधानञ्चात्र निर्दिष्टं विद्यते।

परम्परायां प्रातिशाख्यग्रन्थः शिक्षागणे गण्यते, किन्तु केचनाचार्याः व्याकरणस्यान्तर्गते प्रातिशाख्यं मन्यन्ते। यथा वैदिकाभरणे –

**शिक्षा गणोपदिष्टं तु कार्यं नाम संगृहीतं व्याकरणप्रधानत्वात् प्रातिशाख्यस्य** (वैदिकाभरणम् 24.5) इति।**अस्य शास्त्रस्य मूलभूतं व्याकरणं पूर्वशास्त्रमित्युच्येत** इति। पर्यालोचनेन ज्ञायते नेदं शास्त्रं शिक्षायाः सम्पूर्णो ग्रन्थः न च व्याकरणस्य प्रत्युत उभयोः विषयः अत्र गुम्भितः। अस्य समर्थनम् उव्वटाचार्यस्य भाष्ये वाजसनेयप्रातिशाख्ये च प्राप्यते। तद्यथा- **वृद्धमिदं शास्त्रमन्यानि शास्त्राण्यपेक्ष्य, शिक्षाविहितं व्याकरणविहितं चास्मिन् शास्त्रे उभयं यतः प्रक्रियते।** (वा. प्रा. 1-169)

शिक्षा- छन्द- व्याकरणादिषु वेदस्य सर्वसाधारणो नियमः प्रतिपादितः। परन्तु तेषां वेदशाखाप्रभेदेन नियमानां कथमुपयोगो भवेदिति प्रातिशाख्यस्य प्रमुखं प्रयोजनं ज्ञायते।

प्राचीनकाले सर्वासां शाखानां पृथक् पृथक् प्रातिशाख्यमासीत्। सम्प्रति केचन एव उपलभ्यन्ते। ऋक्करणमधिकृत्य शौनककृतं ऋग्वेदप्रातिशाख्यम्,

कृष्णयजुश्चरणमधिकृत्य अज्ञानकर्तृकं तैत्तिरीयप्रातिशाख्यम्, शुक्लयजुश्चरणमधिकृत्य कात्यायनकृतं शुक्लयजुर्वेदप्रातिशाख्यं वाजसनेयप्रातिशाख्यं वा, सामचरणमधिकृत्य औद्वजिकृतं ऋक्तन्त्रम्, अथर्वचरणस्य कौत्सकृता चतुरध्यायिका अज्ञातकर्तृकम् अथर्ववेदप्रातिशाख्यञ्च।

**प्रातिशाख्यस्वरूपम्-**

धातुवृतिकारो माधवः प्रातिशाख्यशब्दस्य व्याख्यामेवं करोति- प्रतिशाखं भवं प्रातिशाख्यम्। अव्ययीभावाच्चेति भवार्थे ञ्यः। तत्त्वबोधिनीकारः- परिमुखादिगणे प्रतिशाखशब्दोऽपि ग्राह्यः। शाखृ व्याप्तौ इति धातोः प्रतिशाखं भवं प्रातिशाख्यम् इति।**चरणवाचिनः प्रतिशाखा शब्दादपि** प्रातिशाख्यशब्दो व्युत्पादयितुं शक्यते। वाजसनेयप्रातिशाख्यस्य भाष्यकारो अनन्तभट्टः प्राह- शाखायां शाखायां प्रति प्रतिशाखम्, प्रतिशाखं भवं प्रातिशाख्यमिति। तत्र वीप्सार्थे अव्ययीभावः। कुमारिलभट्टः तन्त्रवार्तिकग्रन्थे प्रातिशाख्यलक्षणमेवं विवृणोति- धर्मशास्त्राणां गृह्यग्रन्थानां च प्रातिशाख्यलक्षणवत् प्रतिचरणं पाठव्यवस्थोपलभ्यते।(तन्त्रवार्तिके 5.1.3)

**व्याकरणप्रातिशाख्ययोर्भेदः-**

व्याकरणं विश्लेषणपुरस्सरं पदसाधुत्वं प्रदर्शयति। प्रातिशाख्यं चरणविशेषे कांश्चन सन्ध्यादिविधिविशेषान् व्यपस्थापयति। उव्वटः जगाद- एवं शिक्षाछन्दो व्याकरणैर्यत् सर्वासु शाखासु सामान्येन लक्षणमुच्यते, तदेवास्यां शाखायाम् अनेन व्यवस्थाप्यत इत्येतत् प्रयोजनम् अस्याङ्गस्य। तथा चान्यवर्णप्रातिशाख्ये इदमेव प्रयोजनम् उक्तम्- (अ.प्रा. 1.2.3) सामान्येन लक्षणेन यद् विकल्पप्राप्तं तदेव अस्यां शाखायां व्यवस्थितं भवतीति प्रातिशाख्यप्रयोजनमुक्तम्। (ऋ. प्रा. 1.1)

**शैलीविमर्शः-**

पाणिनिना स्वकाले विद्यमानं वाङ्मयं दृष्ट- प्रोक्त- उपज्ञात- कृत- व्याख्यानभेदेन पञ्चधा विभक्तम्। शास्त्रद्वयेऽपि प्रोक्तवाङ्मये अन्तर्भाव्यते।

**प्रतिपादनशैली अथवा पद्धतिः-**

**1.सूत्रात्मकता-**

प्राचीनैः शास्त्रकारैः सूत्रशैल्या सूत्राणि विरचितानि। सूत्रलक्षणम्-

**लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।**
**सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः॥**

वायुपुराणादिषु(49-142)-**अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्।**
**अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥**

इति च सूत्रलक्षणम् उभयोः सर्वथा समन्वेति।

सूत्राणि षड्विधानि- **संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्चेति षड्विधं सूत्रलक्षणम्॥**

इमे प्रकाराः प्रातिशाख्ये च समुपलभ्यन्ते।

**2.प्रत्याहारः-**

प्रत्याहारो नाम संक्षेपः। हरदत्तः व्युत्पादयति- प्रत्याह्रियन्ते वर्णाः यस्मिन्निति प्रत्याहारः। पाणिनिः प्रत्याहारशब्दम् अव्याहरन्नपि प्रत्याहारशैलीं समाश्रयति। तत्र **अक्षरसमाम्नायिकाः तद्व्यतिरिक्ताश्चेति** द्विविधाः प्रत्याहाराः प्रयुज्यन्ते। वाजयनेय प्रातिशाख्ये यद्यपि तिङ् प्रत्ययस्य प्रयोगः उपलभ्यते तथापि प्रत्याहारशैली नोपयुज्यते। प्रत्याहाराणां स्थाने प्रातिशाख्यकारः (वाजसनेयः) सिमादि वर्णसंज्ञा व्यवहरति।

**3. अनुबन्धाः-**

एतीति इत्। गच्छति, न तिष्ठति, लुप्यत इत्यर्थः (अष्टा. 1-3-2)। बन्धम् अनुगत इत्यानुबन्धः इति व्युत्पाद्यते कैश्चित्, अनु समीपं बध्यत आसज्यत इत्यनुबन्धः। प्रातिशाख्येषु अनुबन्धप्रयोगशैली परिलक्ष्यते, यथा- तिङ् (वा. प्रा. 1-27), आङ् (वा. प्रा. 6- 24)

**4.संज्ञापरिभाषम्-**

शास्त्रेषु लाघवार्थं स्पष्टप्रतिपत्यर्थं च संज्ञापरिभाषम् आश्रीयते। प्रातिशाख्येषु संज्ञाः यथेष्टम् उपयुज्यन्ते। यथा- समानाक्षरसंज्ञा, सवर्णसंज्ञा, स्वरसंज्ञा, व्यञ्जनसंज्ञा। वाजसनेय प्रातिशाख्ये प्रधानतः प्रथमे अध्याये गुणतश्य सर्वत्र शास्त्रे संज्ञापरिभाषं विन्यासि।

**संज्ञाविभागाः-** सङ्ग्रहसंज्ञा – अधिकाररूपेण विन्यस्य संज्ञिनः संगृह्यन्ते। अच्, हल् प्रभृतयः संज्ञाः। वाजसनेय प्रातिशाख्ये प्रगृह्यं, रिफित इति द्वे संज्ञे।

**प्रत्ययसंज्ञा-** पाणिनीये विविधाः संज्ञाः कृताः, किन्तु प्रातिशाख्ये प्रत्ययसम्बन्धिकार्याणामभावात् न ताः क्रियन्ते।

**वर्णसंज्ञा-** पाणिनीये वर्णानां बह्व्यः संज्ञाः कृताः। प्रातिशाख्ये उपधा सवर्ण सन्ध्यक्षरम्, जिह्वामूलीय- उपध्मानीयः, अनुस्वारः, विसर्जनीयः, नासिक्यः, यमः इत्यादयः।

**शब्दसंज्ञा-**शास्त्रद्वयेऽपिशब्दानां संज्ञाः क्रियन्ते।पाणिनीये- षट्, वृद्धम्, प्रातिपदिकम् इत्यादयः। प्रातिशाख्ये- आम्रेडितम्, स्थितोपस्थितम्, अपृक्तम् इत्यादयः।

**अर्थसंज्ञा-** पाणिनीये विभाषा, लोपः, अवसानम् इत्यादयः। शुक्लयजुर्वेदप्रातिशाख्ये नतिः, मात्रा, अणु, परमाणु, लोपः, उपसर्ग, निपात इत्यादयः अर्थसंज्ञाः दृश्यन्ते।

**आकृतिसंज्ञा-** पाणिनीये घु, घ, टि इत्यादयः। प्रातिशाख्ये- सिम्. जित्, मुद् घि इत्यादयः उपदिदेश।

**वाजसनेय- प्रातिशाखीयाः काचनसंज्ञाः-**

**उपधा-** अन्त्यात् वर्णात् पूर्व उपधा। (वा. प्रा. 1-35)

**नतिः-** दन्त्यस्य मूर्धन्यापत्तिःनतिः (वा. प्रा. 1-42)। ऐन्द्रसम्प्रदायेषु नतिसंज्ञा व्यवह्रियते। कात्यायनः तस्य स्थाने **विनाम**संज्ञा कृता।

**सवर्णः-** समानस्थानकरणास्यप्रयत्नः सवर्णः। (वा. प्रा. 1-43)

**सिम्-** सिमादितोऽष्टौ स्वराणाम् (वा. प्रा. 1-44)। अ आ इ ई उ ऊ ऋ ॠ इत्येतेषां सिम् संज्ञा। सिम् संज्ञा सवर्णदीर्घार्थम् आरभ्यते।

**सन्ध्यक्षरम्-** सन्ध्यक्षरं परम् (वा. प्रा. 1-45)। ए ऐ ओ औ इत्येतेषां सन्ध्यक्षरसंज्ञा विधीयते।

**रिफितः-** विसर्जनीयो रिफितः (वा.प्रा. 1-160)। अत्र प्रतिपादितासु संज्ञासु अनेका पूर्वा चर्चा कृता एव।

**5.निपातनानि-** निपातनशैली प्रातिशाख्ये भृशम् आश्रीयते। भट्टाचार्यो निपातनकार्यग्राहकं श्लोकम् उद्धरति-

**अप्राप्तेः प्रापणं चापि प्राप्तेर्वारणमेव वा।**
**अधिकार्थविवक्षा च त्रयम् एतन्निपातनम्॥**

**6.अधिकारः-** अधिकारद्योतनार्थं पाणिनिना **स्वरितेनाधिकारः** इति परिभाषासूत्रं प्रोवाच। वाजसनेयप्रातिशाख्ये **अथ शिक्षाविहिताः** (1.29) इत्यादिस्थलेषु अथशब्दो अधिकारार्थः प्रयुज्यते।

**7.गणनिर्दिशः-** प्रातिशाख्यकारोऽपि गणप्रयोगशैल्या परिचितः आसीदिति **उतम्भनादीन्यादि संशयात्** (वा. प्रा. 5.38) इति सूत्रेण ज्ञाप्यते।

8. **सूत्रक्रमः-** सूत्राणां विन्यासं क्रमविशेषेण चक्रतुः। तत्र सूत्रविपर्यासो न सम्भवति। यथा **विप्रतिषेधे परं कार्यम्**। अत्र क्रमसंख्यया परं शास्त्रं प्रवर्तते।**विप्रतिषेधोत्तरं बलवद्लोपे** (वा. प्रा. 1-159) इति परिभाषा लोपवर्जं प्रवर्तते इत्यत्रापि परं कार्यं प्रवर्तते। अतः उपात्तः सूत्रक्रमः सोद्धेश्यकः।

**9.प्रकीर्णम्-** उभयत्र विकल्पनिर्देशिकाः शब्दाः प्रायेण समाना एव प्रयुज्यन्ते। एवम् उभयोः शास्त्रयोः समाना प्रतिपादनशैली स्वीकृतेति अवगम्यते॥ इति शम्॥

# कालनिरूपणम्

**आचार्य. पी. सी. मुरलीमाधवन्, साहित्यविभागाध्यक्षः**

"कालाय तस्मै नमः' को वा न जानाति कालस्य माहात्म्यम् सर्वमपि जगज्जातं कालाधीनमेव। अत एव सीतापि वदति "**कालो हि दुरतिक्रमः**' (सुन्दरकाण्डे) विशिष्टानामवतारपुरुषाणां तथा चेत् सामान्यानामस्माकं का गतिः? अस्तु सर्वेषामुपरि तादृशभीतिदायकः कालपदार्थः कः? किं स इन्द्रियादिभिः ज्ञातुं शक्यते। अत अनुमानगम्यः? तस्य स्वरूपं किं? इत्यादि विषये विभिन्नशास्त्रकाराणां विभिन्ना शैली विद्यते, तत्र न्यायशास्त्रं किं वदति इति विवेचयामः।

नूतननैयायिकैः सप्तपदार्थाः अंगीकृताः। तत्र अन्यतमो भवति कालः, बालानां सुखबोधाय लिखिते तर्कसंग्रहग्रन्थे अतीतादिव्यवहारः हेतुः कालः इत्युक्तम्। इमं विषयमज्ञात्वापि सर्वे इदानीं तदानीमित्यादि व्यवहारं कुर्वन्ति, आपण्डितमापामरमयं व्यवहारः अबाधित एव। किञ्च प्राणिनामपि कालविषयकं ज्ञानं सम्यगस्ति इति सर्वैः ज्ञायत एव। प्रातः सूर्यपरिस्पन्दानुरोधेन सूर्यस्य सञ्चारानुरोधेन कालनिर्णयः भवति। पक्षिणः प्रातः काले सम्यक् गानं कुर्वन्ति, उलूकादयः रात्रौ रुदन्ति, एवं च कालस्य निर्णयः तेषामप्यस्तीत्यत्र अन्यत् किं निदर्शनम्। एवं सारमेयानां मैथुनादिविषये श्रावणमास एव उत्कृष्टतरः अन्यः कालः तैः नापेक्षितः किमर्थं? अहो सर्वमपि तत् कालस्य माहात्म्यमेव, अस्तु किं विशेषेण वक्तव्यम्।

"जन्यानां जनकः कालः जगतामाश्रयो मतः' इति प्रसिद्धा कारिका श्रूयते। कार्यमात्रं प्रति कालः निमित्तकारणं भवति। कार्यसामान्यं प्रति कालस्य निमित्तकारणत्वे किं मानम्? किमर्थं कालस्य सर्वेषां जन्यानामाधारत्वं स्वीकरणीयमिति चेत् नियमोऽस्ति यत् तदुत्पत्त्यधिकरणस्य तदुत्पत्तिहेतुत्वं, तदुत्पत्तिहेतोः तद्धेतुत्वमिति। अद्य घटः भविष्यति श्वो घटः भविता इत्यादयः प्रत्ययाः लोके दृश्यन्ते। तत्प्रत्ययानुरोधेन घटोत्पत्त्यधिकरणं भवति कालः, अतः घटहेतुत्वं सम्पन्नम्। एवञ्च तदुत्पत्तिहेतोः तद्धेतुत्वं सम्पन्नम्। तत्तत्कार्यविशेषं प्रति तत्तत्कालविशेषस्य हेतुत्वे सिद्धे ' यद्विशेषयोरसति बाधके तत्सामान्ययोरपि' इति नियमानुसारेण विशेषयोः कार्यकारणभावे सामान्ययोरपि कार्यकारणभावस्सिध्यति। एवञ्च कार्यसामान्यं प्रति कालस्य कारणत्वं सम्पद्यते।

अयञ्च कालः सर्वेषां पदार्थानामाश्रयः भवति। "कालः कालिकेन सर्ववान्' इति प्रतीत्या सर्वाधारत्वेन कालाख्यं द्रव्यं सिद्ध्यति। तत्रानुमानं प्रमाणं कालः न रूपाश्रयो वा स्पर्शाश्रयो वा अतः तत्र प्रत्यक्षं प्रमाणं नास्ति। परन्तु नीरूपस्यापि कालस्य इन्द्रियवेद्यत्वं वेदान्तिनोऽङ्गीकुर्वन्ति। नैयायिकास्तु कथयन्ति– एतत्काले घटोऽस्तीति प्रतीतिः सूर्यस्य गतिरूपां क्रियां विषयीकरोति, तदा सूर्यपरिस्पन्देन घटादिपदार्थानां सम्बन्धः वाच्यः। स च सम्बन्धः न संयोगः, सूर्यक्रियया साकं घटस्य संयोगाभावात्। क्रियागुणयोः संयोगः नांगीक्रियते, द्रव्ययोरेव संयोगः इति नियमात्। न समवायः, घटे सूर्यक्रियायाः असमवायात्, नापि स्वरूपः अभावादीनामेव तथात्वात्। किन्तु स्वाश्रयतपनसंयोगिसंयोगात्मकः परम्परासम्बन्धः। स्वं सूर्यक्रिया, तदाश्रयः सूर्यः तत्संयोगि कालः तत्संयोगः घटे अस्तीति। तादृशपरम्परासम्बन्धस्य सम्बन्धी काल इति सम्बन्धघटकतया कालः सिध्यति। आकाशादिपदार्थानाम तत्सम्बन्धघटकत्वे अन्येषां नित्यपदार्थानां विनिगमनाविरहेण कालस्य सम्बन्धत्वं कल्प्यते इति भावः। एवञ्च अनुमानस्याकारः एवं सम्पन्नो भवति इदानीं घट इत्याकारकसूर्यपरिस्पन्दप्रकारकघटविशेष्यकप्रतीतिः परम्परासम्बन्धविषया, साक्षात्संबन्धाभावे सति विशिष्टबुद्धित्वात्। एवञ्च विनिगमविरहेण कालस्यैव सर्वेषामाश्रयत्वं सिद्धमिति भावः।

अयं घटः परः अयमपर इति बुद्धेरसाधारणं निमित्तं काल एव। एक एव विभुर्भवति कालः। सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम्। क्षणमासादिव्यवहारः उपाधिभेदात् भवति। कालिकं परत्वं ज्येष्ठत्वं कालिकमपरत्वं समवायिकारणं घटः असमवायिकारणम् घटकालसंयोगः, तदाश्रयः एकः घटः अन्यः काल इति असमवायिकारणसंयोगाश्रयः काल एवेति भावः। एवञ्च अनुमानप्रयोग इत्थं सम्पद्यते- कालिकपरत्वापरत्वे असमवायिकारणजन्ये भावत्वे सति कार्यत्वात् घटवदिति।

एकस्मिन् पदार्थे क्षणदिनादिव्यवहारः कथं सिद्धयति इति चेदित्थम्। एकस्यापि कालस्य उपाध्यात्मककिञ्चिद्धर्मविशिष्टस्य क्षणत्वं, किञ्चिद्धर्मविशिष्टस्य दिनत्व, न केवलस्य कालस्य यतो हि महाकालस्य एतादृशव्यवहारविषयत्वं नास्ति किन्तु खण्डकालस्यैव।

क्षणत्वव्यवहारौपयिकोपाधिः चतुर्विधः-

(1) स्वजन्यविभागप्रागभावावच्छिन्नं कर्म
(2) पूर्वसंयोगावच्छिन्नविभागो वा
(3) पूर्वसंयोगावच्छिन्नोत्तरसंयोगप्रागभावो वा
(4) उत्तरसंयोगावच्छिन्नं कर्म वा। तत्र क्रिया, क्रियातो विभागः, विभागात् पूर्वसंयोगनाशः, उत्तरसंयोगोत्पत्तिरित्यनेन क्रमेण सर्वत्र क्षणव्यवहारो भवति। तत्र, प्रथम उपाधौ अयमस्ति क्रमः- स्व- मूर्तद्रव्यनिष्ठा क्रिया, तया क्रियया जनिष्यमाणस्य विभागस्य प्रागभावः स्वक्षणे वर्तते इति तत्प्रागभाविशिष्टा क्रिया स्वमेवेति प्रथमः उपाधिः। तेन च काले अयं प्रथमः क्षणः इति व्यवहार जायते।

नवीनास्तावत् प्रागभावं नांगीकुर्वन्ति। एवञ्च
(1) पूर्वोक्तोपाधिः प्राचीनमते नवीनानां मते स्वजन्यविभागनवच्छिन्नं स्वयमेव क्रिया इत्ययं प्रथमक्षणः।प्रतिक्षणं क्रियोत्पत्तौ मानाभावेन द्वितीयादिक्षणेषु कथं कालव्यवहार इत्याशङ्कायां द्वितीयोपाधिरुक्तः। पूर्वसंयोगेति क्रियासमये मूर्तद्रव्यस्य यः पूर्वदेशेन संयोग आसीत्, अव्यवहितोत्तरत्वसम्बन्धेन तादृशसंयोगविशिष्टः यः क्रियाजन्यः विभागः सः द्वितीयक्षणोपाधिः। विभागमात्रस्योपाधित्वें विभागोत्तरकालेऽपि द्वितीयक्षणत्वापत्तिः। अतः पूर्वसंयोगावच्छिन्नविभाग इति पूर्वसंयोगविभागाधिकरणे काले एव द्वितीयक्षणत्वव्यवहारः। स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्वजन्य-विभाग इति संकल्पिताभिप्रायः।
(3) क्रियाकाले यः पूर्वदेशवर्ती मूर्तद्रव्यस्य संयोगः आसीत् तादृशसंयोगध्वसंविशिष्टः यः जनिष्यमाणस्य उत्तरसंयोगस्य प्रागभावः, सः तृतीयक्षणोपाधिः।नव्यमते स्वजन्यसंयोगान-वच्छिन्न स्वजन्यविभागजन्यसंयोगनाश एव तृतीयोपाधिः।
(4)उत्तरदेशसंयोगविशिष्टा क्रिया एव चतुर्थक्षणोपाधिः। एवमेव पञ्चमादिक्षणानामपि व्यवहारः सम्पादनीयः । दिनादि व्यवहारोऽपि तत्तत्क्षणेन उपपादनीयः। लव-निमेष-काष्ठा-कला, मुहूर्त-दिन-पक्षा-मास-अयनसंवत्सर-युगादि व्यवहारः अनेनैव पूरणीयः। स चेत्थम् तत्र निमेषो नाम नेत्रेषु निमीलितेपु संयोजनवियोजनम्। त्रिनिमेपाः कक्षः। त्रिकक्षाः काष्ठाः। त्रिंशत्काष्ठाः कलाः। त्रिंशत्कलाःमुहूर्तम्। त्रिंशन्मुहूर्तानि दिवसः पञ्चदशदिनानि पक्षः। द्वौ पक्षौ मासः, ऋतुः द्वौ मासौ। ऋतुः द्वौ मासौ। ऋतुत्रयं एकमयनम्। अयने द्वे संवत्सरः। एवं इदमपि श्रूयते पुराणादिषु- सत्ययुगस्य वर्षाणि

अष्टविंशतिसहस्राधिकसप्तदशलक्षाणि। त्रेतायुगस्य वर्षाणि षण्णावति सहस्राधिकद्वादशवर्षाणि। द्वादशयुगस्य वर्षाणि चतुष्षष्टिसहस्राधिकलक्षाणि कलियुगस्य द्वात्रिंशत्सहस्राधिकचतुर्लक्षाणि। मिलित्वा चतुर्युगानां विंशतिसहस्राधिकत्रिचत्वारिंशल्लक्षाणि। तादृश चतुर्युनामेकसप्ततिः मन्वन्तरं भवति। एकमन्वन्तरस्य वर्षाणि विंशतिसहस्राधिकसप्तषष्टि लक्षोत्तरत्रिंशत्कोटयः। तादृशचतुर्युगानामेनकसप्ततिः मन्वन्तरं भवति। एकमन्वन्तरस्य वर्षाणि विंशतिसहस्राधिकसप्तषष्टि लक्षोत्तरत्रिंशत्कोटयः।

दिवसान्ते महर्जनतपः सत्यलोकान् विहाय स्वर्गादिपातालान्तानां दशलोकानां खण्डप्रलयो भवति। सोऽयं नैमित्तिकप्रलयः उच्यते। नित्यप्रलयस्तु ब्राह्मलवनिमेषादिषु प्रलीयते अकस्मात् वस्तुजातमिति स उक्तः। ब्राह्मणः शतवर्षाणां समाप्तौ अष्टावरणसहित ब्रह्माण्डप्रलयो भवति। सः खण्डप्रलयः। अथवा प्राकृतिकः प्रलय उचस्ते। सोऽयं महाविष्णोः एकदिवसात्मकः कालः महाविष्णोः शतवर्षसमाप्तौ सर्वं भावकार्यं सृष्टिमयं प्रलीयते। सोऽयं आत्यन्तिकप्रलय इत्युच्यते। महाप्रलयः तत्रायं श्लोकः—

**क्षणद्वयं लवः प्रोक्तो निमेषस्तु लवत्रयम्।**
**त्रयाणां तु निमेषाणां कक्ष इत्यभिधीयते॥**
**पञ्चदशनिमेषाश्च काष्ठास्त्रिंशस्तु ताः कलाः।**
**त्रिंशत्कला मुहूर्तं स्यात् त्रिंशद्रात्र्यहनी च ते॥**
**अहोरात्राः पञ्चदशाः पक्षो मामस्तु तावुभौ।**
**षण्मासद्वयं वर्षः मानुपोऽयमुदाहृतः॥**
**एष दैवस्त्वहोरात्रः तैः पक्षादि च पूर्ववत्।**
**दैववर्षसहस्राणि द्वादशैव चतुर्युगम्॥**
**युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते।**
**कृताब्दसंख्या चास्यान्ते सन्धिः प्रोक्तो जलप्लवः॥**
**ससन्धयस्ते मनवः कल्पे श्रेयाश्चतुर्दशः।**
**चतुर्युगसहस्रान्तु ब्राह्मणो दिनमुच्यते॥**
**रात्रिश्चैतावती तस्य ताभ्यां पक्षादि कल्पना।**
**ब्रह्मणः शतवर्षाणि महाविष्णोरहः स्मृतम्॥**
**तस्य वर्षशतान्ते च महाप्रलय उच्यते॥** इति शम्॥

# वैयाकरणमतमनुसृत्य ध्वनिविमर्शः

**आचार्य. वि.के. शैलजा(निवृत्ता)**

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥**

शुद्धशब्दज्ञानार्थं शुद्धशब्दप्रायोगार्थञ्च व्याकरणज्ञानस्य अनिवार्यता सर्वैरप्याचार्यैः संस्तूयन्ते। अतः साधुशब्दज्ञानार्थं व्याकरणाध्ययनमवश्यं करणीयं भवति। महाभाष्ये तावत् व्याकरणाध्ययनप्रयोजनेषु मुख्यतया रक्षोहागमलघ्वसन्देहाः प्रयोजनमित्युक्तम्। आनुषङ्गिकप्रयोजनान्यप्युक्तानि। तथा चोच्यते-

**यद्यपि बहु नाधीषे तथापि पठपुत्र व्याकणम्।**
**स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत्॥**

वेदानां साधुज्ञानार्थं षड्सु वेदाङ्गेषु व्याकरणज्ञानं मुख्यं भवति। मुखं व्याकरणं प्रोक्तमिति कारिकया। शब्दाधीनं जगत्। एवंविध शब्दः मुखेनोच्चार्यते। अतः तत्साधनत्वेन व्याकरणमपि शब्दब्रह्मणो मुखरूपमस्ति। व्याकरणमेव शब्दप्रकाशनेन स्वमनोगतभावाविर्भावकमन्तर्निहितविचारप्रसारकं ज्ञानज्योतिरस्ति। शब्दशास्त्राव-गाहनेन वाक्यतत्त्वविवेचनेन शब्दब्रह्मप्रकाशनेन व्याकरणस्य शास्त्रेषु सर्वोत्कृष्टत्वं कल्प्यते। न केवलं तत्त्वज्ञैरेव व्याकरणं प्रशंस्यते, अपि तु विविधशास्त्रपारदृग्भिः विद्वत्तल्लजैरपि इदमभिनन्द्यते। काव्यशास्त्र- तत्त्वज्ञः काव्यप्रकाशकारो मम्मटभट्टमहोदयः वैयाकरणानां तत्त्वज्ञतां प्रतिपादयन् अभिधत्ते- बुधैर्वैयाकरणैः प्रधानभूतस्फोटे व्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृत इति। शब्दब्रह्मरूपस्य व्यङ्ग्यस्य स्फोटस्य व्यञ्जकभूतस्य शब्दस्य ध्वनिरिति नाम इति यावति। किन्तु ध्वनिरेव काव्यज्ञानां सर्वस्वम्। अत एव आनन्दवर्धनाचार्यादिभिः ध्वनिः काव्यस्योत्कृष्टत्वं समर्थ्यते।

गौरित्यादि लौकिकशब्दानां कः शब्दः इति चेत् महाभाष्यकारेण उच्यते- येनोच्चारितेन सास्नालाङ्गूलककुदखुर- विषाणिनां संप्रत्ययो भवति स शब्दः इति। अतः वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति वैयाकरणाः। वर्णानां प्रत्येकं प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात्। अतः वर्ण- समुदायरूपं पदं, पदसमुदायरूपं वाक्यं वा वाचकमथवा बोधकं भवति। स्फुटत्यर्थोऽस्मादिति स्फोटः नाम

बोधको, वाचको वा भवति। अथवा प्रतीतपदार्थकः लोके ध्वनिः शब्दः इत्युच्यते। शब्दे उच्चारिते येन अर्थस्य प्रतीतिः सञ्जायते चेत् तत् ध्वनिः शब्देति यावति। तद्यथा शब्दं कुरु, शब्दं मा कार्षीः इत्यादौ शब्दं कुर्वन्नपि शब्दं इत्युच्यते। एवमनभिमतशब्दश्रवणोद्वेजिनोच्यते मा शब्दं कार्षीः इति। व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वात् वर्णरूपध्वनिसमूह एव शब्देति यावति। धवनि पदेनात्र वैखरी वाक् गृह्यते। स्फोट पदेन अभिव्यक्तकत्वादिको मध्यमावस्था आन्तरःशब्दः उच्यते। स्फोटस्तावत् नादभिव्यङ्ग्यो वाचकः।

उपादीयते स्वरूपे अध्यारोप्यते अर्थरूपतां विहाय स्वरूपमिव आपाद्यतेऽर्थीयेन स उपादानः वाचकः शब्दः। तस्यार्थरूपेण रज्जोः सर्परूपेणैव विवर्तनात् रज्जुरिव सर्पस्य अर्थस्य विवर्तोपादानं शब्दः। विवर्तो नाम अतत्त्वतो अन्यथाभावः। शब्दार्थयोः कार्यकारणभावादेव योऽर्थः स शब्दः, यः शब्दः सोऽर्थ इति शब्दार्थयोस्तादात्म्यम्। ताभिन्नत्वे सति अभेदेन प्रतीयमानत्वं तादात्म्यम्। द्वयोः शब्दयोः भेदमारोप्य संज्ञासंज्ञिभावस्येव उपादानोपादेयभावस्य स्वीकारः। उपादीयते अर्थो बाध्यते अनेनेति व्युत्पत्या उपादानशब्दः बोधकपरः। एवञ्च उपादानशब्देषु वाचकशब्देषु उच्चारणेन प्रकाशनीयेषु द्वौ शब्दौ व्यङ्ग्यव्यञ्जकरूपौ इति वैयाकरणानां मतम्। शब्दस्वरूपावधारणरूपम् अर्थावधारणरूपञ्च कार्यद्वयमत्र मानम्। तत्रैकः शब्दानां वैखरीरूपाणां निमित्तम्। श्रूयमाणशब्दानां न वाचकत्वम्, किन्तु तदभिव्यङ्ग्यस्फोटस्यैव। स्फोटव्यञ्जकत्वादेव अर्थविवक्षा प्रयोक्ता, शब्दान् वैखरीरूपान् प्रयुङ्क्ते इति स्फोटः येषां शब्दानां निमित्तम्। अपरः शब्दः स्थानवाय्वभिघातरूपात् करणव्यापारात् श्रोत्रानुपाती वैखरीरूपः अर्थे प्रयुज्यते। अर्थबोधनेच्छया स्फोटप्रकाशनाय उच्यते। करणव्यापारादुपजातक्रमः वैखरीरूपः श्रोतृबुद्धिस्थस्य अक्रमस्य प्रत्यायकस्य निमित्तम्। एकः शब्दः अपरः श्रोतृबुद्धिस्थः अक्रमः स्फोटः अर्थे अर्थावबोधनाय प्रयुज्यते।

ध्वनिशब्दस्य बहवो अर्थाः सन्ति। यथा-

1.ध्वनति यः स व्यञ्जकः शब्दो ध्वनिः।

2. ध्वनति ध्वनयति वा यः व्यञ्जको अर्थो ध्वनिः।

3.ध्वन्यते इति ध्वनिः, ध्वन्यते इत्यनेन रसालङ्कारवस्तुरूपं व्यङ्ग्यार्थत्रयमुपतिष्ठते।

4.ध्वन्यते अनेनेति ध्वनिः। अनेन व्यञ्जनात् शक्तीनां ग्रहणम्।

5.ध्वन्यते अस्मिन्निति ध्वनिः इत्यनेन व्यङ्ग्यार्थप्रधानं काव्यमपि गृह्यते। एवञ्च ध्वनिशब्देन व्यञ्जकशब्दस्य, व्यञ्जकार्थस्य, व्यञ्जनाव्यापारस्य, व्यङ्ग्यप्रधानकाव्यस्य च ग्रहणम्।

अत्रालङ्कारिकाः वाच्यार्थापेक्षया व्यङ्ग्येऽर्थे मुख्ये सति तं ध्वनिरिति कथ्यन्ते। एवं व्यङ्ग्यार्थप्रधानस्य काव्यस्यैव सर्वोत्कृष्टत्वं मन्यते। तदा च काव्यप्रकाशे एवमुच्यते- इदमुत्तमातिशायिनि व्यङ्ग्ये वाच्यात् ध्वनिर्बुधैः कथितः इति। वाच्यातिशायिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमिति साहित्यदर्पणे चोक्तम्।

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥**

इति ध्वन्यालोके आनन्दवर्धनाचार्यैरुक्तम्। प्रसिद्धातिरिक्तमन्यदेव क्वचित् प्रतीयते वाच्यातिरिक्तं व्यङ्ग्यरूपं स ध्वनिरिति यावत्। व्यङ्ग्यार्थवैशिष्ट्येन नीरसं सरसं भवति, असुन्दरं सुन्दरञ्च जनयति।

वाक्यपदीये भर्तृहरिमहोदयैः नादस्फोटयोः स्वरूपमेवं निरूप्यते-

**यः संयोगविभागाभ्यां करणैरुपजायते।**
**स स्फोटः शब्दजाः शब्दाः ध्वनयोऽन्यैरुदाहृताः॥**

इति। तत्रोच्चारणावयवानां संयोगेन विभागेन च यः शब्दः उत्पद्यते स स्फोटः, अन्ये च शब्दजाः शब्दाः ध्वनिशब्दवाच्याः। घण्टानादादिषु अनुसरणशब्दो यथा यत्रैव शब्दजो व्यङ्ग्योऽर्थो ध्वनिरित्युच्यते। स्फोटनादयोः व्यङ्ग्यव्यञ्जकभावसम्बन्धो मन्यते तथैव काव्येऽपि ध्वनेर्व्यञ्जकत्वं प्रतीयमानस्यार्थस्य व्यङ्ग्यत्वञ्च।

**ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा।**
**व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः॥**

इति वाक्यपदीये उक्तं हरिणा। एवंविध वाक्यपदीयकारिकया यथा चक्षुरादि इन्द्रियाणां रूपादिग्राहकत्वं तथैव स्फोटनादयोः व्यङ्ग्यव्यञ्जकभावत्वम्, अथवा कण्ठाद्यभिघातजन्यध्वनेरेव अकारादीनां व्यञ्जकभावः नियत एव। एवं सदृषेन्द्रियग्राह्यगन्धेऽभिव्यञ्जकनियम इव तादृशे शब्दे अभिव्यञ्जकनियमः। अभिव्यञ्जकस्य प्राकृतध्वनेः वृद्धिह्रासाभ्यामभिव्यङ्ग्यस्य स्फोटस्य वृद्धिह्रासौ प्राकृतध्वनिभेदेन चैकस्यैव स्फोटस्य घट इति पट इति भेदश्चानुभूयते। तथा

सति अभिव्यङ्ग्यधर्माभावात् स्फोटो न अभिव्यज्यते। किन्तु उत्पद्यते एवेत्यतः स्फोटस्य नित्यता न स्यादिति न वक्तव्यम्। अभिव्यञ्जकभेदे अभिव्यङ्ग्यभेदः अभिव्यञ्जकवृद्धौ अभिव्यङ्ग्यभेदादयः द्रष्टुं शक्यते इत्यतः नानित्यता स्फोटस्य। एवं नादैराहितबीजायां बुद्धौ अन्त्यवर्णश्रवणेन समं शब्दस्य रूपमवधार्यते, ध्वनिरेव शब्दस्वरूपं प्रकाशयति इति वाक्यपदीयेन अवगन्तुं शक्यते। तदुच्यते-

**नादैराहितबीजायामन्त्येन ध्वनिना सह**
**आवृत्त परिपाकायां बुद्धौ शब्दोऽवधार्यते।**
**प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा**
**ध्वनि प्रकाशिते शब्दे स्वरूपमवधार्यते॥** इति।

ध्वनयः प्रत्येकं स्फोटं नावबोधयन्ति स्फोटस्य निरवयवत्वात्। तथा सति स्फोटस्य ध्वनिभिरभिव्यक्तिः इति चेत् प्रत्येकमेव ध्वनयोऽविकलमथवा कृत्स्नं स्फोटमभिव्यञ्जयन्ति। नादः न वाय्वात्मा, न तत् संयोगविभागात्मा, किन्तु वायुगुणः शब्दविशेषो ध्वनिः।

द्विविधो हि शब्दः वर्णः ध्वनिश्च। द्वयोरनुगतं शब्दत्वम्। तत्र ध्वन्यात्मकः शब्दो वायुगुणः श्रोत्रग्राह्यः वैयाकरणमते वाचकत्वरूपध्वनिसादृश्यात् नादपदेन ध्वनिपदेन च अभिव्यक्तं शब्दमिव वर्णमपि गृह्यते। मीमांसकाः अपि अव्यक्तं शब्दविशेषमेव नादपदेनाचक्षते च वर्णानिति। अतः स्फोटो नादव्यङ्ग्य एव। उद्योतकारः नागेशभट्टोऽपि प्रतीतपदार्थको लोके शब्दः ध्वनिरित्युच्यते। वाक्यव्याख्यावसरे लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वात् वर्णरूपध्वनिसमूह एव शब्द इति व्याख्यायते। भट्टपादः कारिकाव्याख्यानावसरे तत्संग्रहटीकायां पञ्चिकाख्यायां वैयाकरणादेर्घोषात्मको ध्वनिः व्यञ्जकः, न तु वायुसंयोगविभागात्मक इत्युक्तम्।

भर्तृहरिमहोदयस्याभिप्राये ध्वनिः द्विविधः। प्राकृतो वैकृतश्च। प्रकृतौ स्फोटे भवः प्राकृतः। स्फोटाभिव्यञ्जकः प्राकृतध्वनिः। ध्वनिस्फोटयोः पृथक्त्वेनानुपलम्भात् स्फोटं ध्वनेः प्रकृतिः। तत्र स्फोटस्य प्राकृतध्वनेर्भेदाग्रहात् वर्णोपरागाभिव्यक्तिजनकयत्नीयकालो- परागेणैवेति भावः। अत एव तस्य प्राकृतत्वेन व्यवहारः। प्राकृतात् जातः विकृतिविशिष्टः चिरस्थायी स्फोटानभिव्यञ्जकः

स्फोटोपलब्धिधाराजनकः। प्राकृतेन ध्वनिना स्फोटेऽभिव्यक्ते तदुत्तरकालभावी ध्वनिः स्फोटाद्विलक्षण उपलभ्यन्ते इति विकल्पापत्तिरिव स्फोटस्येति वैकृत उच्यते। यथा उद्यन्नेव प्रकाश- घटमवभासयति तदन्तरमाविष्टमानः घटोपलब्धिधारां जनयन्नपि शब्दविषयां बुद्धिधारां जनयन्नपि न शब्दं प्रकाशयति। अतो वैकृतध्वनिसंससृष्टमपि स्फोटं वैकृतध्वनिभिन्नमुपलक्ष्यन्तो वैकृतध्वनिगतं देशकालभेदं स्फोटे नाध्यारोपयन्ति। स्फोटाभिव्यञ्जकत्वात् प्रकृतो ध्वनिरालोकः। स्फोटोऽपि व्यञ्जकत्वात् वैकृतो ध्वनिः तमः। महाभाष्ये ध्वनिः शब्द इत्युक्तम्। वाक्यपदीये एवमुच्यते-

**शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।**
**शब्दस्योर्ध्वमभिव्यक्ते स्थितिभेदे तु वैकृताः।**
**ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते॥** इति।

व्यञ्जकोपरागवशात् स्फटितं यथा भिन्नत्वप्रतीतिः तथा व्यञ्जकध्वनि- गत कत्वगत्वादयः स्फोटे भासन्ते, वस्तुतः न कत्वादयः भेदाः।

कैयटमतमनुसृत्य ध्वनिः स्फोटश्च व्यङ्ग्यव्यञ्जकश्च स्तः। शब्दानां व्यङ्ग्यानां सम्बन्धी व्यञ्जको यो ध्वनिः स एव महानल्पश्च लक्ष्यते। व्यङ्ग्यस्तु अभिन्नकाले व्यक्तानां शब्दानां स्फोटो ध्वनिश्चेत्युभयं गृह्यते। अव्यक्तानां तु ध्वनिरेव, तथा च स्फोटः शब्दः, ध्वनिः शब्दगुणः इति महाभाष्ये उक्तम्। शब्दगुण इत्यनेन व्यञ्जकत्वेनेत्यर्थः। स्फोटोपलब्धिप्रतिबन्धकास्तिमितवाय्वपसरणद्वारा स्वधर्मरूषित तदुपलब्धिहेतुत्वेनेत्यर्थः। अत्र ध्वनिपदेन वैखरी, स्फोटपदेन अभिव्यक्तकत्वादिक आन्तरो शब्दः। वक्तृबुद्धिस्थः स्फोटः वक्तृप्रयत्नाभिव्यङ्ग्यध्वनिरुपरुषितः परश्रवणगोचरो भवति। स च परेण श्रुतः तत् बुद्धिस्थं स्फोटमभिव्यनक्ति। ततोऽर्थबोध इति व्यञ्जकध्वनिभेदानुपादेन पौर्वापर्यानुलभ्यमानः स्फोटः स्वरूपपर- रूपयोः प्रकाशको भवति। स्फोटस्य बुद्धिस्थत्वं ध्वनिव्यङ्ग्यत्वम्। तस्यैकत्वेऽपि घटध्वन्यभिव्यक्तिकाले न पदबोधकत्म्, तयोः भिन्नत्वात्। घटध्वन्यभिव्यक्तात् स्फोटात् घटरूपार्थस्य बोधः न तु पररूपार्थस्य। घटध्वन्याभिव्यक्तात् स्फोटात् घटरूपार्थस्यैव तादात्म्येन तत्रैव तच्छक्तेः स्वीकारात्। यथा जलगतं चन्द्रबिम्बं जलवृद्धौ वर्धते, जलह्रासे ह्रसति, जलचलने चलति, जलभेदे भिद्यते इत्येवं धर्मानुयायी भवति, न तु परमार्थतः चन्द्रस्य तथात्वम्। एवं परमार्थतो अक्रममपि

शब्दत्वं ध्वन्युपाध्यन्तर्भावात् भिन्न इव सञ्जायते। वस्तुतः स्फोटरूपस्य शब्दस्य अर्थप्रकाशत्वमिव स्वप्रकाशत्वमप्यस्ति। निर्विषयकस्य ज्ञानस्य भावात् ज्ञानं ज्ञेयपरतन्त्रम्। लोके भुज्यादि क्रियाबाधात् अर्थविशेषणतया व्याकरणे तु परत्वस्य प्रत्यये बाधात् अर्थविशेष्यतया शब्दस्य भानम्।

एवं वैयाकरणानां मते व्यञ्जकभूतस्य ध्वनेः अलङ्कारशास्त्रे अत्युत्तमं स्थानमस्ति। अत एवोच्यते काव्यस्यात्मा ध्वनिरिति। रमणीयार्थप्रतिपादकस्य काव्यस्य रमणीयत्वं व्यञ्जनाशक्त्या ध्वनिना वा सञ्जायते। ध्वनितत्त्वं न काव्यावयवरूपम्, अपि तु आत्मरूपेण वा प्रतितिष्ठति। आलङ्कारिकाः ध्वनेः मुख्यतया भेदद्वयं कल्प्यते। लक्षणामूलो ध्वनिः, अविवक्षितवाच्यध्वनिश्चेति। एवम् अभिधामूलो ध्वनिः, विवक्षितान्यपरवाच्य ध्वनिरिति च। ध्वनेरेतस्य असंख्यभेदात् काव्यस्य सूक्ष्मातिसूक्ष्माः सर्वा अपि आत्मसाक्षात्करोतीत्यतः उच्यते काव्यस्यात्मा ध्वनिरिति। एतेनात्र एवमुक्त्वा अतिविस्तरभयाद् उपसंह्रियते॥

# ध्वनेरर्थविचारः

**डा. सि. शान्ता, साहित्यविभागः**

साहित्यशास्त्रे बहवः सम्प्रदायाः प्रचलिताः। तेषु ध्वनिसम्प्रदायस्य प्रवर्तको आनन्दवर्धनः, तन्मते काव्यस्यात्मा ध्वनिः। रसो न वाच्य इति साधयितुं प्रवर्तमानः सः ध्वनेरावश्यकतामनुभूय ध्वनिसम्प्रदायं प्रवर्तितवान्। आनन्दवर्धनात्पूर्वं ध्वनेरभाववादः, लक्षणास्वरूपतावादः, अनिर्वाच्यतावादश्च प्रथते स्म। आनन्दवर्धनाचार्येण ध्वनिवादः सर्वाधिकव्यवस्थितरूपेण प्रचारितः। ध्वन्यालोके त्रयोऽशाः सन्ति - कारिकाः, वृत्तयः, उदाहरणानि च। चतुर्षूद्योतेषु विभक्तेऽत्र ग्रन्थे प्रथमोद्योते ध्वनिविरोधिमतालोचना तत्स्थापना च, द्वितीयतृतीययोरुद्योतयोः ध्वनिप्रकाराः, चतुर्थे ध्वनेरुपयोगिता च निरूपिताः। अलङ्कारशास्त्रे तादृशी पूज्यता अस्य यादृशी पाणिनेर्व्याकरणे बादरायणस्य वा वेदान्ते।

ध्वनिसिद्धान्तोऽयमतिगहनोऽपि परमरमणीयः। पुनश्चायमतिगभीरोऽपि सर्वसहृदयहृदयानन्ददायक इति राजशेखरादीनामाचार्याणां सुचिन्तिताभिप्रायः। यथोक्तम्--

**ध्वनिनातिगभीरेण काव्यतत्वनिवेशिना।**
**आनन्दवर्धनः कस्य नासीदानन्दवर्धनः॥** (काव्यमीमांसा) इति।

लोकोत्तरवर्णनानिपुणकविकर्मणि यत्र ललितोचितसन्निवेशचारुशब्दार्थयुगलकाव्ये वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य चमत्कारातिशयेन सह प्राधान्यमनुभूयते तस्मिन्नेव काव्यविशेषे सर्वश्रेष्ठकाव्यत्वेन ध्वनिकाव्यमिति व्यपदिश्यते काव्यकोविदैः। यथोक्तंध्वनिप्रस्तावकपरमाचार्येण आनन्दवर्धनेन-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥**

(ध्वन्यालोकः 1-13) इति ।

एतल्लक्षणमुररीकृत्य मम्मटाचार्येणापि "इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः" (काव्यप्रकाशः 1-4) इति सूत्रितम्। कविराजविश्वनाथेनापि "वाच्यातिशायिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्" (साहित्यदर्पणः 4-1) इति सुस्पष्टमभिहितम्। नव्यन्यायशैल्या जगन्नाथपण्डितेन परिष्कृतमतमुपस्थापितम्,

यथा-"शब्दार्थौ यत्र गुणीकृतात्मानौ कमप्यर्थं व्यङ्क्तः तदाद्यम्" (रसगङ्गाधरः 1-2) इति।

**काव्यस्यात्मा ध्वनिः-**

अभिधा-लक्षणा-व्यापारानन्तरं व्यञ्जना वृत्तिः स्वीक्रियते। व्यञ्जनायाः प्राधान्येन काव्ये कल्पनायाश्चिन्तनस्यानुभूत्यादितत्वानां च समावेशोऽभूत्। कल्पनाया अभावे लक्षणाया व्यञ्जनाया वा प्रवृत्तिर्न प्रसरति। नानुभूतिं विना भावावेशः, भावावेशमन्तरेण न लक्षणा व्यञ्जना वा उद्भवति। व्यञ्जनाशक्तिः काव्ये प्रभविष्णुतां रमणीयतां रागात्मकतां च सन्निवेशयति। तदैव काव्ये रमणीयत्वं जायते।

"क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः"। (शिशुपालवधम् 4-17)

तादृशी रमणीयता काव्ये व्यञ्जनाशक्तेः ध्वनेर्वा संजायते। यथा रमणीशरीरे लावण्यम्, मेघे विद्युत्, चन्द्रमसि ज्योत्स्ना, उषसि ज्योतिर्वा अन्तर्निहिता, तथैव काव्ये ध्वनेरधिष्ठानम्। ध्वनितत्वं न काव्यस्यावयवरूपम्, अपि तु अवयविरूपेण आत्मरूपेण वा प्रतितिष्ठति।

अत एवोक्तम् आनन्दवर्धनाचार्येण-

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥**

(ध्वन्यालोकः 1-4)

काव्यशास्त्रे अभिधा लक्षणा व्यञ्जना चेति तिस्रो वृत्तयः स्वीक्रियन्ते। अभिधा वाच्यार्थप्रधाना, लक्षणा लक्ष्यार्थप्रधाना, व्यञ्जना व्यङ्ग्यार्थप्रधाना च। व्यञ्जनाशक्तेः स्वीकरणे ये दोषाः विविधैः शास्त्रज्ञैरुद्भाविताः, ते दोषा आनन्दवर्धनेन ध्वन्यालोके निरस्ताः। उक्तं च -

**मुख्यां वृत्तिं परित्यज्यगुणवृत्यार्थदर्शनम्।**
**यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः॥** (ध्वन्यालोकः 1-18)

तत्र हि चारुत्वातिशयविशिष्टार्थप्रकाशनलक्षणे प्रयोजने कर्तव्ये, यदि शब्दस्यामुख्यता तस्य प्रयोगे दुष्टतैव स्यात्। न चैवम्। तस्माद्

**वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता।**
**व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्॥** (ध्वन्यालोकः 1-19)

व्यञ्जनाशक्तेः स्वीकरणे ये दोषाः आनन्दवर्धनाचार्येण उद्भाविताः ते दोषाः मम्मटेनकाव्यप्रकाशेच निरस्ताः। उक्तं च-

**यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।**

**फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया॥** (काव्यप्रकाशः 2-14)

**नाभिधा समयाभावात्हेत्वभावान्न लक्षणा॥** (काव्यप्रकाशः 2-15)

अपि च, साहित्यदर्पणे विश्वनाथेनोक्तं -

**विरतास्वभिधाद्यासु ययार्थो बोध्यते परः।**

**सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥** (साहित्यदर्पणः2-12,13)

ध्वनिवादस्य महत्वस्य कारणमस्ति यदत्र सर्वेषामपि काव्यमूलतत्वानां रसालंकार- वक्रोक्त्यादीनां समावेशो भवति। अत्र रीतिवादवद् न केवलं पाण्डित्यप्रदर्शनम्, अपि तु चित्ताह्लादकत्वं चेतोविकासकत्वं च भवति। ध्वनिवादस्य रमणीयत्वं शब्दमूलकम्, अर्थमूलकम्, शब्दार्थोभयमूलकं च। ध्वनिः काव्ये ललनालावण्यवद् अपूर्वं रम्यत्वं प्रतीयमानमर्थं च द्योतयति। अत एवोच्यते - "ध्वनिरात्मा काव्यस्य" इति ।

**ध्वनेरर्थाः-**

ध्वनिसम्प्रदायेऽस्मिन् ध्वनिशब्दोऽयं न केवलं काव्यविशेषवाची, अपि तु पञ्चविधेष्वर्थेषु प्राप्तप्रसरोऽस्ति। यथा –

(1) ध्वनति यः सः व्यञ्जकः शब्दो ध्वनिः इति कर्तृव्युत्पत्या व्यञ्जके शब्दे ध्वनिव्यवहारः।

(2) ध्वनति ध्वनयति वा यः स व्यञ्जकोऽर्थः ध्वनिः इति तयेव कर्तृव्युत्पत्या ध्वनिः व्यञ्जकेऽर्थेऽपि व्यपदिश्यते।

(3) ध्वन्यते अनेन इति ध्वनिः इति करणव्युत्पत्या अथवा ध्वननं ध्वनिरिति भावव्युत्पत्या व्यञ्जनाव्यापारेऽपि ध्वनिः व्यवह्रियते।

(4) ध्वन्यते यः सः ध्वनिरित्यनया कर्मव्युत्पत्या रसवस्त्वलङ्कारादिरूपव्यङ्ग्यार्थे च ध्वनिः व्यवह्रियते।

(5) तथैव ध्वन्यतेऽस्मिन्निति ध्वनिरिति अधिकरणव्युत्पत्या काव्यविशेषे चैव ध्वनिव्यवहारः सम्भवतीति ध्वन्यालोकलोचनटीकाकाराभिनव गुप्ताचार्यस्याभिमतेनैव स्थिरीकृतो वर्तते।

एवं ध्वनिशब्देन व्यञ्जकशब्दस्य, व्यञ्जकार्थस्य, व्यञ्जनाव्यापारस्य, व्यङ्ग्यार्थस्य, व्यङ्ग्यप्रधानकाव्यस्य च ग्रहणं संजायते।न केवलं लोचनकारेण एव एतादृशो विवेचितो दृश्यते, अपि तु ध्वनिकारस्य ग्रन्थवैविध्यव्यवहारादपि तस्य ध्वनेः पञ्चविधत्वमवगम्यते। यथा -

1. **यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
   **व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥** (ध्वन्यालोकः 1-14)

अस्यां ध्वनिलक्षणकारिकायां **काव्यविशेषस्य** ध्वनित्वं तेनैव कण्ठतः एवाभिहितम् ।

2. **काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-**
   **स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।**
   **केचिद् वाचां स्थितमविषये तत्वमूचुस्तदीयं**
   **तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्॥** (ध्वन्यालोकः 1-2)

तथा-

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥** (ध्वन्यालोकः 1-6)

अत्र काव्यस्यात्मा ध्वनिरिति व्यवहारादथ च काव्यस्यात्मा स एवार्थः इत्यपि व्यवहाराद् "व्यङ्ग्यार्थो"ऽपि ध्वनिरिति तस्याभिप्रायोऽनुभूयते।

3. **भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।** (ध्वन्यालोकः 1-14)

इति भाक्तवादिनां मतखण्डनकारिकांशाद् "व्यञ्जना-व्यापारो"ऽपि ध्वनिरिति तस्याभिप्रायः ऊह्यते।

4. वृत्तिगतस्य - "सूरिभिः काव्यतत्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः" (ध्वन्यालोकः पृ. 74) इति व्यवहारादपि व्यञ्जकशब्दस्य ध्वनिरिति सत्यां संज्ञायां कण्ठतः एवाभिधानं व्यञ्जकशब्दस्य ध्वनित्वमेव प्रमाणयति।

5. अथ तुल्यन्यायेन व्यञ्जकार्थस्यापि ध्वनित्वमङ्गीक्रियते। एवं आनन्दवर्धनाचार्येण अभिनवगुप्ताचार्येण च पञ्चविघध्वन्यर्थाः प्रकटीकृताः।

# विघ्नस्तं मोहहानतः

**डा.बालमुरुगन्, न्यायविभागाध्यक्षः**

दर्शनेषु मध्ये वेदान्तदर्शनं निरतिशयं स्थानं बिभर्तीति विदितचरमेव विद्वत्तल्लजानाम्। जीवः ब्रह्मैव नापरः इति वेदान्तिनां सिद्धान्तः । प्रपञ्चे विद्यमानानां समेषां पदार्थानां उपादानकारणं (मूलकारणं) भवति ईश्वरस्य उपाधिभूतमूलाविद्या। मूलाविद्यायाः नाशेन मोक्षः संपद्यते, मूलाज्ञाननाशं प्रति तत्वमस्यादिमहावाक्यजन्यः अखण्डसाक्षात्कारः हेतुःइति वेदान्तपन्थाः । वेदान्तशास्त्रं श्रुतिप्रस्थानं, स्मृतिप्रस्थानं, सूत्रप्रस्थानमिति त्रिधा विभक्तं वर्तते। तत्र स्मृतिप्रस्थानमिति नाम्ना विश्रुतायां श्रीमद्भगवद्गीतायां द्वितीयाध्याये ऊनत्रिंशतः श्लोकस्य विवरणसन्दर्भे अखण्ड-साक्षात्कारेण मूलाविद्यानाशोत्पत्तिं विशेषप्रकारेण वर्णयामासुः गीतायाः गूढार्थ-दीपिकानामकव्याख्याकाराः श्रीमधुसूदनसरस्वतीस्वामिपादाः। स्वयं प्रतिपादितस्य विशेषार्थस्य उपोद्बलकतया बृहदारण्यकोपनिषदः श्रीशङ्करभगवत्पादभाष्यस्य विवरणभूतं श्रीसुरेश्वराचार्याणां वार्तिकमपि तेऽनूदितवन्तः। अनूदितवार्तिकस्यार्थनिर्णये स्थूलतयावलोकने काचनानुपपत्तिः समुन्मिषति, तस्याः अनुपपत्तेः परिहाराय प्रबन्धेऽस्मिन् प्रत्यनमहं समाश्रितवान्।

गूढार्थदीपिकावैशिष्ट्यम् : गीतायाः असंख्यव्याख्यानेषु सत्स्वपि श्रीमधुसूदन सरस्वतीस्वामिपादैः रमणीयशैल्या विरचिता न्यायपरिष्कारैश्च घटिता विशदविवरण-रूपा गूढार्थदीपिका गीताविवरणमण्डले पूर्णेन्दुरिव जाज्वलति। तस्मादेव विद्वज्जनैः महता आदरेण समाद्रियमाणेयं वर्तते। श्रीशङ्करभगवत्पादानां गीताभाष्याधारेणैव एभिः इयं व्याख्या संरचितेति मङ्गलश्लोकेनैवावगम्यते। यथा

"भगवत्पादभाष्यार्थमालोच्यातिप्रयत्नतः
प्रायः प्रत्यक्षरं कुर्वे गीतागूढार्थदीपिकाम् ॥" इति

(गूढार्थदीपिका - प्रथमाध्यायः 1 श्लोकः)

"आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद् वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः श्रृणोति श्रुत्वाप्येनं वेद नैव कश्चित् ॥" इति ॥

(गीता द्वितीयोध्यायः - 29 श्लोकः।)

कश्चिद् एनं आश्चर्यवत् पश्यति। तथैव चान्यःइत्यत्र चकारेण एनमित्यनुकर्षणम्। तथा

च अन्यः तथैव एनं वदति, अन्यः एनं आश्चर्यवच्च श्रृणोति । कश्चित् नैव एनं श्रुत्वापि वेद इत्यन्वयः अत्र विवक्षितः। आश्चर्येण (अद्भुतेन) तुल्यं आश्चर्यवत्। अथवा आश्चर्येण तुल्यतया वर्तमानमाश्चर्यवत्। स्थूलतयाऽवलोकने श्लोके सर्वत्र क्रियापदेनैवाश्चर्यपदस्य समभिव्याहाराद् धात्वर्थे (क्रियायां) एव आश्चर्यवदिति विशेषणमिति भाति। परन्तु श्रीमधुसूदनसरस्वतीस्वामिपादाः क्रियायां कर्मणि तथा कर्तरि चेति त्रिषु पदार्थेषु आश्चर्यवदिति विशेषणमिति व्यवास्थापयन् यद्यपि "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" (तैत्तरीयोपनिषद् – 2) इति श्रुतिबलाद् ज्ञायते शुद्धः आत्मा (परब्रह्म) कस्यापि शब्दस्य वाच्यः न भवतीति। तथापि तत्त्वमस्यादि महावाक्यघटकतत्पदेन विशिष्टशक्तेन (तत्पदं सर्वज्ञत्वादिविशिष्टेश्वरे शक्तं भवति।) जहदजहत्स्वार्थलक्षणया शक्यतावच्छेदकविनिर्मोकेण शुद्धचैतन्यस्वरूपमात्रोपस्थितिः जायते। ततः शब्दादपि अपरोक्षं ज्ञानं भवतीति वेदान्तिनां वादः प्रसिद्धःइति महावाक्येनैव पूर्वोक्तोपस्थितिसहकृतेन चैतन्यस्वरूपमात्रावगाहि निर्विकल्पक-साक्षात्कारः जायते। स एव अविद्याघातकः भवति। एतदनु श्रीमधुसूदन-सरस्वतीस्वामिपादाः पूर्वोक्तश्रुतिबलाद् महावाक्येन शकिं्त लक्षणां संबन्धान्तरञ्च विना शुद्धस्वरूपसाक्षात्कारः भवितुमर्हतीति विशेषप्रकारं वर्णयामासुः। तत्र दृष्टान्तः सुषुप्त्यवस्थायां मग्नस्य उत्थापकं वाक्यं भवति। यथा सुषुप्तः स्वस्य उत्थापकवाक्याद् शक्त्यादिवृत्या नार्थं अवगच्छति, किन्तु शब्देन स्वरूपमात्रं प्रबुध्य उत्तिष्ठति तथा प्रकृतेऽपि महावाक्येन लक्षणाजन्योपस्थितिं विना अखण्डसाक्षात्कारः भवति।

तत्राक्षेपः। शक्त्यादि संबंधं विना शब्देन बोधजनने अस्य शब्दस्य अयमेव वाच्यार्थः अयं नेति व्यवस्था न स्यात्। एकेन शब्देन सर्वार्थबोधापत्तिः इति। तत्र समाधानम्- लक्षणास्वीकारेपि शक्यसंबन्धरूपायाः लक्षणायाः अनेकेषु सत्वात् अव्यवस्थादोषः (एकेन शब्देन लक्षणया सर्वार्थबोधापत्तिः दोषः) समानः। वक्तुः तात्पर्यं लक्षणापक्षे अव्यवस्थादोषवारकं भवतीत्यपि न उचितम्। यतः एकः श्रोता प्रकरणादिना एकस्मिन्नर्थे वक्तृतात्पर्यं अवधारयति, अन्यः अन्यस्मिन्नर्थे इति अव्यवस्था वर्तते एव। यदि कश्चिदेव पुरुषविशेषः (श्रोता) तात्पर्यं अवधारयति न सर्वः पुमानिति चेत् तदा पुरुषगतः (श्रोतृगतः) निर्दोषत्वरूपः गुणः एव लक्षणापक्षे नियामकः (अव्यवस्थादोषपरिहारकः) इति वाच्यम्। अत्रापि महावाक्यश्रोतरि

निर्गतनिखिलमलत्वं नितान्तविशुद्धस्वान्तत्वं वा विशेषगुणः नियामकः अक्षतःइति विनापि पदार्थसंबन्धं अखण्डसाक्षात्कारं प्राप्स्यतीति कानुपपत्तिः। अत एवोक्तं तैरेव मङ्गलश्लोकेषु "साक्षात्कारो निर्विकल्पः शब्दादेवोपजायते"इति। शुद्धस्य शब्दवृत्ति-विषयत्वस्वीकारे लक्षणापक्षे श्रुतिविरोधदोषः प्रसज्यते। एतेषां पक्षे तु श्रुत्यनुग्रहः एवेति श्रीमधुसूदनसरस्वतीस्वामिपादानां पक्षः एव श्रेयान् भाति। अत्रैव स्वोक्तावुपष्टं-भकतया श्रीसुरेश्वराचार्याणां वार्तिकमनूदितवन्तः। तदेवं वर्तते

"शब्दशक्तेरचिन्त्यत्वाद्विद्मस्तं मोहहानतः।
अगृहीत्वैव संबन्धमभिधानाभिधेययोः।
हित्वा निद्रां प्रबुध्यन्ते सुषुप्तेः बोधिताः परैः॥
जाग्रद्वन्न यतः शब्दं सुषुप्तौ वेत्ति कश्चन।
ध्वस्तेऽतो ज्ञानतः अज्ञाने ब्राह्मास्मीति भवेत् फलम्॥
अविद्याघातिनः शब्दाद् याहं ब्रह्मेति धीः भवेत्।
नश्यत्यविद्यया सार्धं हत्वा रोगमिवौषधम्॥"

(बृहदारण्यकोपनिषत् श्रीशाङ्करभाष्यविवरणभूतं वार्तिकम्।)

वार्तिकार्थविवरणम्। विद्मस्तं मोहहानतः इति। विद्मःइत्यत्र धात्वर्थः वेदनं - अखण्डाकारवृत्तिः। तं - स्वप्रकाशचैतन्यं, द्वितियार्थः विषयत्वं, तस्य वेदनेऽन्वयः। मोहः- अविद्या, हानं-नाशः। मोहहानतःइति पञ्चमीस्थानापन्नतसिलः प्रयोजकत्वमर्थः। तथा च मूलाज्ञाननाशप्रयोजिकां शुद्धस्वरूपविषयकाखण्डाकारवृत्तिं महावाक्येन प्राप्नुमः इत्यर्थः। अत्रैवं शङ्का भवति यत् यथा धूमाद् वह्निमान् पर्वतःइत्यत्र धूमनिष्ठं वह्निज्ञानप्रयोजकत्वमेव प्रतीयते तथाऽत्रापि तसिला प्रकृत्यर्थनिष्ठ-प्रयोजकत्वमेव बोधयितुं शक्यते न तु प्रकृत्यर्थनिरूपितं प्रयोजकत्वं, ततः वार्तिकेन विवक्षितार्थसिद्धिः न भवति, किन्तु विपरीतार्थः एव प्रतीयेत इति चेद् सत्यं मोहहानतःइत्यत्र न तसिल् किन्तु सार्वविभक्तिकः तसिः। तथा च मोहहानाय इत्यर्थे मोहहानतःइति प्रयुक्तम्। मोहहानाय इत्यत्र तुमर्थाच्च भाववचनादित्यनेन (2/3/15) अनुशिष्टा चतुर्थी भवति। तत्सूत्रार्थः एवं वर्तते तुमुन्प्रत्ययसमानार्थकाद् भाववचनात् तुमुन्नर्थे चतुर्थी भवति इति। तेन यथा भोक्तुं व्रजतीति प्रयुज्यते तथा भोजनाय व्रजतीत्यपि प्रयोक्तुं शक्यते। तत्र चतुर्थ्याः प्रकृत्यर्थनिरूपितं प्रयोजकत्वमेवार्थः। ततः

भोजनप्रयोजकं गमनमिति बोधः भवति। तादृशचतुर्थीस्थानापन्नतसेः अपि प्रकृत्यर्थनिरूपितप्रयोजकत्वमेवार्थः। तथा च मोहहानप्रयोजकं वेदनं इति वार्तिकारैः विवक्षितः बोधः एव मोहहानतः विघ्नःइत्यत्रापि भवतीति न कश्चिद् दोषः।

"अविद्याघातिनः शब्दाद्" इत्यत्र घातिनःइति शब्दस्य (महावाक्यस्य) विशेषणं भवति। तथाहि ज्ञानाज्ञानयोः परस्परं विरुद्धयोः एकदा एकत्रासंभवात् ब्रह्म न जानामीति प्रत्ययगोचरस्य भावरूपस्य अज्ञानस्य (मूलाविद्यायाः) अखण्डाकारवृत्युत्पपत्तिकाले एव महावाक्येन नाशः जायते। तस्मादेव अविद्यानाशकाद् शब्दादित्युक्तम्। उपादानव्यतिरेकेणापि क्षणं वृत्तेः अवस्थानं नैयायिकानां मते यथा समवायिहेतुनाशाधीनस्य कार्यनाशस्य उत्पत्तिस्थले इव संभवति।

वार्तिकार्थनिर्णये अनुपपत्तिप्रदर्शनम् । "याऽहं ब्रह्मेति धीः भवेत्। नश्यति अविद्यया सार्धं हत्वा रोगमिवौषधम् ॥"इत्यत्र कश्चन विरोधः वर्तते। सार्धमित्यस्य सह इत्यर्थः। तथा च अहं ब्रह्मेति बुद्धिः मूलाविद्यया सह नश्यतीति बोधः अत्र विवक्षितःइति भाति। स चासङ्गतः। यतः यदि एकस्मिन्नेव क्षणे क्रियाद्वयं भवति तदा एव सहशब्दस्य प्रयोगः प्रामाणिकः वर्तते। यथा पुत्रेण सह गच्छति पिता इत्यत्र पुत्रस्य गमनक्षणे एव पितरि गमनक्रिया वर्तते। अत एव तथा प्रयुज्यते। एवं यदि विलम्बेन क्रिययोः उत्पत्तौ अपि तथा प्रयोगः स्यात् तदा पूर्वदिने घटः नष्टःद्वितीयदिने पटः नष्टः तत्रापि घटेन सह पटः नश्यतीति प्रयोगापतिः। प्रकृते अविद्यानाशस्य उत्पत्तेः अनन्तरक्षणे एव अखण्डाकारवृतिः नश्यति कारणनाशात् कार्यनाशःइति न्यायेन। नैकस्मिन् क्षणे उभयोः नाशः जायते। तस्मात् कथं वार्तिककारैः"नश्यति अविद्यया सार्धं"इति प्रयुक्तम्।

**वार्तिकार्थनिर्णये अनुपपत्तिपरिहारः -**

प्रथमतः अविद्यावृत्योः एकस्मिन् श्रणे नाशः संभवति वा इति विचारयामः। कस्मिन् क्षणे उभयोः नाशः विवक्षितः वृत्युत्पत्तिक्षणे वा तद्द्वितीयक्षणे वा। न प्रथमः । वृत्तिप्रभवक्षणे नैव वृत्तेः नाशः संभवति। तर्हि द्वितीयक्षणे एव उभयोः नाशः भवति इति चेन्न। तत्क्षणे वृत्तिनाशं प्रति पूर्वक्षणे कारणं किञ्चिद् वाच्यम् । न हि शब्दः (महावाक्यम्) नाशकः भवितुमर्हति। महावाक्यमेव वृत्तेः कारणं भवति। तस्माद्

जनकः एव यदि नाशकः स्यात् तदा उत्पत्तिरेव न स्यात् । जनकत्वनाशकत्वयोः परस्परं विरुद्धत्वात्। तस्मात् सहभावस्य अन्यत्र एकक्षणोत्पत्तिकत्वेपि अत्र असंभवात् न तादृशसहभावः विवक्षितः, किन्तु समानकालः एव। यथा अतितीक्ष्णा इयं सूची एकक्षणे शतपत्रपत्रशतं भिनत्तीति प्रयुज्यते। न हि तीक्ष्णसूची एकक्षणे शतं पत्राणि भिनति। किन्तु प्रथमक्षणे प्रथमपत्रं भित्वा ततः द्वितीयक्षणे द्वितीयं इति क्रमशः एव। यथा तत्र सूक्ष्मकालभेदं अनाकलय्य तथा प्रयुज्यते एवं अत्रापि शब्देन वृत्या वा अविद्यानाशः प्रथमक्षणे जायते, ततः कारणनाशात् कार्यनाशःइति न्यायेन द्वितीयक्षणे वृत्तिनाशः भवति। अतः द्वयोः नाशयोः एकमात्रक्षणेन व्यवधानोत्पत्तौ अपि क्षणभेदं अपरिलक्ष्य 'नश्यति अविद्यया सार्धं" इति प्रयुक्तम्। तदा एव हत्वा रोगमिवौषधमिति दृष्टान्तोपि सङ्गच्छते। यथा औषधं रोगं हत्वा (रोगनाशोत्तरकालं) नश्यति तथा वृत्तिरपि अविद्यां नाशयित्वा नश्यतीति भावः।

अत्रैव द्वितीयं समाधानम्। अथवा यथा परस्परविरुद्धज्ञानयोः क्षणमेकं सहावस्थानं नैयायिकाः संभवतीति स्वीकुर्वन्ति। तथाहि शङ्खः न पीतःइति प्रत्यक्षोत्पत्तिक्षणे एव यत्र शंखः पीतःइति प्रत्यक्षस्य सामग्री अपि उत्पन्ना तदा तत्र द्वितीयक्षणे विरुद्धयोः प्रत्यक्षयोः सहावस्थानमिव प्रकृते ज्ञानाज्ञानयोः वृत्युत्पत्तिक्षणे सहावस्थानं संभवति। तद्द्वितीयक्षणे वृत्या वृत्यविद्यायोः नाशः संभवति। अत एव ज्ञानं अज्ञानस्य नाशकमिति उद्घोषः संगच्छते। एतत्पक्षे वृत्तिनाशकः कःइति विचार्यते। अन्यस्य नाशकस्य विरहात् कार्यत्वेन नाशावश्यंभावात् वृत्तिनाशः वृत्तिजनकशब्दजन्यः शब्देतराजन्यत्वेसति जन्यत्वात् इत्यनुमानेन शब्दः एव तन्नाशकःइति अनुमीयते। न च जनकत्वनाशकत्वे विरुद्धे इति शङ्क्यम् । रूपभेदेन तयोरेकत्रसंभवात्। तथाहि शब्दनिष्ठवृत्तिनाशकता तन्निष्ठवृत्तिजनकतावकच्छेदकातिरिक्तधर्म्मावच्छिन्ना तद्विरुद्धत्वेन प्रतीयमाननिरूपितजनकतात्वादित्यनेन तयोः तत्र संसाधनं संभवति। शब्दनिष्ठमहावाक्यत्वं वृत्तिजनकतावच्छेकं, विशेषणतया वृत्युपहितशब्दत्वं वृत्तिनाशकतावच्छेदकं च भवति।

तृतीयं समाधानम् अथवा यथा नैयायिकमते अन्त्यशब्दः स्वयमेव स्वस्य नाशकः तथा अखण्डसाक्षात्कारोपि स्वमेव स्वस्य नाशकः भवति। तथास्वीकारे न कोपि दोषः प्रसज्यते। अस्मिन् तृतीयपक्षे कार्यकारणभावे लाघवमपि वर्तते। तथाहि

दृश्यत्वावच्छिन्ननाशं प्रति अखण्डसाक्षात्कारः कारणमिति एकः एव कार्यकारणभावः कल्पयितुं शक्यते। पूर्वमते न तथा। इदानीं अविद्याघातिनःइत्यस्य स्वजन्यवृत्तिद्वारा अविद्यानाशकादित्यर्थः वक्तव्यःइति सर्वं सूपपन्नम्।

**उपसंहारः** - मोक्षोपायप्रतिपादनाय प्रवृत्तेषु शास्त्रेषु मध्ये वेदान्तेन प्रतिपाद्यः मार्गः सर्वोत्कृष्टःइति विपश्चितां अभिप्रायः। स्वरूपानान्दप्राप्तिरेव मोक्षः, तत्र महावाक्यजन्याखण्डसाक्षात्कारः हेतुरिति वेदान्तसिद्धान्तः। महावाक्येन लक्षणया चरमसाक्षात्कारः जायते इति एकः पक्षः, तन्निरपेक्षेण शब्दादेव तज्जायते इति अन्यः पक्षः। श्रीमद्भगवद्गीतायाः गूढार्थदीपिकाकाराः श्रीमधुसूदनसरस्वतीस्वामिपादाः द्वितीयं पक्षं वार्तिकसाहाय्येन द्वितीयाध्याये स्थापयामासुः । तमेवांशं अस्मिन् प्रबन्धे सयुक्तिकं अहं वर्णितवान्। इति शम्।

**सर्वं श्रीसाम्बशिवार्पणमस्तु**

**प्रबन्धनिर्माणार्थं परामृष्टानां ग्रन्थानां सूची -**


1. श्रीमद्भगवद्गीता
2. श्रीमद्भगवद्गीताशाङ्करभाष्यम् ।
3. तैत्तरीयोपनिषद् ।
4. बृहदारण्यकोपनिषद्भाष्यवार्तिकम्।
5. श्रीमधुसूदनसरस्वतीस्वामिपादानां गूढार्थदीपिका।
6. श्रीधर्मदत्तझाशर्मणां गूढार्थतत्वालोकः । (गूढार्थदीपिका व्याख्या)
7. न्यायसिद्धान्तमुक्तावली
8. वैयाकरणसिद्धान्तकौमुदी ।

# तन्त्रयुक्तयः आधुनिकानुसन्धानञ्च

**डा. के. के. षैनू, शिक्षाशास्त्रविभागाध्यक्षः**

समस्यानां समाधानप्राप्त्यर्थं वैज्ञानिकविधीनामुपयोगः अनुसन्धानमित्यभिधीयते। अतः अस्य वैज्ञानिकविधिः इत्यपि अपरं नाम। नूतनं ज्ञानं नूतनात् सिद्धान्तांश्च प्रतिष्ठापयितुम्, आविष्कर्तुञ्च क्रमे कृतरूपेण वैज्ञानिकविधिविश्लेषणप्रक्रिया अनुसन्धानमनुमन्यते। अनुसन्धानं वस्तुनिष्ठं, पक्षपातरहितं, प्रयोगाधारितं, तार्किकविश्लेषणयुतं, नियन्त्रितरूपेण निरीक्षितञ्च भवति येन नूतनाविष्कृततथ्यानां सिद्धातान्ञ्च सामान्यीकरणं जायते। उपयुक्तस्य आधुनिकानुसन्धानसिद्धान्तस्य विषयविशेषाः प्राचीनभारतेऽपि आसन्निति बहूनां महद्ग्रन्थानां परिशीलनेन ज्ञातुं शक्यते। प्राचीन भारते प्रवृत्तस्य निरन्तरानुसन्धानस्य परिणामो भवति विभिन्नानां शास्त्राणां विकासः। वृत्तिः, भाष्यं, टीका, व्याख्या, पूर्वपक्षखण्डनपुरस्सरं स्वपक्षोपस्थापनमपि सर्वमपि प्राक्कालिकानुसन्धानप्रक्रियायाः अंशाः भवन्ति।

प्राचीनकाले अनुसन्धानस्य सुष्ठुः निष्पादनाय तन्त्रयुक्तयः उपयुक्ताः दृश्यन्ते। कौटिल्यार्थशास्त्रे, चरकसंहितादि ग्रन्थेषु तन्त्रयुक्तयः परामृष्टाः। अर्थशास्त्रे द्वित्रिंशत् तन्त्रयुक्तीनां विवरणं दृश्यते। तद्यथा- अधिकरणं, विधानं, योगः, पदार्थः, हेत्वर्थः, उद्धेशनिर्देशः, उपदेशः, अपदेशः, प्रदेशः, उपमानं, अर्थापत्तिः, संशयः, प्रसङ्गः, विपर्ययः, वाक्यदोषः, अनुमतं, व्याख्यानं, निर्वचनं, अपवर्गः स्वसंज्ञा, पूर्वपक्षः, उत्तरपक्षः, एकान्तः, अनागतावेक्षणं, अतिक्रान्तावेक्षणं, नियोगः, विकल्पः, समुच्चयः, उह्यमिति। अत्र तन्त्रमिति विज्ञानार्थे प्रयुक्तम्। वैज्ञानिकीयुक्तिरिति अत्र अर्थो विवक्षते। एतासां तन्त्रयुक्तीनां परिशीलनेन प्राचीनभारते अनुसन्धानसिद्धान्ताः गहनरूपेण कथमनुवर्तिता इति अभिज्ञातुं शक्यते। एतासु युक्तिषु कतुचन आधुनिकानुसन्धानेऽपि प्रयोज्यकराः इत्यतः तासां विवृतिरत्र विधीयते।

प्रयोजनम् – प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते इति न्यायाद् अस्य प्राधान्यं शास्त्रेषु वरीवर्ति। आधुनिकानुसन्धानेपि प्रयोजनस्य महत् प्राधान्यं प्रदत्तं दृश्यते।

**प्रयोजनं नाम यदर्थं कामयमानः प्रवर्तते** (चरकसंहिता पृ.1030)

**प्रयोजनं नाम यदर्थं शास्त्रादिप्रवर्तते** (अष्टाङ्गहृदयम् – पृ.582)

प्रयोजनोपस्थापनेन विषयस्य प्रकृतिः कथं वर्तते इति ज्ञायते। अनेन अनुसन्धानस्य सीमानिर्धारणमपि कर्तुं शक्यते।

आधुनिकसंस्कृतानुसन्धानेषु प्रयोजनोद्देश्यादिनामुपस्थापनं प्रायः नावलोक्यते। किन्तु प्राचीनैरपि प्रयोजनचिन्तनस्य महत्त्वं परिकल्पितमित्यतः आधुनिके कालेपि तस्यानुवर्तनं कार्यमेव।

**अतिक्रान्तावेक्षणम्-** पुरस्तादेवं विहितमिति अतिक्रान्ताक्षणम् (अर्थशास्त्रम् पृ.461)। अतीतावेक्षणं नाम- यदीतमेवोच्यते (चरकसंहिता-2, पृ.1031)। यत्पूर्वमुक्तं तदतिक्रान्तावेक्षणम् (शुश्रुतसंहिता, पृ.856), अनुसन्धानात् प्राक् अनुसन्धात्रा अनुसन्धेयसमस्या (विषयम्) अधिकृत्य कतिविधानुसन्धानानि इतः प्राक् जातानि इत्यस्मिन् विषये ज्ञानमवाप्तव्यमस्ति। आधुनिकानुसन्धानप्रक्रियायामस्य सम्बन्धसाहित्याध्ययनमिति उच्यते। प्रस्तुतविषये पूर्वकृतानुसन्धानम् अभिज्ञानानन्तरमेव नूतनसिद्धान्तानाम् उपस्थापनमुचितं वर्तते। प्राचीनैः आचार्यैः सदा अस्या अनुपालनं विहितं दृश्यते। अतिक्रान्तस्यावेक्षणेन पूर्वतनवर्तमानज्ञानयोः सम्बन्धस्थापनं विधीयते। येन पठित्रा विषयगाम्भीर्यमवगम्यते अपि पुनरुक्तिदोषोऽपि नवार्यते। तथा हि-

तत्राद्यस्योदाहरणं प्राक् प्रदर्शितमेव (ध्वन्यालोकः, पृ.204)

प्रतीयमानो ह्यर्थभेदः प्राक्प्रदर्शितः (ध्वन्यालोकः पृ.546)

सगुणौ शब्दार्थौ काव्यमित्युक्तम् (काव्यानुशासनम् पृ.232)

शब्दार्थौ सालङ्कारौ काव्यमित्युक्तम् (काव्यानुशासनम् पृ.246)

इत्येवं काव्यशास्त्रकाराः बहुत्र अतिक्रान्तावेक्षणं विधायैव स्वमतस्थापनमकार्षुरिति ज्ञायते।

अधिकरणम् – प्राचीनैरुक्तासु तन्त्रयुक्तिषु महत्त्वपूर्णा युक्तिर्भवति अधिकरणम्। अनुसन्धानस्य विविधेषु पक्षेषु परिशीलितेषु अधिकरणे सर्वमपि अन्तर्भवतीति ज्ञायते। यथोक्तं भिक्षुगौरीशङ्करेण सर्वतन्त्रसिद्धान्तपदार्थलक्षणसङ्ग्रहे –

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेधिकरणं स्मृतम्॥

अनुसन्धाने सर्वेपि उपयुक्तांशाः अन्तर्भवन्ति। विषयोपस्थापनं संशयनिवारणं पूर्वपक्षस्थापनं उत्तरपक्षप्रतिष्ठापनमन्ते निर्णयश्चेति समस्तविषयाः अनुसन्धानगता एव।

विधानम् – विषयाणां क्रमीकृतरूपेण उपस्थापनं विधानमुच्यते। प्राचीनकाले ग्रन्थग्रथनप्रसङ्गे आचार्यैः युक्तिरियं प्रयुक्ता दृश्यते। तथा हि –

**शास्त्रस्य प्रकरणानुपूर्वी विधानम्** (अर्थशास्त्रम् पृ.457)

**प्रकरणानुपूर्व्याभिहितं विधानम्** (शुश्रुतसंहिता पृ.859)

आधुनिकानुसन्धानसिद्धान्तेष्वपि विषयोपस्थापनस्य क्रमस्य प्राधान्यं वरीवर्ति। येन विषयस्य स्पष्टता जायते।

**अनागतावेक्षणम्** – यत् न आगतं वर्तते अर्थात् आगमिष्यमाणस्य अवेक्षणं भवति अनागतावेक्षणम्। आचार्यैरस्य विवरणमित्थं कृतं दृश्यते। तथा हि –

**पश्चादेवं विहितमित्यनागतावेक्षणम्** (अर्थशास्त्रम् पृ.461)

**एवं वक्ष्यतीत्यनागतावेक्षणम्** (शुश्रुतसंहिता पृ.859)

**भवेदनगतापेक्षा भावितार्थप्रदर्शनम्** (तन्त्रयुक्तिविचारः पृ.26)

इत्येवं प्रकारेण परिशीलिते सति इदमवगम्यते यदेषा युक्तिः आधुनिकानुसन्धाने उपयुज्यमाना प्राक्कल्पना एवेति। प्राक्कल्पनायां करिष्यमाणानुसन्धानस्य रूपरेखा निर्मीयते, यस्याः आधारेणैव अनुसन्धानमग्रे प्रवर्तते। प्राचीनेषु वैज्ञानिकानुसन्धानविषयकज्ञानं कीदृशमासीदित्यनेनाभिज्ञायते।

**व्याख्यानम्** – प्राचीनोक्तयुक्तिष्वन्यतमा युक्तिः अतिप्रमुखा च व्याख्यानतन्त्र-युक्तिर्भवति। विषयस्य विस्तृतं विश्लेषणं व्याख्यानं वर्तते। तदुक्तम् –

**अतिशयवर्णना व्याख्यानम्** (अर्थशास्त्रम् – पृ. 460)

**व्याख्यानं नाम यत् सर्वबुद्ध्यविषयं व्याक्रियते** (चरकसंहिता – पृ.1031)

**व्याख्यानमात्मनोक्तानामात्मनैवार्थभाषणम्** (तन्त्रयुक्तिविचारः पृ.25)

आधुनिके अनुसन्धानेपि व्याख्यानस्य महत्प्राधान्यं वरीवृत्यते। प्राचीनैरुक्ताः बह्व्यः युक्तयः व्याख्याने अन्तर्भाव्य विचारयामश्चेत् आधुनिकसंस्कृतानुसन्धानं कथं विधातव्यमिति अवगम्यते। अतः व्याख्यानान्तर्भाव्यानां युक्तीनां विवरणमत्र प्रदीयते।

1.अनुमतम् 2.अपदेशः 3.पूर्वपक्षः 4.उत्तरपक्षः 5.उपदेशः 6.निर्देशः

अनुमतम् – **परवाक्यमप्रतिषिद्धमनुमतम्** इति कौटिल्यार्थशास्त्रे अनुमतं नाम एकीयमतस्यानिवारणेनानुमतम् इति चरकसंहितायां परमतमप्रतिषिद्धमनुमतमिति शुश्रुतसंहितायाञ्च प्रतिपादितं दृश्यते। अनुसन्धानेपि इदमवधातव्यमस्ति यदन्येषां मतं

यदि साधु वर्तते तर्हि तदनुपालनीयमिति। प्राचीनकालेपि केवलं खण्डनाय खण्डनं न क्रियते स्म। खण्डनाय यदि प्रमाणं वर्तते तदैव खण्डनं विधीयते स्म। परमतं यदि साधु भवति तर्हि तस्याङ्गीकारे न कोपि संकोचः क्रियते स्म।

अपदेशः – एवमसावाहेत्यपदेशः – अर्थशास्त्रम् पृ.458

अपदेशो नाम यत्प्रतिज्ञातार्थसाधनाय हेतुवचनम् (चरकसंहिता – पृ.1030)

अन्येषां मतानामङ्गीकारं विधाय स्वमतस्थापनं कश्चिदुत्तमः मार्गः अनुसन्धाने। अत्र कार्यकारणसम्बन्धस्थापनेन सत्यापनं जायते।

पूर्वपक्षः उत्तरपक्षश्च – उत्तरपक्षेन खण्डयितुं पूर्वपक्ष उपस्थाप्यते। तदुक्तं कौटिल्यार्थशास्त्रे – **प्रतिषेद्धव्यं वाक्यं पूर्वपक्षः** अपि च **पूर्वपक्षो नाम प्रतिज्ञातार्थसंदूषकं वाक्य**मिति चरकसंहितायाम्।

उत्तरपक्षस्तु **तस्य निर्णयवाक्यमुत्तरपक्षः** इति अर्थशास्त्रे। अर्थाद् अनुसन्धानं सर्वदा पूर्वपक्षखण्डनपुरस्सरमुत्तरपक्षस्य संस्थापनयुक्तं भवेदिति आचार्यमतम्। भारते समस्तस्यापि वाङ्मयस्य विकासः पूर्वपक्षखण्डनउत्तरपक्षप्रतिष्ठापनेन जात इति निश्चप्रचम्। अनुसन्धानेपि मार्गोयमनुवर्तनीयः। अनुसन्धाने अतिक्रान्तावेक्षणमस्य साह्यमाचरति।

उपदेशः – एवमित्युपदेशः (शुश्रुतसंहिता पृ.858)

उपदेशो नाम आप्तवचनम् (अष्टाङ्गहृदयम् पृ.582)

इत्थं कुर्यादित्थं न कुर्यादित्यादिउपदेशः प्राचीनानामाप्तवचनभवति यदाप्तानामित्यतः सर्वथा अङ्गीकार्य एव। अनुसन्धानक्षेत्रेपि कार्याकार्यविषयकप्रसङ्गाः आगच्छन्त्येव। आधुनिकानुसन्धानेपि कतिचन नियमाः आप्तानां वाक्यत्वेनाङ्गीक्रियते। सांख्यिक्याधारितानुसन्धाने (quantitive research) अस्य प्राधान्यं वरीवर्ति। अनुसन्धानकरणाय कांश्चन नियमानवश्यं पालयेत् गवेषक इति प्राचीनकालेपि आसीदिति अनेन ज्ञायते।

निर्देशः – विस्तारपूर्वककथनं निर्देश उच्यते। यदुक्तं अर्थशास्त्रकारेण – व्यासवाक्यं निर्देशः अपि च शुश्रुतसंहितायाः विस्तरवचनं निर्देश इति। अनुसन्धाने प्रयोजनप्रसङ्गादिषु क्रोडीकृत्य उक्तस्य विषयस्य व्याख्यानावसरे विस्तरेण प्रतिपादनमर्हति। अनागतवेक्षणे सामान्यरूपेण विहितस्य विषयस्य विस्तरनिरूपणमत्र विधीयते।

एवं प्रकारेण प्राचीनैराचार्यैः उक्तासु तन्त्रयुक्तिषु कतिचन अनुसन्धानवसे व्याख्यानयुक्तौ अन्तर्भावयितुं शक्यन्ते येन संस्कृतानुसन्धानमपि वैज्ञानिकं जायेत।

निर्णयः – अधिकरणे पञ्चमसोपानत्वेन तिष्ठति निर्णयः। विषयः विशयः (संशयः) पूर्वपक्षः उत्तरपक्षः निर्णय इति पञ्चैते अनुसन्धानस्य महत्त्वपूर्णसोपानानि इति प्रागेवोक्तम्। तथापि निर्णयः क्वचित् भिन्ना तन्त्रयुक्तिरिति आचार्याणाम्मतम्। **निर्णयो नाम विचारितस्यार्थस्य व्यवस्थापन**मिति चरकसंहितायाम् पृ.1030 निर्दिष्टं वर्तते। अनुसन्धाने अनुसन्धत्तविषयस्य अन्तिमनिर्णयः (conclusion) अतिमुख्यः अंशः वर्तते। निर्णयं विना अनुसन्धानं पूर्णतां नैति इति निश्चप्रचम्।

ऊह्यम् – ऊह्यम् नाम उत्प्रेक्षणीयम् कल्पनीयमित्यादिबह्वर्थकं भवति। अनुक्तकरणमूह्यमिति अर्थशास्त्रे। ऊह्यं नाम यदनिबद्धं ग्रन्थे प्रज्ञया तर्क्यत्वेनोपदिश्यते इति चरकसंहितायाम्। आधुनिकानुसन्धाने अनुसन्धाता अनुसन्धाननिष्पादनात् परं उत्प्रेक्षणीयान् कांश्चन विषयाननुसन्धात्तविषयसम्बद्धान् उपस्थापयति। अस्य भाव्यनुसन्धानसूचनाः इति नाम। ऊह्यमिति युक्तिः तत्रैवान्तर्भावयितुं शक्यते।

**निष्कर्षः –**

आधुनिकलोके अनुसन्धानप्रक्रियायाः विकासः ईषत्कालात् प्रागेव सञ्जातः। किन्तु भारते प्राचीनकालादेव क्रमीकृतरूपेण वैज्ञानिकरीत्या अनुसन्धानं जायते स्मेति विभिन्नग्रन्थानामनुशीलनेन ज्ञायते। अनेनैवानुसन्धानेन भारते संस्कृतवाङ्मयस्य विकासो जातः बहुलक्षसंख्याकानां ग्रन्थानां प्रणयनमपि जातमिति द्रष्टुं शक्यते। अधुना आधुनिकानुसन्धानस्य बहवः सिद्धान्ताः प्रचरिताः याननुसृत्यैव अनुसन्धानमपि प्रवर्तते। किन्तु संस्कृतवाङ्मयस्यानुसन्धानक्षेत्रे न प्राचीनानुसन्धानसिद्धान्ताननुपालयन्ति न वाधुनिकसिद्धान्तान्। संस्कृतानुसन्धानक्षेत्रमितः भ्रष्टं ततश्च भ्रष्टमिति दुरवस्थायामधुना वर्तते। आधुनिकैरुक्ताः सर्वेपि अनुसन्धानांशाः प्राचीनभारतेपि आसन्नित्यतः तेषामंशानां पुनः प्रतिष्ठापनं संस्कृतानुसन्धानक्षेत्रे कार्यमिति तेनैव संस्कृतस्य पुरातनं श्रेयः पुनरानेतुं शक्यत इति विचार्यते।

# मारकविमर्शः –लघुपाराशर्याः विशिष्टसन्दर्भे

**डा. सुनीता, ज्यौतिषविभागाध्यक्षा**

उपभोग्येषु चित्तचाञ्चल्यहेतुषु विविधवस्तुषु रतानां संसारस्य महत्यः पङ्के निमग्नानामिह सर्वेषामपवर्ग एव चरमलक्ष्यम्। तस्यायनं गवेषयमाणैः दार्शनिकैः महर्षिभिः प्राथम्येन वेदाः साक्षात्कृताः। कालानुपूर्व्या शिक्षादिषडङ्गानि प्रादुर्भुवन् वेद-संरक्षणार्थं व्याकरणस्य वैदिककर्मणां कालनिर्देशार्थं ज्यौतिषस्य एवं प्रत्येकमङ्गस्य वेदान् लक्षीकृत्यैव उद्गमः इति सार्थक्यमङ्गानाम्।

वियति नियतं वर्तमानास्तेजः पिण्डा एव ज्योतिः शब्देन व्यवह्रियते। ज्योतींष्यत्र सन्ति विवेचनीयत्वेन इत्यर्थे ज्योतिः शब्दात्। अर्श आदिभ्योऽच् इत्यचि निष्पन्नोऽयं शब्दः ज्योतिषम् इति। यत्र तेजोबिम्बानां ग्रहनक्षत्रादीनां स्थितिगतिप्रभावादीनां वर्णनं तद्भवति शास्त्रं ज्योतिषम्।

शास्त्रमिदं सिद्धान्तसंहिता होराभेदेन त्रिषु स्कन्धेषु विभक्तमिति त्रिस्कन्धज्योतिषशब्देनापि ज्ञायते। तत्र सिद्धान्तस्य गणितमिति अपरपर्यायेणापि निर्देशः। ज्योतिषस्य ग्रहगतियुक्त्यादिविचारको भागः सिद्धान्तपदवाच्य इति सिद्धान्तलक्षणम्। संहिताविषये वराहमिहिरेणोक्तं तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता। अर्थात् यत्र कृत्स्नस्य विषयस्य विमर्शः सा संहिता। होरास्कन्धः हि जातकसम्बन्धः। इह जन्तु प्राक्कृतं कर्मफलमेव हि अनुभुङ्क्ते। कर्मवशात् किं फलं सुखात्मकं, दुःखात्मकं वा तेनानुभूयते इति विचारः होरास्कन्धेषु निगूहितः।

ज्योतिषशास्त्रे होराशब्दस्योपयोगः बह्वर्थे दृश्यते। सारावल्यां राशिप्रसङ्गे लग्नार्थे वा भावकुतूहले राश्यर्थैः[1]। एवं मुहूर्तचिन्तामणौ चापि प्राप्यते।[2] मुख्यरूपेणात्र राशीप्रभेदः, ग्रहयोनिः आधानं, जन्ममूलादिनक्षत्रविवेकः, संवत्सरादिफलं, मासफलं, ग्रहस्थितिफलं, ग्रहदृष्टिफलं, अरिष्टविचारः, राजादियोगः, मारकविचारश्च विवेच्यन्ते। जातकशास्त्रे मारक अर्थात् कष्टकारकः इत्यवबोध्यते। वस्तुतस्तु ज्योतिश्शास्त्रे मानवजीवनोपयोगी सर्वासां स्थितीनां विचारो प्रतिपादितः वर्तते। तत्र आयुषः व्ययकारकं स्थानं मारकनाम्ना ख्यातः अस्ति। यथोक्तं पराशरेण-

---

[1] होराराशीदलं समे प्रथमचन्द्रस्य भानोरतो (भावकुतूहलम् 1.8)
[2] समगृहमध्ये राशीरविहोरा (मुहूर्तचिन्तामणौ विवाहप्रकरणे)

**अष्टमम् आयुषः स्थानमष्टमादष्टमं च यत्।**
**तयोरपि व्ययस्थानं मारकस्थानमुच्यते।।** (ल.पा. 4.1)

अर्थात् आयुषः स्थानमष्टमं विद्यते। एवञ्च अष्टमस्थानादष्टमम् अर्थात् तृतीयमपि आयुःस्थानं भवति। अतः तत्र उभयोः व्ययकारकत्वेन द्वितीयं-सप्तमञ्चस्थानं मारकनाम्ना परिगण्यते।

ज्योतिष्परम्परायां मारकशब्देन शारीरिककष्टः गृह्यते। मारकेशदशायां शरीरस्थहानिः, क्षतिः विकारश्चोपजायते। अत एव सर्वैरैकमतेन मारकदशा अशुभा प्रोक्ता इति।

विविधग्रन्थेषु मारकविचारे बहवः पक्षाः मतानि चोपलभ्यन्ते। कुत्रचित् द्वितीयेशः सप्तमेशः, कुत्रचित् षष्ठेशः, कुत्रचित् पापग्रहाः एवं विधं बहुविस्तिरं वर्णनं प्राप्यते। परन्तु आचार्य जैमिनेः कथनमस्ति यत् तृतीये षष्ठाष्ठमं द्वादशेषु मध्ये यः बली तद्दक्षदशायां निधनं ज्ञेयम्। अर्थात् सर्वेष्वपि स्थानेषु षष्ठेशः विशेषेण मारको भवतीति उक्तम्(जै. सू. 2.57)।

यदि षष्ठेशदशायां निधनं जातं तदा लग्नात् कारकाद्वा यो हि कालं (सप्तमं) स्थानं ततः षष्ठेश, अष्टमेश, द्वादशेशानां दशानर्दशायां जातकः अवश्यमेव निधनं प्रयाति।

विषयेऽस्मिन् पराशरेण प्रोक्तं प्रथमायुषः व्ययकारस्थानात् द्वितीयं व्ययकारकस्थानं बलवान् भवति। अत्रोपपद्यते यत सप्तमस्यापेक्षया द्वितीयस्थानं मारकत्वेनाधिकं बलवानिति। एवं मारकस्थानाधिपतिदशायां जातकस्य निधनं ज्ञेयम्। यथा-

तदीशस्तत्र गतस्तेन पापिनस्तेन संयुताः।
तेषां दशाविपाकेषु सम्भवं निधनं नृणाम्।। (ल.जा. 4.2)

अर्थात् यदि मारकेशदशायां निधनं न सम्भवति तदा मारकस्थानस्थिताः यदि पापग्रहाः स्युः तदा तद्दशायां निधनं भवति। किन्तु यदि पापग्रहाणां स्थितिरपि नोपलभ्यते तदा व्ययेशदशायां जातकस्य निधनं सम्भवति। एवमेव प्रोक्तं यदि उपर्युक्तपरिस्थितेः अपि प्राप्तिः न भवति तदा व्ययेशे यैः ग्रहैः सम्बन्धः क्रियते तद्दशायां निधनं ज्ञेयम्। अथवा सर्वाभावः तदा अष्टमेशस्य दशायां जातकः मृत्युः प्राप्नोति। यथा-

अलाभे पुनरेतेषां सम्बन्धेन व्ययेशितुः।
क्वचिच्छुभानां च दशा ह्यष्टमेशदशासु च।। (ल. पा. 4.4)

एवमेवाग्रे प्रोक्तं यदि एतेषामपि अभावः स्यात्तदा जातकस्य जन्माङ्गे परिस्थितीवशात् ये केऽपि पापग्रहाः सन्ति, तद्दशायां निधनं भवेत् इति। अनेन प्रकारेण विद्वद्भिः मारकाणां दर्शने विचारणीयम्। यथा-

केवलानाञ्च पापानां दशासु निधनं क्वचित्।
कल्पनीयं बुधैर्नृणां मारकाणां दर्शने।। (ल.पा. 4.5)

एवमत्र आचार्यपराशरमतेन प्राप्यते यत् मारकाणां निर्णयः वस्तुतः बहुभिः पक्षैः विचार्य एव निर्धार्यते। तत्र क्रमशः द्वितीयेशः, सप्तमेशः, पापग्रहयुत्त्या व्ययेशः, व्ययेशसमबन्धितग्रहाः, अष्टमेशः, पापग्रहाश्च मारकत्वेन अभिहिताः। आचार्य-पराशरेणात्र पापग्रहैः त्रिषडायानां पतयः बोध्यन्ते। यतो हि पराशरीय सिद्धान्ते पापग्रहाः त्रिषडायेशाः अपि भवन्ति। प्रसङ्गान्तरे पराशरेण प्रोक्तं यत्- मारकग्रहदशायां न केवलम् अशुभं फलमेव प्राप्यते अपि तु राजयोगस्य प्राप्तिरपि सम्भवति। यथा-

आरम्भो राजयोगस्य भवेन्मारकभुक्तिषु। (ल.पा. 5.5)

मारकप्रकरणस्थानान्ते आचार्यपराशरेण प्रोक्तं यत् सर्वेषां ग्रहाणां विचार्यदृष्ट्या शनिः सर्वेषु अधिकः निहन्तः भवति। यदि सः पूर्वोक्तेषु कस्मिंश्चिदपि स्थाने सम्बन्धितो भवति तदा सः अन्यान् ग्रहान् अतिक्रम्य स्वयमेव प्रबलमारको भवति। यथा-

मारकैः सह सम्बन्धान्निहन्ता पापकृच्छनिः।
अतिक्रम्येतरान्न सर्वान् भवत्येव न संशयः।। (ल. पा.)

एवमत्र यदि पूर्वोक्तमारकनिर्णयसम्बन्धितो ये केऽपि ग्रहाः प्रतिपादिताः सन्ति, तेषु सर्वेष्वपि अत्यधिकः बलवान् मारकत्वाधिकत्वात् शनिः स्वयं प्रभावयति। अतः जातकस्य मृत्युतुल्यकष्टे मृत्युकाले वा शनेर्महत्वम् अवश्यमेव विचारणीयं भवति।

मिश्रफलाध्याये प्रतिपादितं यत्- मारकग्रहाः स्वकीयसम्बन्धवशात् जातकान् निहन्ति। परन्तु सः शुभग्रहान्तर्दशायां नाचरति किमपि एतादृक् कर्म। एवमेव मारकः स्वकीयसम्बन्धात् तु सर्वं कष्टं साधयति, परञ्च मारकमहादशायाम् असम्बन्धात् एव पापग्रहान्तर्दशायां स्वयमेव जातकः मरणं प्राप्नोति। एवमेव राहुकेत्वोः मारकलक्षणविषयेऽपि पराशरेणोक्तम्- राहुग्रहः केतुर्वा लग्नसप्तमाष्टमानामन्यत्र गतश्चेत् अथवा मारकग्रहात् सप्तमे वर्तते चेत् अथवा मारकेशेन संयुतो भवति चेत्

स्वीयदशान्तर्दशासु मारको भवेत्। मकरवृश्चिकलग्नयोः राहु मारको भवति। यदा राहु षष्ठाष्ठद्वादशराशिषु विराजते तदा स्वीय दशायां कष्टप्रदो भवेत्। यदा सः राहुः शुभग्रहो युतो वा दृष्टो वा भवति, तदा न कष्टदो भवेत्। एवमेव मध्यमपराशर्यां मारकस्थितेर्निर्धारणं दृश्यते। अन्यत्रोक्तं रविचन्द्रो मारको न भवतः, अन्ये षष्ठाष्ठमद्वादशाधिपतयः राहुकेतू च मारकाः भवन्तीति। यथा-

चन्द्रभानू विना सर्वे मारकाः मारकाधिपाः।
षष्ठाष्ठमे व्ययेशस्तु राहुकेतू तथैव च।। (म.पा. 1.5)

वस्तुतस्तु अस्योपलब्धिः प्रत्यक्ष, प्रायोगिकफलितेऽपि भवति। केचन अंशाः एव नोपलभ्यन्ते। अधिकांशाः पूर्णतया इदानीमपि सङ्घट्यन्ते इति विद्वद्भिः विचारणीयाः।

# पाणिनीयव्याकरणे परिभाषाणां स्थानम्

**डा.प्रसन्नाउण्णित्तान्**

अथ शब्दानुशासनम् इत्यादि भाष्यवचनेन साधु शब्दानामनुशासनमेव क्रियते। शास्त्रपूर्वकसाधुशब्दज्ञानेन धर्मोत्पत्तिः सञ्जायते। सिद्धे शब्दार्थसम्बन्धे लोकतः अर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते, यथा लौकिकवैदिकेषु कृतान्तेषु इत्यादि भाष्यवार्तिकेन शब्दः अर्थः तयोः सम्बन्धश्च नित्य इत्युक्तम्। तथा सति शास्त्रस्य निष्प्रयोजनापत्तौ उच्यते शास्त्रज्ञानपूर्वक साधुशब्दप्रयोगेणैव अदृष्टरूपं पुण्यं फलं सिध्यति। वस्तुतः धनम्, वनम्, पचति, अपचत् इत्यादिसर्वेऽपि शब्दाः सिद्धाः अथवा नित्याः। शब्दः कूटस्थैरविचालिभिः वर्णैः भवितव्यमनपायोपजन-विकारिभिः। तथापि अस्मादृशानामल्पबुद्धीनां कृते निष्कृष्यज्ञानाय व्याकरणशास्त्रं निरमायि आचार्यैः। सामान्यतः व्याकरणशास्त्रप्रमुखाः आचार्याः-

**इन्द्रश्चन्द्रकाशकृत्स्नापिशली शाकटायनः।**
**पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः॥** इति॥

तत्र अष्टसु व्याकरणाचार्येषु पाणिनि व्याकरणमेव पठनपाठनाय उपयुक्ताः दृश्यन्ते। प्रमाणभूतेनाचार्येण महर्षिणा पाणिनिना चतुःसहस्रसंख्याकानि सूत्राणि विरचितानि। तत्र सूत्रेषु षड्विधभेदं द्रष्टुं शक्यते। तानि च संज्ञा, परिभाषा, विधिः, नियमः, अतिदेशः, अधिकारश्च। तद्वत् क्ङिति च, दीधीवेवीटाम्, न धातुलोप आर्धधातुके इत्यादि निषेधसूत्राणामपि रचनामकुर्वन्। तथा सति सूत्राणां सप्तविधत्वम्। किन्तु परिभाषेन्दुशेखरकर्ता नागेशभट्टेन एवमुक्तम् यथोद्देशं संज्ञापरिभाषम् इति परिभाषायाम्- निषेधवाक्यानामपि निषेध्यविशेषाकाङ्क्षत्वात् विध्यैकवाक्यतया अन्वयात् परिभाषासादृश्यात् परिभाषात्वेन व्यवहारः इत्यतः निषेधसूत्राणामपि परिभाषात्वेनैव व्यवहारः इति।

तदनन्तरं कात्यायनाचार्येण वार्तिकानि विरचितानि। पाणिनीयसूत्रैः साधुत्वनिर्णये वार्तिकानामुपयोगः। यथा तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रेण तुल्यस्थानिक तुल्यप्रयत्नवताञ्च वर्णानां सवर्णसंज्ञा विधीयते। एवं विधत्वाभावेऽपि सवर्णसंज्ञासिध्यर्थम् ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् इति वार्तिकेन भिन्नस्थानत्वे, भिन्नप्रयत्नत्वे च ऋकारलृकारयोः सावर्ण्यं विधीयते। अतः वार्तिकानामपि पदसाधुत्व नियामकम्।

पाणिनिकात्यायनयोरनन्तरं भगवता पचञ्जलिमहोदयेन महाभाष्यस्य रचनामकुर्वन्। तस्मिन् ग्रन्थे भगवता पतञ्जलिना पाणिनिकृत सूत्राणां कात्यायनविरचितवार्तिकानाञ्च व्याख्यानं सोदाहरणं कृत्वा स्वाभिप्रायञ्च प्रदर्शितवान्। तयोः मते उक्तानां कार्याणान्यथासिद्धत्वे तेषां प्रत्याख्यानञ्च पतञ्जलिमहोदयेन कृतं दृश्यते। यथा दीधीवेवीटाम् इति सूत्रेण दीधीङ् वेवीङ् धातोः एवं इडागमस्य च सार्वधातुकार्धधातुकयोः परतः प्राप्तं गुणविधिं निषिध्यते। पाणिनीयव्याकरणे मुनित्रयाणां प्राधान्यात् त्रिमुनिव्याकरणमिति प्रथा वर्तते। तत्र पाणिनीयसूत्रे परिभाषा-सूत्राणि विद्यन्ते। यथा तस्मिन्नित्यादि। कात्यायनविरचितवार्तिकमपि क्वचित् परिभाषारूपेण उपलभ्यते। तानि च प्रायेण 41 परिभाषा भवति। क्वचित् महाभाष्य-वाक्यमपि परिभाषात्वेन विलसति। यथा सत्यपि सम्भवे बाधनं भवति इत्यादयः। परिभाषा नाम अनियमे नियमकारिणी भवति। अप्रामाण्यज्ञानानास्कन्दित लक्ष्यधार्मिकसाधुत्वप्रकारकबोधोपयोगी बोधजनकत्वमिति विजया व्याख्याकाराः परिभाषाणां लक्षणमुच्यते। परितो व्यापृतां भाषां परिभाषां प्रचक्ष्यते इति समर्थः पदविधिः सूत्रभाष्ये महाभाष्यकारेणोच्यते। परितो भाष्यतो या सा परिभाषा। अधवा परितः सर्वत्र पूर्वत्र परत्र व्यवहिते अनन्तरे च भाष्यते कार्यमनया सा परिभाषा इति भिन्नाभिप्रायाः अस्यां विषये द्रष्टुं शक्यते। पाणिनिमहोदयेन स्वग्रन्थे अष्टाध्याय्यां प्रायेण पञ्चाशत् परिभाषासूत्राणां रचनामकारि। एवं वार्तिककारोऽपि ईदृशैकचत्वारिं-शत् परिभाषा प्रवृतिकवचनानि कृतानि दृश्यन्ते। पाणिनिकृत परिभाषा सूत्राणि एकस्मन् प्रकरणे न सन्ति। किन्तु सम्पूर्ण अष्टाध्याय्यां व्यापृताः सन्ति। शब्दशास्त्रेषु याऽनियमता ताः दूरीक्रियते परिभाषा इत्येकमेव कार्यं परिभाषाणाम्। संज्ञासूत्रेषु विधिसूत्रेषु च विद्यमान अव्याप्ति अतिव्याप्ति असम्भवरूप दोषाणां निवारणं परिभाषायाः लक्ष्यं भवति। यथा जराया जरसन्यतरस्याम् इति सूत्रप्रवृत्तिवेलायां अव्याप्तिरस्ति, यतः निर्जरसावित्यत्रास्य सूत्रप्रवृत्यभावात्। अतः येन विधिस्तदन्तस्य, पदाङ्गाधिकारे तस्य च तदन्तस्य च, निर्दिश्यमानस्यादेशाः भवन्ति, **एकदेशविकृतमनन्यवत्** इत्यादि परिभाषाणां साहाय्येन तदव्याप्तिः दूरीक्रियते। यत्र यस्य प्रवृत्तिः नेष्टः तत्रातिव्याप्तिः। यथा पराजयति सेना। अत्र सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् इति परिभाषया विपराभ्यां जेः इति सूत्रेण विधीयमान

आत्मनेपदं परस्मैपदप्रकरणे सहचरितत्वात् वार्यते। शतानि इत्यादौ षड्संज्ञा षड्भ्यो लुक् इत्यस्याः वारणार्थं सन्निपात परिभाषा प्रयुज्यते। ङः सि धुट् इति सूत्रे तस्मिन्निति तस्मादिति उभयोः प्रवृत्तिसम्भावनायाम् उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् इति परिभाषा उपयुज्यते। अधिकारपरिभाषयोः कः विशेषः इति चेदुच्यते- अधिकारः प्रतियोगं तस्य निर्देशार्थं योगे योगे उपतिष्ठते। परिभाषा तु एकदेशस्था सति सर्वं शास्त्रमभिज्वलयति प्रदीपवत्। यथा प्रदीपः एकदेशस्थः सर्वं गृहमभिज्वलयति तद्वत् परिभाषा सर्वं शास्त्रमभिज्वलयति। परिभाषाग्रन्थः शास्त्रविषयकः विविधन्यायानां संग्रहो भवति। एता न्यायरूपाः परिभाषाः मुख्यतया कात्यायन पतञ्जलि प्रमुखानां व्याकरणशास्त्राचार्याणां ग्रन्थेभ्यः उद्धृत्य संकलिताः। क्वचित्तु परिभाषामूलमधिकृत्य नागेशभट्टमहोदयेन महेश्वरस्य वाक्यादपि कस्याश्चित् परिभाषायाः उत्पत्तिः सूचिता। तद्यथा व्याख्यानाच्च, द्विरुक्तितः इत्यादि वार्तिकव्याख्याने यत् पतञ्जलिमहोदयेन उक्तं- एतज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा व्याख्यानतो विशेषप्रतिपत्तिः.......। अत्र आचार्यपदेन महेश्वरस्यैव ग्रहणम्। नागेशभट्टमहोदयेन स्वग्रन्थस्य परिभाषेन्दुशेखरस्य प्रारम्भे एवमुक्तम्- प्राचीनवैयाकरणतन्त्रे वाचनिकानि अन्यत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोरुपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते इति। यद्यपि भगवता पतञ्जलिना परिभाषायाः लक्षणं नोच्यते तथापि भगवतः वचनात् प्रतीयते। परिभाषाशास्त्रतत्त्वज्ञाने प्रकाशकः यस्य प्रकाशेनैव शास्त्रार्थः स्पष्टतया ज्ञायते- एकत्र स्थित्वा सर्वशास्त्रान् प्रकाशयति। परिभाषा न केवलं पाणिनीयानि वचनानि। किन्तु नानाचार्याणाम्। तत्र पाणिनीयशब्दानुशासने यत्रैव क्वचिदिष्टविषये मुख्यलक्षणेनासिद्धिः तत्रैतावता गत्यन्तरविरहादाश्रीयते। सामान्यतः परिभाषाः त्रिषु वर्गेषु सन्ति। ज्ञापकसिद्धा परिभाषा, न्यायसिद्धा परिभाषा, वाचनिकी परिभाषा च। तत्र ज्ञापकसिद्धा परिभाषा द्विधा। निर्देशानुपपत्तिज्ञापकज्ञापिता, अर्थानुपपत्तिज्ञापकज्ञापिता च। स्थण्डिलाच्छयितरे व्रते इति सूत्रस्थ शयितरि इति निर्देशद्वारा ज्ञापित **कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते** इति परिभाषा प्रथमविभागस्य उदाहरणम्। **प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्** इति परिभाषा द्वितीयविभागस्य चोदाहरणम्। ज्ञापकसिद्धं न सर्वत्र इदमप्युचितमेव। ज्ञापकं नाम न वाचकं किन्तर्हि इङ्गितेन सूचकं क्वचिदेव इष्टसिद्धावाश्रीयते न सर्वत्र। यथा ज्ञापकसाधितमात्मनेपदानियत्वादि न सर्वत्र

प्रयोज्यम्। किन्तु विशिष्टप्रयोगदर्शनात् क्वचिदेव। परिभाषाः सामान्यतया त्रिधा विभज्यते। शास्त्रत्वसम्पादकम्, बाधबीजम्, शेषार्थकथनश्चेति तन्त्रत्रयं विद्यते।

**नागेशोक्त ज्ञापकसिद्धाः परिभाषाः-**

**नानुबन्धकृतमनेकाल्त्वम्** (6) इति परिभाषायाः ज्ञापकं भवति अनेकाल्शित्सर्वस्य इति सूत्रस्थ शिद् ग्रहणम्। एकान्ताः अनुबन्धाः इति परिभाषा सत्वे अष्टाभ्य औश् इति सूत्रविहित औश् अनेकाल्त्वादेव सर्वादेशत्वेन अष्टौ इति रूपसिद्धौ शिद्ग्रहणं व्यर्थं सत् नानुबन्धकृतमनेकाल्त्वमिति परिभाषा ज्ञापकमेव।

**नानुबन्धकृतमनेजन्तत्वम्** (7) इति परिभाषा उदीचां माङः इति सूत्रस्थ माङ् इति निर्देशः ज्ञापकं भवति। इत्र माङ् इति मेङः कृतात्वनिर्देशः। आदेच उपदेश इति उपदिश्यमानस्यैजन्तत्वस्यात्वविधिनादिह मेङि ङकारसत्वे एजन्तत्वाभावादात्त्वाप्राप्तेः निर्देशस्यासङ्गतिः। परिभाषा स्वीकारे तु ङकारस्यानुबन्धत्वात् तत्कृतस्यानेजन्तत्व-स्यास्वीकारात् एजन्तत्वेन निर्देशः संगतो भवति।

**नानुबन्धकृतमसारूप्यम्** (8) इति परिभाषापि ज्ञापकसाध्या भवति। दद्यातिदधात्योर्विभाषा इति सूत्रस्थ विभाषाग्रहणमत्र ज्ञापकम्। अत्र आतोऽनुपसर्गे कः, कर्मण्यण् इति क अणयोः असारूप्यात् स्वत एव विकल्पेन बाधे सिद्धे विकल्पविधानं व्यर्थं सत् अस्याः ज्ञापकं भवति। वाऽसरूपोऽस्त्रियाम् इति सूत्रेण क प्रत्ययविषये अणोऽपि आपत्तिः।

**उभयगतिरिह भवति** (10) इति परिभाषायाः ज्ञापकसिद्धत्वम्। संख्यायाः अति-शदन्तायाः कन् इति सूत्रे अतिशदन्तायाः इति निषेधोऽत्र ज्ञापकम्। न हि कृत्रिमा संख्या त्यन्ता शदन्ता चास्ति।

**भाव्यमानेन सवर्णानां ग्रहणं न** (20) इति परिभाषा तु अणुदित्सवर्णस्य चाप्रत्ययः इति सूत्रस्थाप्रत्यय ग्रहणेन ज्ञाप्यते। एवं ज्यादादीयसः इति सूत्रस्थ आत् ग्रहणमपि अस्याः ज्ञापकम्। तद्वत् भाव्यमानोप्युकारः सवर्णान् गृह्णाति इति परिभाषा दिवः उत्, ऋत उत् इत्यनयोः तपरकरणेन ज्ञापयति।

**वर्णाश्रये नास्ति प्रत्ययलक्षणम्** (22) इति परिभाषा प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रे द्वितीयप्रत्ययलक्षणम् इति ज्ञापकं भवति। प्रत्ययलोपे तल्लक्षणम् इत्येव सिद्धे प्रत्ययपदप्रयोगात् प्रत्ययलोपेऽपि प्रत्ययत्वव्याप्यधर्माश्रितं कार्यं भवतीत्यर्थो लभ्यते।

स्थानिवदित्यनुवृत्यैव सिद्धे प्रत्ययलक्षणग्रहणात् प्रत्यये प्राधान्यलाभः। किन्तु वर्णस्य प्राधान्येनाश्रयणे प्रत्ययलक्षणं न भवति।

**उणाद्योऽव्युत्पन्नानि प्रातिपदिकानि**(23) इति परिभाषा अतः कृकमिकंस इत्यादि सूत्रे कमिग्रहणेन सिद्धे कंसग्रहणं व्यर्थं सत् ज्ञापकं भवति। संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति (28) इति परिभाषा सुप्तिङन्तं पदम् इति सूत्रस्थ अन्तग्रहणेन ज्ञापयति। एवं बहवः परिभाषाः ज्ञापकसिद्धा सन्ति। सर्वासां कथनं विस्तारभयादुपेक्ष्यते।

**न्यायसिद्धाः परिभाषाः-**

न्यायसिद्ध इत्यनेन लोकन्यायसिद्धानां ग्रहणं नागेशभट्ट महोदयेन क्रियते। ज्ञापकसिद्धानामपि क्वचित् लोकन्यायत्वं समर्थयितुं शक्यमिति बोधयति। तत्र परिभाषेन्दुशेखरे कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते(11) इति परिभाषायाः ज्ञापकं स्थण्डिलाच्छयितरे व्रते इति सूत्रमुक्त्वा अन्ततः नैषा ज्ञापकसाध्या अपि तु समवायिकारणनिमित्तकारणयोः सकल लोकतन्त्रप्रसिद्धभेदसत्वात् लोकन्यायसिद्ध इत्युक्तम्।

एवं **यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते** (12) इति परिभाषा लोकन्यायसिद्धा भवति। तत्रोच्यते परिभाषेन्दुशेखरे- लोकेऽपि देवदत्तस्याङ्गाधिक्ये तद्विशिष्टस्यैव देवदत्तग्रहणेन ग्रहणं दृश्यते। गौणमुख्ययोः मुख्ये कार्यसंप्रत्ययः(16) इति परिभाषा लोकन्यायसिद्धा भवति। तत्र कैयटमहोदयेनोक्तं- लौकिक एवायं न्यायः शास्त्र आश्रीयते। स्वं रूपं शब्दस्येति रूपग्रहणात् अर्थवद्रूपमाश्रीयते। स चार्थो मुख्य एव गृह्यते, न तु गौणः। तत्र प्रसिद्धि अप्रसिद्धिभ्यां मुख्यगौणव्यवस्थेति माणवके संज्ञात्वेन विनिर्मुक्तावग्निसोमशब्दौ गौणार्थाविति षत्वाभावः सिद्धः।

**एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः** (18) इति परिभाषायाश्च लौकिकन्यायलब्धत्वम्। एककार्यनियुक्तानां बहूनां लोके तथैव दर्शनात् इत्युक्तत्वादियमपि लोकन्यायसिद्धा।

**व्यपदेशिवदेकस्मिन्** (31) इति परिभाषा एवं विधमेव। लोकेऽपि बहुपुत्रसत्त्वे व्यवहारः अयं मे ज्येष्ठः अयं मे कनिष्ठः मध्यमः इत्यादि। किन्तु एकपुत्रसत्त्वे एव। अथवा असहाये एव।

**एकदेशविकृतमनन्यवत्**(38) इति परिभाषापि एतादृशैव। छिन्नपुच्छे शुनि श्वत्वव्यवहारवत् मान्ते तत्त्वं लोकन्यायसिद्धमिति किन्तु तत्र ज्ञापकमयुक्तं भवति। प्राग्दीव्यतोऽण् इत्यत्र दीव्यतः इति।

**असिद्धं बहिरङ्गमन्तरङ्गे** (51) इति परिभाषा लोकन्यायसिद्धस्यापरमुदाहरणम्। इदमन्तरङ्गं लोकन्यायसिद्धमिति। मनुष्योऽयं प्रातरुत्थाय प्रथमं स्वशरीरकार्याणि करोति। ततः सुहृदां ततः सम्बन्धिनाम् इत्यादि।

**सूत्रे लिङ्गवचनमतन्त्रम्** (74) इति परिभाषा लोकन्यायेनोक्तं दृश्यते। धान्यपलालन्यायेन नान्तरीयकतया तयोरुपादानमिति तस्यापत्यमित्यत्र भाष्ये स्पष्टम्। अस्याः परिभाषायाः ज्ञापकसाध्यत्वमप्युच्यते। अर्धं **नपुंसकम्** इति सूत्रस्थ **नपुंसकग्रहणमस्याः** परिभाषायाः ज्ञापकं भवति। अस्याः परिभाषायाः अभावे सूत्रे निर्दिष्टलिङ्गं विवक्ष्यते तर्हि अर्धम् इति निर्दिष्टनपुंसकं करणात् नपुंसक एव शब्द इति लभ्येत।

**नञिवयुक्तमन्यसदृशाधिकरणे**(75) इति परिभाषापि लोकन्यायसिद्धा भवति। न हि अब्राह्मणमानयेत्युक्ते लोकमानीय कृती भवति। एवं नञ्युक्तमिव युक्तञ्च यत्किञ्चित् दृश्यते, तत्रान्यस्मिन् तत्सदृशे कार्यं विज्ञायते।

**सांप्रतिकाभावे भूतपूर्वगतिः**(77)। एतदपि परिभाषा लोकन्यायमूला भवति। तत्तद्वचनसामर्थ्यात् न्यायसिद्धेयम्। लोकेऽपि साम्प्रतिकाभावे भूतपूर्वस्याश्रयणं दृश्यते। तद्यथा कस्यापि संस्थायाः उद्घाटनादिकार्याय यदा वर्तमानो मन्त्र्यादिः नोपलभ्यते तदा भूतपूर्वो मन्त्र्यादिः तदर्थं प्रार्थ्यते।

**बहुव्रीहौ तद्गुणसंविज्ञानमपि** (78)। सिद्धं तु तद्गुणसंविज्ञानात् पाणिनेर्यथा लोके इति शेखरकारवचनेन इयमपि परिभाषा लोकन्यायसिद्धेति लभ्यते।

**सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य** (86) इति परिभाषापि लोकन्यायसिद्धा उपजीव्यविरोधस्यायुक्तत्वमिति न्यायमूलैषा परिभाषा।

**सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यभावः**(87) समुच्चयार्थक च शब्दयोगे तु विधेययोरेककालिकत्वैकदेशत्वनियमात् न्यायसिद्धापि इयं परिभाषा। अस्याः ज्ञापकसाध्यत्वमप्यस्ति। बिल्वकादिभ्यश्छस्य लुक् इति सूत्रस्थं छग्रहणं ज्ञापकं भवति।

**प्रधानाप्रधानयोः प्रधाने कार्यं संप्रत्ययः** (106)। यद्यपि नागेशभट्टमहोदयेन अस्याः लोकन्यायसिद्धत्वं नोक्तं तथापि नपुंसकमन.... (1.2.69) इत्यादि सूत्रस्य प्रदीपे कैयटेन यथा लोके बहुषु गच्छत्सु गच्छतीति प्रधानं राजा व्यपदिश्यते, राजा च प्राधान्यं तदधीनप्रवृत्तिनिवृत्तित्वादन्येषामित्यादिना ग्रन्थेन तथोक्तमेव। अस्याः न्यायसिद्धत्वं पतञ्जलिनापि प्रत्ययः इति सूत्रस्य भाष्ये उक्तम्।

**अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी** (107) रथकाराधिकरणन्यायसिद्धोऽयमर्थः इति परिभाषायामुक्तम्। रथं करोतीति रथकारः। रथकारकत्वाद् ब्राह्मणोऽपि कश्चित् रथकारः योगशक्त्योच्यते। अन्यः सङ्करजातीयः रूढ्या रथकार उच्यते।

एवं **प्रत्येकं वाक्यपरिसमाप्तिः** (116), **क्वचित् समुदायेऽपि** (117) इति परिभाषाद्वयमपि लोकन्यायसिद्धौ भवति। यथा देवदत्तादयो भुज्यन्तामित्युक्ते प्रत्येकं वाक्यपरिसमाप्त्या प्रत्येकं भोजनम्। गर्गाः शतं दण्ड्यन्ताम् इत्यत्र तु शतदण्डनं समुदायस्य भवति न तु प्रत्येकम्।

**पर्जन्यवल्लक्षणप्रवृत्तिः** (120) लक्षणं सूत्रवार्तिकौ ते पर्जन्यवत् उदाहरणेषु अथवा लक्ष्येषु समं प्रवर्तते। यथा पर्जन्यो यावदूनं पूर्णं च सर्वमभिवर्षति।

**निषेधश्च बलीयांसः** (122) अन्तरङ्गादुपजीव्यादपि बलीयांस इति यावत्।

एवं लोकन्यायसिद्धाः परिभाषाः बहवः सन्ति। काचन परिभाषास्तु न्यायसिद्धा तद्वत् युक्तिसिद्धाश्च भवन्ति। ताश्च अर्थवद्ग्रहणे नानर्थकस्य, सर्वो द्वन्द्वो विभाषयैकवत्, परान्नित्यं बलवत्, पुरस्तादपवादाः अनन्तरान् विधीन् बाधन्ते इत्यादयः।

**वाचनिकी परिभाषाः**- पाणिनि, कात्यायन, पतञ्जलि आचार्याः वचनरूपेण पठिताः एवं पाणिन्यादयः यत्किञ्चित् सूत्रार्थस्य रूपान्तरत्वेन प्रकारान्तरेणोक्ताः वाचनिकी इत्युच्यते। यथा इको गुणवृद्धी इति पाणिनीयसूत्रं पाणिनेः मुखाद्धुद्गतःइत्यतः तस्य परिभाषासूत्रस्य वाचनिकत्वम्। एवम् अनिनस्मिन् ग्रहणानि, येन विधिस्तदन्तस्य इत्यादि परिभाषा भाष्ये वचनरूपेण पठिताः। तद्वत् उपपदविभक्तेः कारकविभक्तिर्बलीयसी इत्यादयः परिभाषाः वार्तिकरूपेण वचनरूपेण पठिताः सन्ति। वाचनिकी परिभाषा तावत् भाष्ये ज्ञापकन्यायसिद्धावपि इति भाष्ये व्याख्यानं कृत्वा निर्दिष्टाः सन्ति। वस्तुतस्तु सर्वा अपि व्याख्येयपरिभाषा ज्ञापकन्यायसिद्धा एव। कुत्रचिद् ज्ञापकं प्रमाणं, कुत्रचिद् न्यायः प्रमाणम्। यस्मिन् विधिरित्यत्र वाचनिक्येवेति लेखस्तु भाष्ये ज्ञापकोपन्यासो नास्तीत्येवं पर इति न तेन न मूलग्रन्थेन विरोधः। वाचनिकानि यथा नागेशेनोक्ताः अनिनस्मिन्, क्वचिदेकदेशोप्यनु-, प्रत्ययग्रहणे चापञ्चम्याः, ग्रहणवता प्रातिपदिकेन, यस्मिन्विधिस्तदा-, अन्तरङ्गानपि-, विभक्तौ लिङ्गवचन-,उपपदविभक्तेः-, अनन्त्यविकारे- इत्यादयः बहवः परिभाषाः वाचनिकानि सन्ति। परिभाषा सूत्राणि, वार्तिकानि, भाष्यवचनानि च पाणिनीयसूत्रव्याख्याने अथवा सूत्रार्थबोधने अवश्यमेव। परिभाषामधिकृत्य बहु वक्तव्यं वर्तते किन्तु विस्तरभयात् उपसंह्रियते॥

# पूर्वत्रासिद्धम् – सूत्रार्थविचारः

**डा. विजयलक्ष्मी राधाकृष्णन्, व्याकरणविभागः**

पाणिनिप्रणीतो ग्रन्थः अष्टाध्यायी। तत्र अष्टौ अध्यायाः सन्ति। अष्टानाम् अध्यायानां समाहारः अष्टाध्यायी इति व्युत्पत्तिः। प्रत्येकमध्यायस्य चत्वारः पादाः इति हेतोः द्वात्रिंशत्पादात्मकोऽयं ग्रन्थः। **पूर्वत्रासिद्धम्** इति सूत्रं सम्पूर्णाष्टाध्यायीं भागद्वये विभजते। तत्र प्रथमो भागः अस्मात् सूत्रात् पूर्वः, द्वितीयस्तु अस्मात् सूत्रात् परः। पूर्वस्मिन् भागे एकोनत्रिंशत् पादाः अर्थात् सप्त अध्यायाः सम्पूर्णाः (अष्टाविंशतिपादाः) अष्टमाध्यायस्य प्रथमोपादश्च इति शाकल्येन एकोनत्रिंशत् पादाः। अतः तस्य भागस्य **सपादसप्ताध्यायी** इति संज्ञा, द्वितीयभागे अवशिष्टाः अन्तिमाः त्रयः पादाः इति हेतोः तस्य त्रिपादी इति संज्ञा। तदित्थं पूर्वत्रासिद्धम्[1] इति सूत्रं सम्पूर्णाष्टाध्यायीं भागद्वये (सपादसप्ताध्याय्यां त्रिपाद्यां च) विभजते।

अष्टमाध्याये द्वितीयपादस्येदमादिमं सूत्रम्। इतः प्राक्तनं कृत्स्नं सूत्रजालं सपादसप्ताध्यायीति व्यवह्रियते। उपरितनं तु कृत्स्नं सूत्रजालं त्रिपादीति व्यवह्रियते। अधिक्रियते उपरितनसूत्रजालशेषत्वेन पठ्यत इत्यधिकारः। कर्मणि घञ् इति **घञजबन्ताः पुंसि**[2] इति पुंस्त्वम्। अयमिति तदेपक्षया पुंलिङ्गनिर्देशः। षड्विधेषु सूत्रेषु अर्थात् संज्ञा- परिभाषा- विधि- नियम- अतिदेश- अधिकारेषु अधिकारसूत्रोऽयम्। पूर्वत्र असिद्धम् इति पदच्छेदः। पूर्वत्र पूर्वसूत्रदृष्ट्या अर्थात् पूर्वसूत्रस्य प्रवृत्तिकाले असिद्धम् अवर्तमानमिव मन्तव्यम्।

पूर्वत्र सपादसप्ताध्यायीं दृष्ट्वा त्रिपादी असिद्धा अर्थात् अवर्तमानेन भवति। इदं तात्पर्यं यत् सपादसप्ताध्यायीस्थसूत्रदृष्ट्या त्रिपादीस्थसूत्रम् असिद्धं भवति, शक्तिरहितं जायते। यदि सपादसप्ताध्यायीस्थसूत्रं त्रिपादीस्थसूत्रञ्च एककाले एव प्रवृत्तिमर्हतः तदा त्रिपादीस्थसूत्रमसिद्धं भवति, न प्रवर्तते इत्यर्थः। एवं त्रिपादीस्थसूत्रे प्रवृत्ते सति यदि सपादसप्ताध्यायीस्थसूत्रं प्रवृत्तिमर्हति तदा त्रिपादीस्थसूत्रमसिद्धं भवति। अर्थात् तत्कृतकार्यमवर्तमानमिव भवति। एवं असिद्धद्वयं सिद्धम्। इदं द्विप्रकारकमसिद्धत्वं क्रमशः समकालासिद्धत्वं जातासिद्धत्वञ्चेति संज्ञाद्वयेनाभिधीयते।

---

[1] अष्टाध्याय्यां 8.2.1
[2] अष्टाध्याय्यां

समकालासिद्धत्वस्य उदाहरणं मनोरथ इति। मनस् रथ इति स्थिते **ससजुषो रुः** इत्यनेन सकारस्य रुत्वे मनर् रथ इति जाते **रो रि**[3] इति त्रिपादीस्थसूत्रेण रेफस्य लोपे प्राप्ते **हशि च**[4] सपादसप्ताध्यायीस्थ सूत्रेण उत्वे च समकाले प्राप्ते **पूर्वत्रासिद्धम्** इत्यनेन सूत्रेण **रो रि** इति त्रिपादीस्थसूत्रस्यासिद्धत्वात् **रो रि** इति सूत्रस्य प्रवृत्तिः न भवति, किन्तु **हशि च** इति सपादसप्ताध्यायीस्थसूत्रस्य प्रवृत्तिः भवति। एवं च रेफस्य उत्वे कृते मन उ रथ इति जाते **आद्गुणः** इत्यनेन सूत्रेण अकारोकारयोः स्थाने एकादेशे गुणे ओकारे मनोरथः इति रूपं सिद्धं भवति।

जातासिद्धत्वस्योदाहरणं तु हर इह। हरे इह इत्यवस्थायां **एचोऽयवायाव** इत्यनेन सूत्रेण एकारस्य स्थाने अयादेशे हरय् इह इति जाते **लोपः शाकल्यस्य**[5] इत्यनेन सूत्रेण यकारलोपे हर इह इति जाते **आद्गुणः**[6] इत्यनेन अकारेकारयोः स्थाने गुणे प्राप्ते किन्तु **आद्गुणः** इत्यस्य सपादसप्ताध्यायीस्थत्वेन तत् सूत्रदृष्ट्या त्रिपादीस्थं **लोपः शाकल्यस्य** इति लोपविधायकं सूत्रमसिद्धं भवति। तत्सूत्रकृतलोपकार्यमवर्तमानमिव भवति। एवं गुणो न भवति, हर इह इति रूपसिद्धिः। **लोपः शाकल्यस्य** इति विकल्पपक्षे यलोपाभावे हरयिह इति च। इदमेव जातस्य (प्रकृतस्य सूत्रस्य) असिद्धत्वात् जातासिद्धत्वमित्युच्यते।

सूत्रमिदं यदि अधिकारसूत्रमिति मन्यते एतस्मात् सूत्रात् परेषु सूत्रेषु अस्याधिकारो भवेत्। एतत् सूत्रमनुवृत्तिं लब्ध्वा तेषु परेषु सूत्रेषु गच्छेत्, तदा अष्टमाध्यायस्य द्वितीयपादादारभ्य अवशिष्टेषु सर्वेषु सूत्रेषु पूर्वत्रासिद्धमिति सूत्रं गच्छति। तदा त्रिपादीस्थ प्रत्येकं सूत्रं पूर्वसूत्रापेक्षया पूर्वसूत्रं प्रति असिद्धं भवति। पूर्वत्रासिद्धमिति सूत्रस्य अधिकारसूत्रत्व स्वीकारे इदं सिद्धं भवति। एवञ्च त्रिपादीस्थं प्रत्येकं सूत्रं सपादसप्ताध्यायीस्थसूत्राणि त्रिपादीस्थपूर्वसूत्राणि च दृष्ट्वा असिद्धं भवति। असिद्धत्वं न केवलं सपादसप्ताध्यायीस्थसूत्रदृष्ट्या, किन्तु पूर्वगत त्रिपादीस्थसूत्रदृष्ट्यापि भवति। अत एव किमु उक्तम् इत्यत्र **मय उञो वो वा**[7] इत्यनेन पूर्वस्य उकारस्य वकारे किम्वुक्तम्

[3] अष्टाध्याय्यां 8.3.84
[4] अष्टाध्याय्यां 6.1.114
[5] अष्टाध्याय्यां 8.3.16
[6] अष्टाध्याय्यां 6.1.87
[7] अष्टाध्याय्यां 8.3.33

इत्यत्र **मोऽनुस्वारः**[8] इत्यनेन मकारस्य अनुस्वारो न भवति। **मोऽनुस्वार** इति त्रिपादीस्थपूर्वसूत्रदृष्ट्या **मय उञो वो वा** इति त्रिपादीस्थपरसूत्रस्य जातासिद्धत्वात्। सपादसप्ताध्यायीस्थसूत्रं प्रति त्रिपादीस्थसूत्रमसिद्धम्। त्रिपाद्यामपि पूर्वसूत्रं प्रति परसूत्रमसिद्धम्। एतेन स्पष्टं भवति यत् त्रिपादीस्थसूत्रमेव स्वपूर्वसूत्रं प्रति असिद्धं भवति। सपादसप्ताध्यायीस्थसूत्राणां तु परस्परं असिद्धत्वं नास्ति।

अष्टमाध्यायस्य द्वितीयपादस्यारम्भे **पूर्वत्रासिद्धम्** इति सूत्रस्योपन्यासेन कियत्कार्यं पाणिनिना सम्पादितम् इति इदानीं ज्ञातुं शक्यते। सपादसप्ताध्याय्यां सिद्धसूत्राणि, त्रिपाद्यां तु असिद्धसूत्राणि स्थापितानीति पाणिनेः सूत्ररचनायाः वैशिष्ट्यम्। एवञ्च यत् विवृताकारं संवृताकारं विदधाति तत् अष्टाध्यायीस्थमन्तिमं सूत्रम्। सर्वाणि सूत्राणि प्रत्यसिद्धं मन्यते। अत एव संवृतत्वं प्रक्रियादशायां तु विवृतत्वमेव। संवृतोऽपि ह्रस्वाकारःव्याकरणसूत्रप्रवृत्तिकाले विवृतो मन्यते। अन्यथा घनागम इत्यत्र घनेति नकारस्थ ह्रस्वाकारस्य आगम इति शब्दस्थदीर्घकारेण सह **अकः सवर्णे दीर्घः**[9] इत्यनेन सूत्रेण सवर्णदीर्घः न स्यात्। ह्रस्वाकारस्य संवृतत्वेन दीर्घाकारस्य विवृतत्वेन संवृतविवृतेति प्रयत्नभेदे तयोः सवर्णत्वाभावात् **अकः सवर्णे दीर्घः** इति सूत्रं न प्रवर्तेत। अन्तिमसूत्रस्य **अ अ** इति सूत्रस्य सम्पूर्णाष्टाध्यायीस्थसूत्राणि प्रति असिद्धत्वे संवृतस्यापि ह्रस्वाकारस्य विवृतत्वं लभ्यते च।

**पूर्वत्रासिद्धम्** इति सूत्रं पाणिनीयव्याकरणे प्रमुखं स्थानमर्हति। एतेन पाणिनीयसूत्राणां परस्परं बलाबलत्वं निश्चीयते। समकालमेव प्राप्तयोः सूत्रयोर्मध्ये केन सूत्रेण प्रवर्तितव्यम् इति ज्ञानाय तथा सिद्धे पदे प्राप्तस्यान्यसूत्रस्य प्रवृत्तिनिवारणाय चास्य सूत्रस्योपयोगः। ह्रस्वाकारस्य दीर्घाकारेण सवर्णत्वस्थापनार्थमपि सूत्रमेतदावश्यकम्।

इति शम्।

---

[8] अष्टाध्याय्यां 8.3.23

[9] अष्टाध्याय्यां 6.1.101

# नागेशमतेन लक्ष्यासाधिका:परिभाषा:

डॉ.नन्दकिशोर तिवारी, व्याकरणविभागः
शम्भुशरण तिवारी, शोधच्छात्र:, काशी हिन्दू विश्वविद्यालयः

महावैयाकरणेन भट्टनागेशेन बहुविधविषयमवलम्ब्यानेके ग्रन्था विरचितास्तथापि पाणिन्युच्चरितभिन्नपरिभाषा[1] आधारीकृत्य तासाम्प्रामुख्यम्बुबोधयिषया च परिभाषेन्दु-शेखराभिधो ग्रन्थोऽपि विरचित:।तत्र यद्यपि बहुविधा: परिभाषा विवेचितास्सन्ति तथापि कण्ठत: प्रकारान्तरेण वापि या: परिभाषास्तेन विदुषा प्रत्याख्यातास्तासां विषये कारणपुरस्सरं विचार: प्रस्तूयते।

तत्र तावत् प्रथमे शास्त्रत्वसम्पादनोद्देशनामके प्रकरणे नैकापि परिभाषा वर्तते यत्र परिभाषेन्दुशेखरकर्त्तुररुचि: स्यात्। तथापि पदाङ्गाधिकारे तस्य च तदन्तस्य च[2] इति परिभाषाविवेचनकाले परिभाषेन्दुशेखरकारेणोक्तं यत् अस्या: परिभाषाया: स्वरूपं कतिभिश्चित् विद्वद्भि: पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य चेत्येवम[3]स्ति किन्तु तेषां वचोभिरश्रद्दधानेन परिभाषेन्दुशेखरकारेणोक्तं यत् अस्मिन्न्यासे परममहानिति प्रयोगे महच्छब्दस्योत्तरपदत्वात् आत्वं सेत्स्यति किन्तु अतिशयितो महान् अतिमहान् परमश्चासौ अतिमहान् परमातिमहान् इत्यत्र महच्छब्दस्योत्तरपदत्वाभावादात्वन्न[4] सिद्ध्येत् तस्मात् तदुत्तरपदस्येति न्यासोऽनुचित:। यतो ह्यस्मिन् प्रकरणे महर्षिणा सूत्रकारेण प्रणीतानां शास्त्राणां तत्वमापाद्यमाना: परिभाषा: शेखरकारेण समाहिता इति धिया अत्रानुपयोगिन्य: परिभाषा: नैव निक्षिप्ता:।सूत्राणां परत्वनित्यत्वादयो धर्मास्तदाश्रितबाध्यबाधकत्वहेतवश्च यावत्पर्यन्तं न व्यवस्थाप्यन्ते तावता कालेन तेषां प्रवृत्तिनिवृत्त्यो: सम्भावनैव नोदेति। द्वितीये बाधबीजप्रकरणे चैतादृश्य: सन्ति काश्चन परिभाषा: यत्र नागेशभट्टमहोदयानामभिरुचिर्नैव स्थैर्यमावहति। असिद्धं बहिरङ्गमन्तरङ्गे[5] इति परिभाषाविवेचनकाले एतन्निर्णीते सति यदन्तर्भूतनिमित्त-

[1] पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि इति नागेशोक्तेर्भगवद्भिरनुक्ताना परिभाषा सन्तीति गम्यते।

[2] परिभाषेन्दुशेखरे परिभाषा- २९।

[3] तदुत्तरपदस्येति पाठोऽयुक्त:इति भाष्ये स्पष्टम् , तत्रैव परिभाषा- २।

[4] सान्तमहत:संयोगस्येति सूत्रस्य अङ्गाधिकारे पठितत्वाद्धेतो:।

[5] परिभाषेन्दुशेखरे परिभाषा- ५०।

केनान्तरङ्गशास्त्रेण बहिर्भूतनिमित्तकस्य बहिरङ्गशास्त्रस्य बाधनं भवति। अत्रैवैका विचिकित्सा भवति यत् कथम्भूतस्य बहिरङ्गस्यान्तरङ्गेण शास्त्रेण बाधनं भवति?अत्र मतमेकन्तादृक्षाणामाचार्याणामुल्लिखितं परिभाषेन्दुशेखरकारेण यज्जातबहिरङ्गस्यासिद्धताबोधनं तु प्रस्तुतपरिभाषयैव भवति किन्तु समकालप्राप्तस्य बहिरङ्गस्यासिद्धत्वमनया न भवितुं शक्नोति तेनास्यामवस्थायां समकालप्राप्तस्य बहिरङ्गस्यासिद्धत्वं सम्पादनाय अन्तरङ्गं बहिरङ्गाद् बलीयः[6] इति भिन्नैवैका परिभाषास्तीति स्वीकरणीया।किन्तु नागेशस्य मतेन पदसंस्कारपक्षे वृश्चति इत्यादिप्रयोगाणां सिद्धये अन्तर्भूतनिमित्तकवलोपसमानकाले एव ङिन्निमित्तकं बहिरङ्गसम्प्रसारणमपि प्राप्नोति अनयैव च परिभाषया सम्प्रसारणत्वासिद्धे उच्चारणसामर्थ्यात् तन्निवार्यते।यतोहि अन्तरङ्गं बहिरङ्गाद् बलीयः इति परिभाषासत्वे उच्चारणसामर्थ्यात्सम्प्रसाणस्य निवारणप्रयासो भाष्यकारस्य विफलः स्यादतोऽशद्वयवतीयमेकैव परिभाषा वर्तते अतोऽन्तरङ्गं बहिरङ्गाद् बलीयः इति परिभाषान्तरमस्तीति कथनं निर्मूलमेवास्ति।

तदनु अन्यैर्वैयाकरणैः कृतसन्धिकार्येभ्यः सूत्थितादिप्रातिपदिकेभ्य एव प्रत्ययानामुत्पत्तिसिद्धये समर्थानां प्रथमाद्वा[7] सूत्रस्थसमर्थानामिति ग्रहणेन ज्ञापितां अकृतव्यूहाः पाणिनीयाः[8] इति परिभाषामपि परिभाषेन्दुशेखरकारः नैवाङ्गीकृतवान्। तत्रास्याः परिभाषाया अनङ्गीकारे कारणमिदमस्ति यत् यत्रास्या परिभाषायाः प्रवृत्तिरिष्टा तत्र पदावधिकान्वाख्यानपक्षः स्वीक्रियते।तथा च तादृशेषु सेदुषः इत्यादिलक्ष्येषु सेद् वस् अस् इति स्थितौ वस्वेकाचाद्धसामिति[9] वसोः सम्प्रसारणमिति[10] सूत्राभ्यां इड्सम्प्रसारणयोः प्राप्तयोः प्रतिपदविधित्वात्पूर्वं सम्प्रसारणमेव भवति ततश्च निमित्ताभावादिट् न प्राप्नोति।अत्र यद्यपि यथा सम्प्रसारणशास्त्रं प्रतिपदविधिरस्ति तथैव वसुग्रहणाद्धेतोः इड्विधिरपि प्रतिपदविधिरेवास्तीति वक्तुं शक्यते तथापि इड्विधिः कृतद्विवचनादेकाचादेव प्राप्नोति तेन सद् वस्

[6] अन्तरङ्गे कर्तव्ये जातं तत्कालप्राप्तिकञ्च बहिरङ्गमसिद्धं एतेन अन्तरङ्गं बहिरङ्गाद् बलीयः इति परिभाषान्तरमित्यपास्तम् तत्रैव परिभाषा- ५०।

[7] पाणिनीयं सूत्रम् ४/१/८२

[8] परिभाषेन्दुशेखरे परिभाषा- ५६।

[9] पाणिनीयं सूत्रम् ७/२/६७

[10] पाणिनीयं सूत्रम् ६/४/१३१

अस् इति स्थितौ तत्वाभावा[11]न्नासौ भवति सम्प्रसारणविधौ तु नैतदावश्यकमिति कृत्वा पूर्वमेतदेव भवति। परिभाषाया अस्या अभावे समर्थानामिति ग्रहणं विषुणः इतिवन्नान्यत्र अकृतसन्धेः प्रत्यया उत्पद्येरन्नित्येवं भ्रमस्यापाकरणार्थमावश्यकमस्तीति बोध्यम्। कैयटाचार्यस्तु कृतमपि कार्यन्निवर्तते इत्युक्त्वा निमित्तापाये नैमित्तिकस्याप्यपाय इति कथयित्वा परिभाषामिमां समर्थयति।

तृतीये शास्त्रशेषप्रकरणे स्वादुमि णमुलिति[12] सूत्रात् णमुल्ग्रहणेऽनुवर्तमाने सत्यपि अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ[13] इति सूत्रे पुनर्णमुल्ग्रहणेन चानुकृष्टं नोत्तरत्र[14] इति परिभाषा ज्ञाप्यते। किन्तु लुटि च क्लृपः[15] इति सूत्रे भाष्यकारोऽनु-वृत्त्यर्थकस्सकलचकाराणां प्रत्याख्यानं कृतवान् अतश्चकारमन्तरेणापि अनुवृत्तिर्भवतीति कृत्वा चानुकृष्टं नोत्तरत्र परिभाषा नागेशेनानङ्गीकृता।

दाण्डिनायनहास्तिनायन...इत्यादि सूत्रे[16] भ्रौणहत्य इत्यत्र तकारनिपातनेन धातोः कार्यमुच्यमानं तत्प्रत्यये भवति परिभाषा ज्ञापिता भवति फलमस्याः कंसपरिमृड्भ्यामिति प्रयोगे मृजेर्वृद्धि[17]रिति वृद्धिर्न भवति। प्राक्तनैरस्याः स्थाने धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमिति परिभाषान्तरं स्वीकुर्वन्ति तन्नागेशाय न रोचतेऽतः अनुदात्तस्य चर्दुपधस्यान्यतरस्या[18]मिति सूत्रे कस्यचिदपि धातोः स्वरूपग्रहणाभावे धातुमुद्दिश्य ये प्रत्यया न विहितास्तत्रापि अस्याः प्रवृत्तौ प्रकृतसूत्रेण प्रसृड्भ्याम् प्रसृड्भिरित्यादौ अमागमापत्तेर्न पाठान्तरं सम्यगिति। अयमनयोरतिशयेन वृद्धः इति विग्रहे वृद्धशब्दादीयसुनि प्रकृतिभागे ज्यादेशे ईलोपं कृत्वा अकृत्सार्वधातुकयोर्दीर्घः[19] सूत्रेण दीर्घे सति ज्यायानिति रूपसिद्धिसम्भवेऽपि ज्यादादीयसः सूत्रस्थेन आत्ग्रहणेन

---

[11] एत्वहलादिशेषत्वयोः प्रवृत्यनन्तरमेव कृतद्विर्वचनैकाच्त्वयोर्लाभः संभवति।
[12] पाणिनीयं सूत्रम् - ३/४/२६
[13] पाणिनीयं सूत्रम् -३/४/५९
[14] परिभाषेन्दुशेखरे परिभाषा- ५६।
[15] पाणिनीयं सूत्रम् -१/३/९३
[16] पाणिनीयं सूत्रम् ६/४/१७४
[17] पाणिनीयं सूत्रम् - ७/२/११४
[18] पाणिनीयं सूत्रम् ६/१/५९
१९ पाणिनीयं सूत्रम् -७/४/२५

अङ्गवृत्तेः पुनर्वृत्तावविधिः[20] इति परिभाषा ज्ञाप्यते किन्तु अनया परिभाषया न किंचिल्लक्ष्यं साध्यते इति कथयित्वा नागेशेनेयन्नाङ्गीक्रियते।

उकारस्य स्थाने विधेयो गुणः स्थानकृतान्तरतम्यादोकारो नियतरूपेणैव भविष्यति तस्मात् ओरोत् इति सूत्रमेव लाघवादुपदेष्टव्यम् किन्तु ओर्गुण इति गौरवयुक्तोपदेशः संज्ञापूर्वकविधेरनित्यत्वम् इति परिभाषां ज्ञापयति तत्फलं स्वायम्भुवम् इति प्रयोगे गुणो न भवति इति।किन्तु परिभाषाषेयं भाष्येऽव्याख्याता तेनेयन्नस्त्येव तथा च तादृशानां सूत्राणां सूत्राक्षराणां वा येषां ज्ञापकता भाष्येऽनुक्ता तेषां साधुतानियामकत्वे प्रामण्यमनङ्गीकरणीयं तानि च सूत्राणि सूत्राक्षराणि वादृष्टसाधकान्येव सन्तीति श्रीमन्नागेशभट्टानामाशयो मन्तव्यः।आनि लोडिति[21] सूत्रे आडागमविशिष्ट आनीति ग्रहणसामर्थ्यात् ज्ञापितां आगमशास्त्रमनित्यम्[22] इति परिभाषामपि तस्मादेव कारणान्नाङ्गीकरोति। तनादौ च कृञः पाठे सत्यपि तनादिकृञ्भ्य उः सूत्रे कृञ्ग्रहणात् गणकार्यमनित्यम्[23] इत्येषा परिभाषा अपि स्वीकर्तुं योग्या नास्ति यतोहि महाभाष्यकारेण तनादित्वादेव कार्ये सिद्धे तनादिकृञ्भ्य उः सूत्रे कृञ्ग्रहणं प्रत्याख्यातम् प्रत्याख्येयपदेन ज्ञापनं न संभवति परिभाषाया अभावे तु तपःपूतानां ऋषीणां तपःप्रभावेण विश्वसेत् स्तुन्वन्ति इत्यादिशब्दाः निर्दुष्टाः।चक्षिङ् व्यक्तायां वाचि धातौ अनुदात्तस्येकारस्योपदेशे सत्यपि ङित्करणेन अनुदात्तेत्वलक्षणमात्मने-पदमनित्यम्[24] इति प्राचीनैः स्वीकृता परिभाषा अपि नागेशेन प्रत्याख्याता। तत्र कारणमिदमस्ति यच्चक्षिङो ङित्करणेन इकारोऽन्ते नोपदिष्टः स्वीक्रियते। ङकाराभावे अन्ते इदित्वात्वं स्यात्ततश्च इदितो नुम्धातोः[25] इति नुमागमः स्यात्तद्वारणाय ङित्करणं सप्रयोजनकमस्ति।सति प्रयोजने न ज्ञापकता संभवति तस्मादियमनुदात्तेत्व-लक्षणमात्मनेपदमनित्यम् इति परिभाषा नास्ति ।तदनु विनार्थकेन नञा समासे सति अनुदात्तं पदमनेकमित्येवं सूत्रोपदेशे लाघवे सत्यपि कर्मप्रत्ययान्तं वर्जविशिष्टमनुदात्तं

[20] परिभाषेन्दुशेखरे परिभाषा- ५६।
[21] पाणिनीयं सूत्रम् -८/४/१६
[22] परिभाषेन्दुशेखरे परिभाषा- ९५।
[23] परिभाषेन्दुशेखरे परिभाषा- ९६।
[24] परिभाषेन्दुशेखरे परिभाषा- ९७।
[25] पाणिनीयं सूत्रम् -७/१/५८

पदमेकवर्जम्[26] इति सूत्रे वर्जमिति ग्रहणेन नञ्घटितमनित्यम्[27] इति परिभाषा ज्ञाप्यते तस्या: फलं हे सुभ्रु! इत्यत्र नेयङुवङ्स्थानावस्त्री सूत्रं नञ्घटितत्वादनित्यन्तेन सर्वत्र नदीसंज्ञानिषेधोऽनेन न कर्तुं शक्यतेऽत: नदीत्वात् अम्बार्थनद्योर्ह्रस्व: सूत्रेण ह्रस्व: सिध्यति।नागेश इमामपि परिभाषां नाङ्गीकरोति कारणं पत्नीविरहपीडितस्य श्रीरामचन्द्रस्य मुखान्निर्गतं वाक्यं कव्यानुगुणमेवास्ति।लोटो लङ्वत्[28] सूत्रस्य स्थाने ङ्लोट् इति पाठेनैव ङित्वे लभ्येऽपि लङ्वत् निर्देशेन आतिदेशिकमनित्यम्[29] परिभाषा वर्तते इत्यनुमीयते नागेशस्तन्न मनुते यतोहि सिजभ्यस्तविदिभ्यश्च[30] सूत्रे यथा सिच: परस्य अनतिदिष्टस्य ङित:स्थाने जुस् भवति तथैव सिच्साहचर्यात् अभ्यस्तात्परस्य अनतिदिष्टस्यैव ङिल्लकारस्य स्थाने विहितस्य झिप्रत्ययस्य जुसादेशो भवितुमर्हति अत: परिभाषा अनावश्यकी।

नाग्लोपिशास्वृदिताम्[31] इति सूत्रेऽक्ग्रहणेन आर्धधातुकस्येड्वलादे: सूत्रे इड्ग्रहणेन च सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान्[32] इति परिभाषा ज्ञापयितुं शक्यते इति ब्रुवताम्प्रति नागेशस्य आशयो वर्तते यत् वृद्धेर्लोपो बलीयान्[33] इति भाष्येण वृद्ध्यपेक्षया एव लोपविधेर्बलत्वमुच्यते न तु सर्वविधिभ्य: तथा च नेड्वशि कृति[34] सूत्रादेवात्र इड्ग्रहणमनुवर्त्य अत्रत्येड्ग्रहणं प्रत्याख्यातं प्रत्याख्यातपदेन परिभाषाज्ञापनमनुचितमेवास्ति इत्येवं विचिन्त्य नागेशेनेयं नादृता।

हन्धातोर्यङ्लुकि द्वित्वानन्तरं हन्हन् समुदये हन्निरूपित प्रकृतित्वसिद्धये प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्[35] इति न्यायसिद्धा परिभाषा स्वीकरणीया इति प्राक्तनै: कथिते नागेशेनोच्यते यत् अस् धातोर्लिटि द्वित्वभूभावयोर्युगपत्प्राप्तौ

[26] पाणिनीयं सूत्रम् -६/१/१५८
[27] परिभाषेन्दुशेखरे परिभाषा- ९८।
[28] पाणिनीयं सूत्रम् -३/४/८५
[29] परिभाषेन्दुशेखरे परिभाषा- ९९।
[30] पाणिनीयं सूत्रम् -३/४/१०९
[31] पाणिनीयं सूत्रम् ७/४/२
[32] परिभाषेन्दुशेखरे परिभाषा- १००।
[33] महाभाष्यम्।
[34] पाणिनीयं सूत्रम् -७/२/८
[35] परिभाषेन्दुशेखरे परिभाषा- १०१।

परत्वाद्भूभावे सति अभ्यासोत्तरखण्डस्य भू इत्यादेशे सति अनिष्टस्याकारस्य श्रवणं भविष्यति एवं दोषमुद्भाव्य भागवतोक्तं यत् आर्धधातुके इत्यत्र विषयसप्तम्यन्ततामाश्रित्य प्रत्ययोत्पत्तेः प्रागेव भू इत्यादेशो भवति।यदि प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् इति परिभाषा अस्ति तर्हि भाष्यकारस्य शंकासमाधानं व्यर्थमेव यतोहि द्वित्वोत्तरं तद्विशिष्टे प्रकृतित्वमाश्रित्य अस् अस् इत्यत्र भू इत्यादेशः सिध्यत्येव।आर्धधातुके इति पदे विषयसप्तम्यन्ततामाश्रयणेन भाष्ये क्वापि दर्शनाभावेन च प्रकृतपरिभाषा नास्ति।

शाला माला इत्यादि स्वभावतो वृद्धिसंज्ञकवर्णयुक्तानामपि शब्दानां वृद्धिर्यस्याचामादिस्तद्वृद्धम्[36] इति सूत्रेण वृद्धसंज्ञासिद्धये विधौ परिभाषोपतिष्ठते नानुवादे[37] इति परिभाषा प्राचीनैः स्वीकृता नागेशेन प्रत्याख्यायते।तत्र कारणमस्ति यत् उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य इति सूत्रे परम्परया विधेय विशेषणे षष्ठी स्थानेयोगा[38] इति परिभाषासूत्रस्य सञ्चारणेन ष्यङः सम्प्रसारणं पुत्रपत्योः[39] सूत्रे अल्लोपोऽनः सूत्रस्यार्थविचारे विधेयस्य परम्परया विशेषणे भसंज्ञयाक्षिप्ते यजाद्यसर्वनामस्थाने इत्यत्र तस्मिन्निति परिभाषायाः सञ्चारणेन भाष्ये क्वापि दर्शनाभावेन च प्रकृत परिभाषा नास्ति। अलोऽन्त्यात्पूर्व उपधा इति सूत्रे स्पष्टा तत्रैव तस्या फलानामन्यथासिद्धिकरणेन च प्रचीनैः स्वीकृता नाऽनर्थकेऽलोन्त्यविधिरनभ्यासविकारे इत्येषा परिभाषा अप्यस्वीकृता परिभाषाकृता।

चिकीर्षतीत्यादौ ऋद्दिद्धातोः[40] सूत्रेण ऋस्थाने इदादेशे तद्गतं तित्वमाश्रित्य तित्स्वरितम्[41] सूत्रेण स्वरितत्ववारणाय प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणमिति[42] अङ्गस्येति सूत्रे पठिता परिभाषा एकदेशिना पठिता लक्ष्यसंस्काराय च नाश्रिता इति कैयटवचनाच्च प्राक्तनैरङ्गीकृतापि नागेशेनानङ्गीक्रियते।

सर्वादीनि सर्वनामानि[43] इति सूत्रे णत्वाभावनिपातनेन शास्त्रवदेव लोकेऽपि

---

[36] पाणिनीयं सूत्रम् -१/१/७३

[37] परिभाषेन्दुशेखरे परिभाषा- १०२।

[38] पाणिनीयं सूत्रम् १/१/४९

[39] पाणिनीयं सूत्रम् ६/१/१३

[40] पाणिनीयं सूत्रम् -७/१/१००

[41] पाणिनीयं सूत्रम् -६/१/१८५

[42] परिभाषेन्दुशेखरे परिभाषा- १११।

[43] पाणिनीयं सूत्रम् -१/१/१७

बाधकान्येव निपातनानि [44]इति परिभाषाबलात् णत्वरहितस्यैव सर्वनामशब्दस्य प्रयोगो भवति। वृत्तिकृता तु पुरातनशब्दे ट्युप्रत्ययस्य तुडागमसिद्धये बाधकान्यपि निपातनानि[45] इति परिभाषान्तरमङ्गीकृता नागेशस्त्विमान्नाङ्गीकरोति सर्वादीनि सर्वनामानि इति सूत्रेण विरुद्धेयमस्तीति कारणन्तत्रास्ति।

व्यध् ताडने इति धातोर्लिटि तिपो णलादेशे द्वित्वे च सति समानकाले एव लिट्यभ्यासस्योभयेषाम्[46] इति सूत्रेण सम्प्रसारणं हलादिशेषश्च प्राप्नुतः।परत्वात्पूर्वं हलादिशेषेऽवशिष्टस्य वस्य सम्प्रसारणे सत्यनभीष्टशब्दस्य सिद्धिं वीक्ष्य सम्प्रसारणं तदाश्रयं कार्यञ्च बलवदिति[47] परिभाषया दोषोद्धरणं कुर्वन्ति प्राचीनाः किन्तु नागेशेनेयमपि अस्वीकृता। तत्र कारणमस्ति यत् सूत्रेऽस्मिन् पूर्वसूत्रात् ग्रह्यादिवच्यादि-ग्रहणञ्चानुवर्त्य अभीष्टसिद्धिस्त्वेऽपि तथा न कृत्वा उभयेषां ग्रहणेन ग्रह्यादिवच्यादिनाम-भ्यासस्य सम्प्रसारणमेव भवतीति लभ्यते अत इयमनावश्यकी।

निसमुपविभ्यो ह्वः[48] सूत्रे ह्वा इति विकृतशब्देन तत्प्रकृतिभूतस्य ह्वेञो ग्रहणार्थं क्वचिद्विकृतिः प्रकृतिं गृह्णाति[49] इत्येषा परिभाषा स्वीकरणीया दादेर्धातोर्घः[50] सूत्रे औपदेशिकदादिधातुग्रहणाय दामलिहमात्मानमिच्छतीति विग्रहे दामलिह् इति प्रायोगिकस्य ग्रहणाभावाय च औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणमिति[51] च परिभाषाद्वयी मन्तव्येति प्रश्ने नागेशो वदति तयोर्निर्मूलत्वाद्भाष्याव्यवहृतत्वाच्च न। अर्थात् न च विकृतिः प्रकृतिं गृह्णाति उक्त्वा भाष्यकृता पूर्वा परिभाषा प्रत्याख्याता। सूत्रकृता वार्तिककृता च आवश्यकतानुसारम् उपदेशग्रहणं कृतं तेन द्वितीया चापि नास्तीति कृत्वा परिभाषाद्वयी नाङ्गीकरणीया।

एकाच उपदेशेऽनुदत्तात्[52] इति सूत्रे एकाज्ग्रहणेन श्तिपा शपानुबन्धेन निर्दिष्टं

---

[44] परिभाषेन्दुशेखरे परिभाषा- ९६।

[45] तत्रैव परिभाषेन्दुशेखरे ।

[46] पाणिनीयं सूत्रम् -६/१/१७

[47] परिभाषेन्दुशेखरे परिभाषा- १२८।

[48] पाणिनीयं सूत्रम् -१/३/३०

[49] परिभाषेन्दुशेखरे परिभाषा- १२९।

[50] पाणिनीयं सूत्रम् -८/२/३२

[51] परिभाषेन्दुशेखरे परिभाषा- १३०।

[52] पाणिनीयं सूत्रम् -७/२/१०

यद्गणेन च। यत्रैकाज्ग्रहणञ्चैव पञ्चैतानि न यङ्लुकि इति परिभाषा एकदेशानुमत्या ज्ञापिता प्राचीनैः लक्ष्यसाधनाय आश्रिता नागेशेन च अस्वीकृता। महाभाष्ये इयन्न दृश्यते हन्धातोः स्थाने जायमानो वधादेशश्च अदन्तः ततश्च अवधीत् इत्यत्र अतो हलादेर्लघोः[53] सूत्रेण वृद्धिविधानकाले लुप्तस्याकारस्य स्थानिवत्वेन तत्र दर्शनात् अनेकाजयमस्ति। ततश्चात्र अनेकाच्त्वमाश्रित्य इण्निषेधो न भवेत्तदर्थं सूत्रे एकाज्ग्रहणमावश्यकमस्ति अत अस्यां परिभाषायाम् एकाज्ग्रहणं ज्ञापकं न भवितुमर्हति अतो नेयं परिभाषा स्वीकरणीया।

रधिजभोरचि[54] नेट्यलिटि रधेः[55] सूत्रयोश्च रध् धातोर्ग्रहणे गौरवमस्ति किन्तु सूत्रकृता स एव मार्गोऽवलम्बितः तदपेक्षया तु योगविभागपुरस्सरं जभोऽचि रधेश्च इति पाठे लाघवमस्ति तथापि योगविभागोऽनाश्रितस्तेन पदविभागाद्योगविभागो गरीयानिति परिभाषा सिध्यतीति केषाञ्चन विदुषां मतमस्ति ।किन्तु टाङसिङसामिनात्स्याः[56] सूत्रे भाष्ये योगविभागमाश्रित्य इनादेशे इकारो प्रत्याख्यातः तेनेयं परिभाषा विरुद्धा अतो नादर्तव्या इति नागेशस्याशयः।

तदेवं प्रथमे शास्त्रत्वसम्पादनोद्देशप्रकरणे पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य चेत्येका द्वितीये बाधबीजप्रकरणे अन्तरङ्गं बहिरङ्गाद् बलीयः नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः अकृतव्यूहाः पाणिनीयाः तस्याः समानार्थिका निमित्तापाये नैमित्तिकस्याप्यपायः इति परिभाषाद्वयी तृतीये शास्त्रशेषप्रकरणे चानुकृष्टं नोत्तरत्र धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम् अङ्गवृत्तेःपुनर्वृत्तावविधिः संज्ञापूर्वकविधेरनित्यत्वम् आगमशास्त्रमनित्यम् गणकार्यमनित्यम् अनुदात्तेत्वलक्षणमात्मनेपदमनित्यम् नञ्घटितमनित्यम् आतिदेशिक-मनित्यम् सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान् प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् विधौ परिभाषोपतिष्ठते नानुवादे नाऽनर्थकेऽलोन्त्यविधिरनभ्यासविकारे प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम् निपातनानि अबाकान्यपि सम्प्रसारणं तदश्रयकार्यञ्च बलवत् औपदेशिक-प्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् क्वचिद्विकृतिः प्रकृतिं गृह्णाति श्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च। यत्रैकाज्ग्रहणञ्चैव पञ्चैतानि न यङ्लुकि पदविभागाद्योगविभागो गरीयानिति विंशतिः परिभाषाः सविस्तरं विविच्य प्रत्याख्याताः। **हरिःॐ**

[53] पाणिनीयं सूत्रम् -७/२/७
[54] पाणिनीयं सूत्रम् -७/१/६१
[55] पाणिनीयं सूत्रम् -७/१/६२
[56] पाणिनीयं सूत्रम् -७/१/१२

# भर्तृहरेःसाहित्यमकुटः

**डा.ई.पि.श्रीदेवी, साहित्यविभागः पावरट्टी केन्द्रम्**

प्राशस्तवैय्याकरणस्य कवेःराज्ञश्च भर्तृहरेःसाहित्यमकुटः भवति शतकत्रयेऽन्तर्भूतं श्रृङ्गारशतकम्। नीतिशतकं- श्रृङ्गारशतकं- वैराग्यशतकं चेति शतकत्रयं भवति। नीतिशतकस्य समाधिकः प्रचारः उपलब्धः। वैराग्यशतकस्य लेखनेकापि कथा आधारिता वर्तते। सा कथा- भर्तृहरिः उज्जयिनीनराधिपः आसीत्। एकस्मिन् दिनेकश्चन सन्यासी भर्तृहरयेएकं विशिष्टं फलमदात्, यस्य खादनेन सः मनुजः मरणरहितः जायेत। भर्तृहरिः एवमचिन्तयत् यत् स्वस्य पत्नी स्वस्मादपि प्रियतरा, अतस्तस्यै तत् फलं ददामीति। सा राज्ञी अन्यपुरुषासक्ता आसीत्। अतः तत् फलं सा तस्मै पुरुषाय अदात्। स पुरुषः तत् फलं स्वं प्रीतितत्परायै अन्यस्यै अदात्। एवं एकैकोऽपि आत्मनः प्रियतराय (तरायै) अदात् । भर्तृहरिस्तु आत्मना स्वपत्न्यै दत्तं फलं कस्याश्चित् वेश्यायाः हस्तेदृष्टिमिति तत् कथं सम्भूतमिति अन्वेषणं चकार। तदा सर्वं विदितं जातम्। तदनन्तरं भर्तृहरिः विरक्तोजातः, सन्यासं स्वीकृतवान् च। तत् पद्यं नीतिशतकेद्वितीयं भवति। तत्पद्यं यथा -

**'यां चिन्तयामि सततं मयि सा विरक्ता साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।**
**अस्मत्कृते च परितुष्यति काचिदन्या धिक् तां च तं च मदनं च इमां च मां च॥**[1]

अत्रेदं विशेषतः श्रद्धेयं यत् एतत् पद्यं नीतिशतकेवर्ततेयेन वैराग्यं पुष्टं जातं, न तु वैराग्यशतके। प्रस्तुतश्लोकेश्रृङ्गाराभासः फलति।

**श्रृङ्गारशतकम्-**

श्रृङ्गारशतकेआहत्य एकशतं (101) पद्यानि सन्ति। पद्यानि मुक्तकानि भवन्ति। श्रृङ्गारशतकस्य मङ्गलपद्यं यथा -

**शम्भुस्वयंभुहरयोहरिणे क्षणानां येनाक्रियन्त सततं गृहकुम्भदासाः।**
**वाचामगोचरचरित्रविचित्रिताय तस्मै नमोभगवतेमकरध्वजाय॥**[2]

लोकस्य सृष्टिस्थितिलयकर्तारः ब्रह्मविष्णुमहेश्वराः येन मृगेक्षणानां तत्तत्पत्नीनां गृहकर्मकारिणो भृत्याः अक्रियन्त, वाचामगोचरचरित्रविचित्रिताय तस्मै भगवतोमकर-ध्वजाय नम इत्यर्थः। काम एव त्रिमूर्तिभ्योऽप्युत्कृष्ट इति सारः। श्रृङ्गारशतकमुक्तकानि पञ्चधा विभक्तानि। तानि यथा स्त्रीप्रशंसाविंशतिः, सम्भोगवर्णनाविंशतिः, कामिनीगर्हणविंशतिः, सुविरक्तदुर्विरक्तवर्णनम् ,

ऋतुवर्णनविंशतिश्चेति पञ्चविंशतयः सन्ति। सर्वेषु विभागेषु मुख्यः श्रृङ्गारः विलसति। केचन श्लोकाः वस्तुपरकाः, केचन श्लोकाःशास्त्रान्तरसम्बन्धिनः, केचनालङ्कारयुताः, केचन गुणप्रौढियुक्ताः, केचन ध्वनियुक्ताः, केचन रसयुक्ताश्च सन्ति। दोषयुक्ता अपि सन्ति।

**वस्तुपरकाः श्लोकाः -**

वस्तुपरकाः श्लोकाः बहवोवर्तन्ते। द्वित्रीण्युदाहरणानि यथा-

**भ्रूचातुर्यात् कुञ्चिताः सत्कटाक्षाः स्निग्धा वाचोलज्जिताश्चैव हासाः।**
**लीलामन्दं प्रस्थितं च स्थितं च स्त्रीणामेतत् भूषणं चायुधं च॥**[3]

भ्रुकुटीवक्रितसहिता कटाक्षाः, स्नेहयुक्ताः वाण्यः, लज्जासहिताः हासाः, लीलयाऽलसगमनं, तस्याः स्थितं च सर्वं स्त्रीणां भूषणं भवति तथैवायुधं च भवति। अत्र श्लोकेउपयुक्तं सर्वं भूषणं तथायुधं च भवतीति वस्तु प्रस्तुतम्। वस्तुपरकमन्यत् पद्यं यथा - **स्मितेन भावेन च लज्जया भिया पराङ्मुखैरर्धकटाक्षवीक्षणैः।**
**वचोभिरीर्ष्याकलहेन लीलया समस्तभावैः खलु बन्धनं स्त्रियः॥**[4]

शतकत्रयस्य मलयालभाषानुवाद; सुन्दरोऽस्ति यत् श्रीमता पी.के.के.नम्प्यारेण कृतः। तत्रास्य पद्यस्यानुवादोयथा -

ഓമൽപുഞ്ചിരി, വശ്യമാംനില, വള-
ന്നീടുന്ന നാണം, ഭയം,
സീമാതീതമൊളിഞ്ഞുകണ്ണിണതിരി
ച്ചുളളോരു നോട്ടങ്ങളും
പ്രേമക്കൊഞ്ചലിടക്കിടക്കുകലഹം
ലീലാവിലാസംമുറ -
ക്കീമട്ടേതു നിലക്കുമീയുലകിനെ
ബന്ധിപ്പു നാരീജനം[5]

अर्थः स्पष्टः। **शास्त्रान्तरपरामर्शाः -** क्वचित् भर्तृहरिः शास्त्रान्तरपरामर्शानुसारं श्लोकान् रचितवान्। तदुदाहरणे यथा -

**गुरुणा स्तनभारेण मुखचन्द्रेण भास्वता।**
**शनैश्चराभ्यां पादाभ्यां रेजेग्रहमयीव सा॥**[6]

अत्र स्तनभारस्य कृतेगुरुणेति पदन्यासः सुरगुरुं बृहस्पतिं मुखचन्द्रेण इत्यत्र ताद्रूप्यरूपकेण चन्द्रपदन्यास मनोमातृकारकं ग्रहं चन्द्रं भास्वतेत्यस्य श्लेषेण कर्माधिपं सूर्यग्रहं नायिकायाः पादन्यसनाय शनैश्चरपदप्रयोगः शनिग्रहं च सम्बध्नन्ति। एतत्सर्वं तस्य ज्योतिषशास्त्रविषयज्ञानं प्रस्पष्टयति। तत् वाच्यतयोक्तं च ग्रहमयीवेति। एतत्पूर्वं पद्यमपि एतत्समानं वर्तते। यथा -

**मुखेन चन्द्रकान्तेन महानीलैः शिरोरुहैः।**

**कराभ्यां पद्मरागाभ्यां रेजेमणिमयीव सा॥**[7] इति॥

अस्मिन् पद्येनायिकायाः मुखकुन्तलकराः वर्णिताः, यत्र चन्द्रकान्तमणि - इन्द्रनीलमणि - पद्मरागमणिश्च घटिताः।

**अलङ्कारयोजना - यमकालङ्कारः-**

इदं श्रृङ्गारशतकं उचितालङ्कारैरलङ्कृतम्। यमकोपमादिभिर्भूषितम्। यथा -

**आवासः क्रियतां गाङ्गेपापवारिणि वारिणि।**

**स्तनद्वयेतरुण्या वा मनोहारिणि हारिणि॥**[8]

पापवारिणि पापनाशकेगाङ्गेवारिणि गङ्गाजलेआवासः क्रियताम्। वा अथवा तरुण्याः हारिणि हारयुक्तेमनोहरिणि स्तनद्वयेआवासः क्रियताम् इत्यनुषज्यते। अत्र वारिणि वारिणि हारिणि हारिणीति च यमकालङ्कारः। पूर्वार्धेपापवारिणीत्यत्र वारिणिपदस्य समासघटितत्वेन निरर्थकत्वम्। द्वितीयवारिणिपदस्य पूर्णतया सार्थकत्वम्. उत्तरार्धे मनोहारिणीत्यत्र सभङ्गत्वेन हारिणिपदस्य निरर्थकत्वम्। द्वितीयहारिणिपदस्य सार्थकत्वं च। श्लोकस्यास्य आशयः अत्रैव ग्रन्थेउभयत्र दत्तं वर्तते। यथा -

**मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमिदं वदन्तु।**

**सेव्याः नितम्बाः किमु भूधाराणामुत स्मरस्मेरविलासिनीनाम्॥**[9]

अत्र शान्ताः पर्वतनितम्बभगान् नाम सानुप्रदेशान् (तपश्चर्यार्थम्) आश्रयन्ति उत श्रृङ्गेरिणः स्मरस्मेरविलासिनीनां नितम्बान् कटिप्रदेशान् आश्रयन्ति इत्यर्थः। तदाशययुक्तः अन्यश्लोकोयथा-

**किमिह बहुभिरुक्तैर्युक्तिशून्यैः प्रलापैः द्वयमिह पूरुषाणां सर्वदा सेवनीयम्।**

**अभिनवमदलीलालालसं सुन्दरीणां स्तनभरपरिखिन्नं यौवनं वा वनं वा॥**[10]

अत्र सुन्दरिणां यौवनं वा सेवनीयम् उत वनं वा सेवनीयमित्याशयः पुनरुक्तः।

**उपमालङ्कारः-**

उपमालङ्कारोदाहरणाय प्रदर्श्यते पद्यं यथा-

**तरुणीवैषोद्दीपितकामाविकसज्जातीकुसुमसुगन्धिः।**

**उन्नतपीनपयोधरभारा प्रावृट् कुरुतेकस्य न हर्षम्॥**[11]

प्रफुल्लजातीकुसुमसुगन्धिः उन्नतपीनपयोधरभारा प्रावृट् वर्षाकालः तरुणी इव

उद्दीपितकामा कस्य हर्षं न कुरुते,नाम सर्वेषां हर्षं कुरुतेइत्यर्थ:। अत्र प्रावृट् उपमेया, तरुणी उपमानम् उद्दीपितकामत्वं साधारणधर्म: इव उपमावाचकश्चेति चत्वारोघटका: मिलित्वा पूर्णोपमासमन्वय:।

**रुपकालङ्कार:-**

अयं भर्तृहरि: रूपकालङ्कारप्रयोगचतुरोभवति। एकमुदाहरणं यथा -

**कामिनीकायकान्तारे कुचपर्वतदुर्गमे।**

**मा सञ्चर मन:पान्थ तत्रास्तेस्मरतस्कर:॥**[12] इति।

हेमन:पान्थ, कामिन्या: काय एव कान्तारस्तस्मिन् शरीरवनेदुर्गमेकुच एव पर्वतस्तस्मिन् मा सञ्चर। यत: तत्र स्मर एव तस्कर स आस्तेइत्यर्थ:। अत्रानुष्टुप् पद्येचतुर्षु पादेषु चत्वारोरूपकालङ्कारा: प्रयुक्ता:। अत्र कायेकान्तारसत्वस्य कुचेपर्वतत्वस्य चारोप: मनसि पान्थावारोपस्य कारणं भवतीति परम्परितरूपकम्। पुनरत्र मन: पान्थस्य सञ्चारनिषेधस्य हेतुर्भवति तत्र स्मरतस्कर: स्थितोभवतीति। प्रस्तुतरूपकं सञ्चारनिषेधकार्यस्य वाक्यार्थमूलककारणं भवतीति वाक्यगतकाव्यलिङ्गा-लङ्कारोऽप्यत्र वर्तते। चमत्कारायते चेति सहृदयानामानन्द: जायते। परं चात्र यौवनो-पेतकामिनी पुरुषस्य चेत: हरतीति वस्तु व्यज्यतेच।

**गुणसन्निवेशः -**

श्रृङ्गारशतकेगुणसन्निवेशोऽपि कवि: श्रद्धालुरेव। ग्रन्थेऽस्मिन् प्रसादगुणप्रसर: अधिको वर्तते। एकमुदाहरणं यथा -

**द्रष्टव्येषु किमुत्तमं मृगदृशां प्रेमप्रसन्नं मुखं**

**घ्रातव्येषु च किं,तदास्यपवन:श्रव्येषु किं, तद्वच:।**

**किं खाद्येषु, तदोष्ठपल्लवरस:स्पृश्येषु किं, तद्वपु:**

**ध्येयं किं, नवयौवनं सहृदयै:सर्वत्र तद्विभ्रम:॥**[13]

अत्र एतत्पद्यपठनसमनन्तरमेवार्थप्रवेशः जायते। अत:

**शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव य:।।**

**व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थिति:॥**[14]

इति लक्षणोक्त: प्रसादगुण: सङ्घटते। परं चात्र भोजराजानुमत: वाकोवाक्योक्ताल-ङ्कारोऽपि। उक्तिप्रत्युक्तिभ्यां वाकोवाक्यं प्रचक्षतेइति तल्लक्षणाशय:।

पुनश्चात्र पद्येनेत्र- घ्राण- श्रवण- रसना- त्वचः पञ्च ज्ञानेन्द्रियाणि तत्तद्विषयप्रति-पादकतया उपात्तानीति तत्सर्वमेकेन पद्येन निर्व्यूढमित्यपि विशेषतोवक्तव्यः। अत्र वैदर्भीरीतिश्च स्पष्टा।

**माधुर्यगुणः-**

**कुङ्कुमपङ्ककलङ्कितदेहा तुङ्गपयोधरकम्पितहारा।**

**नूपुरहंसरणत्पदपद्मा कं न वशीकुरुतेभुवि रामा॥**[15]

अत्र "आह्लादकत्वं माधुर्यं श्रृङ्गारेद्रुतिकारणम्"[16] इति लक्षणानुसारी माधुर्यगुणः देदीप्यते। अत्र वर्णानां माधुर्यव्यञ्जकत्वं श्रवणस्पष्टं भवति।

**ध्वनिघटना -**

श्रृङ्गारशतकेतत्र तत्र ध्वनिघटनापि राराज्यते, यथा-

**मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमिदं वदन्तु।**

**सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम्॥**

पद्यमिदं पूर्वमुक्तं भवति। काव्यप्रकाशेपञ्चमोल्लासेपद्यमिदं ध्वनिसहितमिति प्रस्तुतम्। तत्र वाच्यव्यङ्ग्ययोः स्वरूपभेदकथनाय इदमुदाहृतम्। हेआर्याः, भवन्त पर्वतानां नितम्बाः उत स्मरस्मेरविलासिनीनां नितम्बाः सेव्याः इति सप्रमाणं वदन्तु। अत्र उतेति संशयार्थे। अत्र वाच्यः संशयः। व्यङ्ग्यस्तु शान्तश्रृङ्गार्यन्यतरगतनिश्चय इति स्वरूपवैलक्षण्यम्।

**रसयोजना -**

श्रृङ्गारशतकेश्रृङ्गारस्य सम्भोगविप्रलम्भयोरपि रसयोः योजना कृता वर्तते। तयोः सम्भोगश्रृङागारस्यैकं पद्यं पश्यामः।

**प्रङ्गामेति मनागनागतरसंजाताभिलाषं ततः**

**सव्रीलं तनु विश्रमोद्यममनुप्रध्वस्तधैर्यं पुनः।**

**प्रेमार्द्रं स्पृहणीयनिर्भररहःक्रीडाप्रगल्भं ततो**

**निस्सङ्गाङ्गविकर्षणोदितसुखंरम्यं कुलस्त्रीरतम्॥**[17]

एतावत्पर्यन्तम् अननुभूतसुखं यत्तत्र जाताभिलाषा ततः सव्रीला, तत विश्रामार्थमुद्युक्ता सती गलितधैर्या पुनः प्रेमार्द्रस्पृहणीयपूर्णरहः क्रीडां विधायानन्तरं अङ्गविकर्षणजातसुखा बभूव। तदीयं कुलस्त्रीरतं रम्यम् इत्यर्थः। अत्रोत्तमयुवप्रकृतिकौ

नायिकानायकावलम्बनविभावौ स्त:। रह: क्रीडेत्युक्ते: विजनत्वमुद्दीपनविभाव:। स्पृहणीयनिर्भररहक्रीडाप्रगल्भम् इति पदगम्या: चेष्टाविशेषाः अनुभावा:। औत्सुक्यहर्षादयो व्यभिचारिभावाश्च मिलित्वा सम्भोगश्रृङ्गार आस्वाद्यते।

**दोषा: -**

अत्र काव्येगुणालङ्कारदय इव क्वचित् दोषा अपि सन्ति, यत: कविरपि मनुष्य एव। प्रतिकूलवर्णेत्यादि वाक्यदोषेअधिकपदत्वं नाम दोषोऽपि वर्ततेइत्यस्य कृते भर्तृहरिः इदमनुचितमिति पद्यं दत्तम्। तत्पद्यं यथा -

**इदमनुचितमक्रमश्च पुंसां यदिह जरास्वपि मन्मथोविकार:।**
**तदपि च न कृतं नितम्बिनीनां स्तनपतनावधि जीवितं रतं वा॥**[18]

इह जगति पुसां जरास्वपि मान्मथा विकारा: इतीदम् अनुचितम् अक्रमश्च नाम शास्त्रवैरुध्येनासम्प्रदायश्च। बाल्येविद्याया:, यौवनेस्त्रिय:, वार्धक्येधर्मस्य च सेवनं शास्त्रानुमतम्। स्त्रीणां स्तनपतनावधि जीवितं रतं वा न कृतं चेत् अनुचितम्। अत्र कृतमित्यधिकपदं नाम दोषोऽयम्। परं चास्मिन् शतकेविविधानि वृत्तानि प्रयुक्तानि इति तदपि उचितं कृतम्। एवं गुणालङ्कारध्वनिरसादय: सर्वेऽपि साहित्यघटका: सुन्दरतया राराज्यन्तेऽत्र। श्रृङ्गारशतकं साहित्यस्य मकुट एव।

इति शम्।

# References:


1.Threeshatakas of Bhartrihari नीतिशतकम् 2
2. Bhartrihari श्रृङ्गारशतकम् 1
3. Bhartrihari श्रृङ्गारशतकम् स्त्रीप्रशंसाविंशति:1
4. Bhartrihari श्रृङ्गारशतकम् स्त्रीप्रशंसाविंशति:2
5. शतकत्रयम् श्रृङ्गारशतकम् (मलयालम्)P71
6. Bhartrihari श्रृङ्गारशतकम् स्त्रीप्रशंसाविंशति: 15
7. Bhartrihari श्रृङ्गारशतकम् स्त्रीप्रशंसाविंशति:16
8. Bhartrihari श्रृङ्गारशतकम् संम्भोगवर्णनाविंशति:17
9. Bhartrihari श्रृङ्गारशतकम् संम्भोगवर्णनाविंशति:16
10. Bhartrihari श्रृङ्गारशतकम् संम्भोगवर्णनाविंशति:18
11. Bhartrihari श्रृङ्गारशतकम् ऋतुवर्णनविंशति:10
12. Bhartrihari श्रृङ्गारशतकम् कामिनीगर्हणविंशति: 12
13.Bhartrihari श्रृङ्गारशतकम् स्त्रीप्रशंसाविंशति: 6
14. काव्यप्रकाश: 8. 70-71

| | | | |
|---|---|---|---|
| 15. Bhartrihari | श्रृङ्गारशतकम् | स्त्रीप्रशंसाविंशतिः | 8 |
| 16. काव्यप्रकाशः | 8. 68 | | |
| 17. Bhartrihari | श्रृङ्गारशतकम् | संम्भोगवर्णनविंशतिः 3 | |
| 18.Bhartrihari | श्रृङ्गारशतकम् | संम्भोगवर्णनाविंशतिः6 | |

**सहायकग्रन्थाः-**

1. Three Shatakas of Bhartrihari
By J.L.GupthaChaithanya
Published by Penman Publishers
7308, Prem Nagar, Shakthi Nagar, Delhi 110007
First Published 2004

2. Bhartruhari
By M.R. Narayanapillai
Publihsed by Devi Book Stall, Kodungallur
14th Reprint July 2013

3. Shatakathrayam
By P.K.K. Nambiar

4. Kavyaprakasah
Published byParimala Publications,
Shakthi Nagar Delhi 110007
3rd Edition 2012

# काव्यस्यात्मा स एवार्थः

**डा.रामचन्द्रः जोयिस् एच्, साहित्यविभागः**

काव्यं हि नाम सहृदयैकवेद्यमास्वाद्यं पीयूषम्। कर्णपेयममृतं शमयति सांसारिकभावान्। जनयति चालौकिकमानन्दम्। सहृदयहृदयं प्रविश्य आनन्दसन्दोहं संवर्धयति, दुःखेषु द्रवीकरोति, रागिषु रमयति, वीरेषु समुत्साहयति। एवं बहुभावैर्भावितं काव्यतत्त्वं कं न चमत्करोति? कं वा नाप्यायति?

कवेः कर्म काव्यम्। कविस्तु क्रान्तदर्शी। न केवलं लौकिकघटनानुविद्धं काव्यं निर्मास्यति सः। न वा मानवानामेवानुभूतिं साक्षात्करोति। न च तस्य देशकालादिसंकुचितः पन्थाः। तस्य च महाकवेरनुभूतिः भावान् जागरयति, भावप्रवणं च हृदयं करोति। एवं कविगतं रसं भावं वा सहृदया एवास्वादयन्ति। आदिकवेः श्लोकत्वमापन्नः क्रौञ्चचीत्कारजनितः शोकः कं न व्यथयति? नाकुलयति? न वा तन्मयं करोति? लौकिकीं वाचमवलम्ब्य निस्यन्दमानेयं कविता सरस्वती स्वस्रोतसा सहृदयहृदयक्षेत्रमभिषिञ्चति सचेतसां भावान् अनुभावयति, तान् पौनःपुन्येनोद्भूतैः भावैः समेधयति। अतः कारणादेव ध्वन्यालोककारेणानन्दवर्धनेन निगदितं यत् –

काव्यस्यात्मा स एवार्थः तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।। इति।

ध्वन्यालोककारः आनन्दवर्धनः संदेहदोलायां दोदुल्यमाने काव्यात्मतत्त्वे ध्वनिविषयकान् अखिलान् पूर्वपक्षान् निराकृत्य कतिपयैः भेदप्रभेदैः ध्वनिरेव काव्यात्मत्वं प्रतिष्ठापयामासः। ध्वनिक्षेत्रमिदं अत्यन्तं विस्तृतम्। तथा हि –

1. **ध्वनति यः स शब्दः, अर्थश्च स ध्वनिः।**
2. **ध्वन्यते इति ध्वनिः – व्यंग्यरसादयः अनेनोक्ताः।**
3. **ध्वन्यते अनेनेति ध्वनिः – व्यंजनाव्यापारः इत्युक्तं भवति।**
4. **ध्वन्यते अस्मिन् इति ध्वनिः अनेन काव्यम् प्रोक्तं भवति।**

शब्दार्थशरीरं तावत् काव्यम्। स्वयं शब्दार्थौ तु काव्यात्मत्वमर्हतः शरीरत्वात्। यदि शब्दार्थशोभाधायको ध्वनिः इत्युच्यते तर्हि शब्दार्थगुणालंकाराणां एव शब्दार्थशोभाकारित्वमुक्तं भवति। एतद्व्यतिरिक्तः शोभाधायकः नास्त्यन्यः इत्युक्तं भवति। अन्यैः सहृदयहृदयाह्लादि काव्यतत्त्वं कपोलकल्पितत्वमिति प्रोचुः। इतरे तु काव्यचारुत्वहेतुषु अलंकारेषु एव ध्वनितत्त्व-

मन्तर्भावयन्ति। अपरैः लक्षणीय एव व्यंग्यार्थ इति मन्वते। भक्तिरेव ध्वनिरिति तेषामाघोषः। गिराम् अगोचरं काव्यतत्त्वम् अन्ये प्रतिपादयन्ति। अन्ते समाधत्तं च ध्वन्यालोककर्त्रा एव यत् **भ्रम धार्मिक विस्रब्धः .....सिंहेन।। कस्य वा न भवति रोषो....इदानीम्।।** इत्यादिषु बहुषु स्थलेषु बोद्धृस्वरूपसंख्यादीनाम् वैभिन्न्यात् वाच्यात् भिन्नस्वरूपो ध्वनिः। व्यंग्यात्मकोयं ध्वनिः त्रिविधः – वस्तु-अलङ्कार-रसभेदेन। वाच्य-लक्ष्य-तात्पर्यादिनिखिलान् अर्थान् अतिशय्य वर्तते। अत्र वाच्यवस्त्वपेक्षया अलङ्कारः प्राधान्यं भजते। वाच्यवस्त्वलंकारोभयापेक्षया व्यज्यमानस्यालंकारस्य चमत्कारातिशयः, व्यज्यमानवस्त्वलंकारो-भयापेक्ष्या व्यज्यमानस्य ध्वनेः प्राधान्यम्। तत्तत्स्थले व्यंग्यस्य क्वचित् वाच्योपस्कार-कत्वात्, क्वचिच्च तुल्यत्वात्, व्यंग्यस्य वाच्यापेक्षया अतिशयितत्वाच्च उक्तं ध्वन्यालोककारेण – **वाच्यातिशायिनि व्यंग्ये ध्वनिः तत् काव्यमुत्तमम्** इति। ध्वनेः भेदाः अभिधामूललक्षणामूलादयो ये प्रोक्ताः ते चात्र काव्यप्रपञ्चे विशिष्टं स्थानमावहन्ति चमत्कारितां च जनयन्ति। इदमत्रावश्यं संस्मर्तव्यं यत् असंलक्ष्य-क्रमव्यंग्य एक एवालं यत् शब्दार्थोभयशक्त्या काव्यस्य स एवार्थः सारभूत इति वक्तुम्। उक्तञ्च – रसभावादिसम्बद्धा यद्यौचित्यानुसारिणी। अन्वीयते वस्तुगतिः देशकालादिभेदिनी।।

वाचस्पतिसहस्राणां सहस्रैरपि यत्नतः। निबद्धापि क्षयं नैति प्रकृतिर्जगतामिव।।

व्यंग्यस्थलेपि रसः प्रधानत्वेन अप्रधानत्वेनापि इति तिष्ठति। प्रधानत्वेन व्यञ्जिते सति रसे ध्वनिः काव्यम्। अप्रधानत्वेन व्यञ्जिते सति रसे ध्वनिः काव्यं गुणीभूतव्यङ्ग्याख्यम्। अप्रधानत्वेन रसव्यंजने रसवदाद्योलंकाराः। औचित्यमपि प्राधान्यं भजते काव्यार्थ-प्रतिपादने। तदुक्तं –

अनौचित्यात् ऋते नान्यत् रसभंगस्य कारणम्।

प्रसिद्धौचित्यबन्धस्तु रससयोपनिषत्परा।। इति।

अन्ते च वस्तु- अलंकार-रसरूपः इति त्रिविधस्याप्यर्थस्य काव्यात्मत्वमस्तीति आचार्यानन्द-वर्धनमतम् उक्तं भवति। परन्तु –

काव्यस्यात्मा स एवार्थः तथा चादिकवेः पुरा

क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।

इत्यनया कारिकया रसस्यैव काव्यात्मत्वं प्रत्यपादि। शोको हि करुणरसस्थायिभावः। सः वृक्षस्य फलरूपेण, परिणाम इव वा रसरूपे परिणतः। अतश्च वाक्यं रसात्मकं काव्यम् वेति विश्वनाथोपि सिद्धान्तयति। जगन्नाथोपि त्रिविधेषु ध्वनिषु लोकोत्तराह्लादजनकज्ञानगोचरी भवेत् स एवार्थः काव्यत्मेति सिद्धान्तयति।

# तेजोऽभावः तमः

**डा.विजयराघवन्,न्यायविभागः**

तमः दशमं द्रव्यम्, क्लृप्तद्रव्यानन्तर्भूतत्वे सति द्रव्यत्वात् इति परिशेषानुमानेन तमसः दशमद्रव्यत्वं सिसाधयिषितम्। तत्र हेतौ द्रव्यत्वरूपविशेष्यासिद्धिपरिहाराय तमः द्रव्यं रूपवत्त्वात् क्रियावत्त्वाच्च इत्यनुमानेन तमसः द्रव्यत्वं साधनीयम्। तत्रापि न कार्या हेत्वसिद्धिशङ्का नीलं तमः चलति तमः इति अबाधितप्रत्यक्षरूपया प्रतीत्या तमसः रूपवत्त्वस्य क्रियावत्त्वस्य च सिद्धेः।

ननु तमो द्रव्यं नीलरूपाधारत्वात् क्रियाधारत्वात् च इति अनुमानं व्यभिचारि द्रव्यत्वाभाववति जन्यगुणादौ कालिकसम्बन्धेन रूपाधारत्वस्य क्रियाधारत्वस्य च सत्त्वात् इति चेत् समवायेन रूपवत्त्वमेव अत्र विवक्षितम्। तथा च समवायसम्बन्धावच्छिन्ननीलरूपनिष्ठाधेयतानिरूपिताधारत्वम्, तादृशक्रियानिष्ठाधेयतानिरूपिताधिकरणत्वञ्च हेतुतया विवक्षितम्।

अत्र हेतुघटकं क्लृप्तद्रव्यानन्तर्भूतत्वं साध्यते तमः नाकाशादिपञ्चके अन्तर्भूतं रूपवत्त्वात्। तमः न वायुः स्पर्शाभावात् सदा गतिमत्त्वाभावाच्च। ननु पूर्वोक्तहेतुनैव रूपवत्त्वहेतुनैव वायौ अनन्तर्भावे सिद्धे पुनः तत्साधकतया स्पर्शाभावस्य उपन्यासो व्यर्थ इति चेत् न सम्बन्धभेदाभिप्रायेणैव स्पर्शाभावात् इति हेतुरुच्यते। तथा हि – रूपवत्त्वं समवायसम्बन्धेन हेतुः। स्पर्शाभावश्च स्वरूपसम्बन्धेन हेतुः।

ननु तमः वायुभिन्नं स्पर्शाभावात् इत्यत्र व्यभिचारः। वायुभेदरूपसाध्याभाववति वायौ स्पर्शनिष्ठसंयोगसंबन्धावच्छिन्नप्रतियोगिताकाभावरूपस्य स्पर्शाभावस्य सत्त्वात् व्यभिचारः। न च स्पर्शनिष्ठसमवायसम्बन्धावच्छिन्नप्रतियोगिताकाभावो हेतुत्वेन विवक्षितः स च वायौ नास्ति तत्र समवायेन स्पर्शस्य सत्त्वात् तदभावासम्भवात् इति वाच्यम्। समवायसम्बन्धावच्छिन्नस्पर्शनिष्ठप्रतियोगिताकाभावस्य कालिकसम्बन्धेन वायौ सत्त्वात् व्यभिचारः तदवस्थैव। न च समवायावच्छिन्नस्पर्शाभावस्य स्वरूपसम्बन्धेन हेतुतायाः विवक्षितत्वात् न व्यभिचारः इति वाच्यम्। एवमपि उत्पत्तिकालावच्छिन्नवायौ उत्पन्नं द्रव्यं क्षणमगुणमक्रियञ्च तिष्ठतीति न्यायेन स्पर्शाभावः स्वरूपसम्बन्धेन नास्तीति व्यभिचारस्य दुर्वारत्वात् इति चेद् ध्वंसप्रागभावाधिकरणे

अत्यन्ताभावस्यानङ्गीकारात् नोक्तव्यभिचारः। स्पर्शप्रागभाववति उत्पत्तिक्षणावच्छिन्नवायौ स्पर्शात्यन्ताभावो नास्तीति व्यभिचारः। नव्यमते तु वायौ स्पर्शात्यन्ताभावः उत्पत्तिकालावच्छिन्नदैशिकविशेषणतासम्बन्धेनैव वर्तते न तु निरवच्छिन्नदैशिकविशेषणतासम्बन्धेन न व्यभिचारः। अत्र दैशिकविशेषणतापदेन स्वरूपसम्बन्धेन कालिकविशेषणतापदेन कालिकसम्बन्धश्च विवक्षितः। एवं स्पर्शाभावादिति विषमव्याप्तौ हेतुः सदा गतिमत्त्वादिति समव्याप्तौ हेतुः। नव्यमते तु वायौ स्पर्शात्यन्ताभावः उत्पत्तिकालावच्छिन्नदैशिकविशेषणतासम्बन्धेनैव वर्तते न तु निरवच्छिन्नदैशिकविशेषणतासम्बन्धेन न व्यभिचारः। अत्र दैशिकविशेषणतापदेन स्वरूपसम्बन्धेन कालिकविशेषणतापदेन कालिकसम्बन्धश्च विवक्षितः। एवं स्पर्शाभावादिति विषमव्याप्तौ हेतुः सदा गतिमत्त्वादिति समव्याप्तौ हेतुः।

अत्रोच्यते – तमः न दशमं द्रव्यम् तेजोऽभावरूपत्वात्, अत्र तेजोऽभावपदेन किं विवक्षितम्, यदि तेजःप्रतियोगिकः अभावः तर्हि सूर्यादितेजस्वत्यपि देशे तेजोन्तरप्रतियोगिकाभावसत्त्वेन तम इति प्रतीतिः स्यात्। अथ तेजस्त्वावच्छिन्नप्रतियोगिकाभावः, सूर्यतेजस्वतिप्रदेशे तेजस्त्वावच्छिन्नप्रतियोगिताकाभावस्यासत्त्वात् तमः इति प्रतीतिर्न स्यात् इति चेत् तथापि तमोवत्यपि प्रदेशे तेजःपरमाणूनां सत्त्वेन तेजस्त्वसामान्याभावस्यासत्त्वात् तमः इति प्रतीत्यनुपपत्तिः स्यात्। अथ प्रकाशकं यत्तेजः तत्त्वावच्छिन्नप्रतियोगिताकाभावः इति चेत् तेजः परमाण्वादीनां प्रकाशत्वाभावात् पूर्वोक्तदोषवारणसम्भवेऽपि प्रकाशकतेजस्त्र्यणुकखद्योतादिमति प्रदेशे तमः इति प्रतीत्यनुपपत्तिः। तद्वारणाय प्रौढप्रकाशकं यत्तेजः तत्त्वावच्छिन्नप्रतियोगिताकाभावः इति उच्यते। अत्र प्रौढत्वञ्च – प्रकृष्टमहत्त्ववत्त्वम्। त्र्यणुकादेस्तादृशप्रौढत्वाभावात् तमः इति प्रतीतेः नानुपपत्तिः। अतः प्रौढप्रकाशकतेजस्सामान्याभावः तमः। एवमपि प्रकाशकपदं व्यर्थम्, तेजःपरमाणूनां वारणार्थमेव खलु पूर्वं प्रकाशकपदं निक्षिप्तम् , अत्र प्रकृष्टमहत्त्वरूपप्रौढत्वाभावादेव तेजःपरमाणूनां वारणसम्भवादिति चेत् यत्र तमसि हिरण्यमस्ति तत्र तम इति प्रतीतिसिद्धये हिरण्यादितेजोवारणाय प्रकाशकपदमावश्यकम्।

एवमपि चक्षुरादितेजस्वति प्रदेशे तमःप्रतीत्यनुपपत्तिः, तद्वारणाय उद्भूतरूपवत्त्वमपि तेजसि विशेषणन्देयम्। तथा च प्रकृष्टमहत्त्ववत्प्रकाशकउद्भूतरूपवत्तेजस्त्वावच्छिन्न

प्रतियोगिताकाभावः तमः। प्रौढत्वं महाप्रभवत्वमिति चेत् तेनैव परमाणूनां हिरण्यादेश्च वारणसम्भवेन प्रकाशकपदमनुपादेयमेव। तथा च महाप्रभावत्वावच्छिन्नप्रतियोगिता-काभावः तमः इति फलितम्।

यत्तु रूपवत्त्वप्रतीतेः तमसः द्रव्यत्वं पूर्वमुक्तन्तत्रोच्यते – तमः न रूपि द्रव्यम्, आलोकासहकृतचक्षुर्ग्राह्यत्वात्, आलोकाभाववत्। यत्र यत्र आलोकासहकृतचक्षुः ग्राह्यत्वम् तत्र तत्र रूपवद्भिन्नत्वम् द्रव्यभिन्नत्वञ्च यथा आलोकाभावः। रूपिद्रव्य-चाक्षुषप्रमायाम् आलोकस्य कारणत्वात्। हेतौ आलोकासहकृतेत्यनुक्ते साध्याभाववति रूपवद्द्रव्ये घटादौ चक्षुर्ग्राह्यत्वरूपहेतुसत्त्वात् व्यभिचारः। घटादिः आलोकसहकृतचक्षुः ग्राह्यः न तदसहतकृतचक्षुर्ग्राह्य इति न व्यभिचारः।

चक्षुर्ग्राह्यत्वञ्च चक्षुर्जन्यज्ञानीय लौकिकविषयत्वम्। तेन तमसः चाक्षुषे घटादीनां ज्ञानलक्षणाप्रत्यासत्या भानेऽपि न व्यभिचारः। न च तेजस्सामान्याभावस्य पक्षतया तदन्तर्गतस्य आलोकाभावस्य दृष्टान्तत्वेन प्रदर्शनं न युक्तम् इत्थमिति वाच्यम्, सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावः पक्षः, तदतिरिक्तः विशेषधर्मावच्छिन्नाभावः दृष्टान्तः इति नोक्तानुपपत्तिः।

न चात्र अप्रयोजकशङ्कापि यदि रूपिद्रव्यभेदो न स्यात् तर्हि आलोकासहतकृतचक्षुर्ग्राह्यं न स्यात् इति तर्केन तन्निवारणात्। तमसः रूपवत्ताप्रतीतिः कर्मवत्ताप्रतीतिश्च भ्रम एव।

अतः सर्वानुभूयमानोष्णस्पर्शस्याश्रयतया तेजोद्रव्यस्य अवश्यं स्वीकार्यत्वे सति, तमसः अतिरिक्तत्वे अनन्तावयवतत्प्रागभावादि कल्पनागौरवाच्च प्रौढप्रकाशकतेजः सामान्याभावः तमः इति सिद्धम्।

# संस्कृतपत्रायनस्य समीक्षणम्

डा.निधीष्.एम्.जी,Tiruvanantapuram.

**राधामनोहारविलासभृङ्गः मे चित्तरागाम्बरचन्द्रबिम्बः।**
**कारुण्यकल्याणनिधीशानन्दः श्रीमान् सुमं पातु भवन्तमद्य।।**

पुरातनकालेभ्यः मानवैः आशयप्रचारणाय भित्तिपत्राणि, शिलाफलकानि, ताम्रपत्राणि च उपयुज्यन्ते स्म। सम्प्रदायोऽयं पञ्चदश (15) तम शतकपर्यन्तम् अनुवर्तितः इति दृश्यते। अखिले भारते आशयप्रसारणप्रक्रियायाः विस्फोटात्मकः परिणामः अशोकचक्रवर्तेः काले एव समभूत्। पश्चादागतैः मुगलचक्रवर्तिभिः वार्ताहरणाय प्रत्येकं राज्येषु वार्ताहरान् नियुज्य तेभ्यः वार्ताः एकत्र संयोज्य प्रचारः अक्रियत। अस्य पत्रप्रवर्तनस्वभावः अवर्तत। अतः कैश्चित् चरित्रपण्डितैः कथ्यते - "भारतीयपत्रप्रवर्तनस्य आरम्भः मुगुलभरणकालादेव' इति।[1]

1768 तमे वर्षे विल्यम् बोलङ् इत्याख्यः आङ्गलेयः भारते आद्यपत्राय श्रममकरोत्, तथापि तस्य श्रमः असफलतामगच्छत्। 1780 तमे आङ्गलभाषायां जान् हिक्स् द्वारा बहिरागतं "दि बंगाल् गसट्ट' एव प्रथमभारतीयपत्रम्। भारतीयभाषया बहिरागतं प्रथमपत्रमिति प्रथा "दिग्दर्शन्' इति पत्रमावहते। इदं बंगाली भाषायां बंगाल् राज्यादेव प्रकाशितम्।

पश्चात् विभिन्नासु भारतीयभाषासु भारतीयैः सहस्रशः प्रसिद्धीकरणानि प्रकाशितानि। प्रत्येकं प्रान्तीयराज्याणां प्रजाः इति लघुचिन्ताधारातः भारतमिति विशालचिन्तां यावत् आसेतुहिमाचलं भारतीयान् नेतुं यः श्रमः अभवत् तस्मिन् श्रमे भारतीयपत्राणां योगदानं निस्तर्कम् अनुपमं च वर्तते।

संस्कृतप्रवर्तनचरित्रस्य अद्य यावत् सार्धैकशतवर्षस्य परम्परा वर्तते। 1866 जून् प्रथमदिनाङ्के बनारस् राजकीयसंस्कृतविद्यालयात् प्रकाशितायाः काशीविद्यासुधानिधिः इति संस्कृतमासिक्याः आगमादेव संस्कृतपत्रकारितायाः अति विपुलं चरित्रमारभते।[2]

अत्र विशिष्टता विद्यते - राजकीयसंस्कृतविद्यालयस्य संरंभस्यास्य पृष्ठतः या वाञ्छाआसीत् सा तु अप्रकाशितहस्तलिखितग्रन्थानां प्रकाशमेव। "काशीविद्यासुधा-

---

[1] Journalism in India

[2] संस्कृतपत्रकारिता का इतिहास

निधि:', "प्रत्नकम्रनन्दिनी", "विद्योदय' इत्यादि प्रथमपत्रिकाणां मुख्यम् उद्देश्यम् इदमेव आसीत् यत् अप्रकाशितग्रन्थानां बहिरानयनम्। अपि तु अर्वाचीनसंस्कृतसाहित्यम्, नैकसंस्कृतसाहित्यस्य आङ्गलविवर्तनम्, संस्कृतान्यभाषासाहित्यस्य संस्कृतविवर्तनम्, वार्ता: प्रभृतय: च पत्रिकासु एतासु विषयत्वेन स्वीकृतमासीत्। संस्कृतं न मृतमिति एताभि: पत्रिकाभि: ज्ञायते स्म। विन्टर् निटस् इति आङ्गलचरित्रकारस्य प्रस्ताव: विषयेऽस्मिन् दृष्टान्त: एव - "Sanskrit is not a dead language even today. These are still at the present day a member of Sanskrit periodicals in india to this very day poetry is still composed and works return in sanskrit' इति।[3]

**स्वातन्त्रानन्तरभारते संस्कृतपत्रकारिता-**

संस्कृतपत्रकारिताया: चरित्रगणना तथा परामर्शाश्च अतिकायत्वात् असंभवत्वात् असुलभत्वात् च अत्र प्रधानानां स्वातन्त्र्यानन्तरभारतीयसंस्कृत- पत्रिकाणाम् एव उल्लेख: क्रियते।

**दैनिकपत्राणि-**

**विजय:-** स्वतन्त्रभारतस्य प्रथमसंस्कृतपत्रमासीत् विजय:। 1961 तमे वर्षे पुण्यपत्तनात् प्रकाशितमिदं पत्रम्। पञ्चदशदिनं यावदस्य नाम विजय: इत्यासीत्। अनन्तरं अस्य नाम संस्कृति: इति परिवर्तितम्। अस्य सम्पादक: पण्डित् बालाचार्य खरावेड्कर् महोदय: आसीत्।

**सुधर्मा-**1970 तमे वर्षे पत्रमिदं मैसूर् त: प्राकाश्यत। अस्य सम्पादक: पण्डित् काल्लेनडादूरु वरदराज अय्यगर्य: वर्तते। रविवासरे पत्रं न प्रकाश्यते। अद्य सुधर्मा अन्तर्जाले अपि प्रतिदिनं प्रकाश्यते।

**नवभारतम्-**1991 तमे वर्षे कर्णपूरत: (कान्पूर्) डा. शिवबालक द्विवेदी महोदयानां प्रयत्नेन दैनिकपत्रस्यास्य प्रकाशनं समभवत्।

दैनिकपत्राणां प्रकाशने अनुभूतक्लेशान् अभिज्ञाय श्रमिकै: पण्डितै: साप्ताहिकत्वेन पाक्षिकत्वेन मासिकत्वेन द्वैमासिकत्वेन षण्मासिकत्वेन च पत्राणि प्रकाश्यन्ते।

---

[3] History of Sanskrit literature

**साप्ताहिकपत्राणि-**

**सुरभारती-** स्वातन्त्र्यानन्तरभारते सर्वप्रथमं साप्ताहिकपत्रं सुरभारती आसीत्। मुम्बईत: 1947 तमे वर्षे सुरभारती बहिरागता। पत्रस्यास्य सम्पादक: श्रीगोविन्दवल्लभशास्त्री महोदय: आसीत्।

1951 तमे संस्कृतभवितव्यम् इति साप्ताहिकम्, तथा 1964 तमे वाराणसीत: गाण्डीवम् इति च साप्ताहिकपत्रं प्रकाश्यन्ते। "गाण्डीवम्'अद्यापि प्रकाश्यमानं पत्रं भवति। अस्य सम्पादक: श्रीरामबालकशास्त्री महोदय: भवति। 1989 तमे युगगति: इति च साप्ताहिकं गोरखपूर् त: प्रकाशितम्।

**पाक्षिकपत्राणि-**

**भारतवाणी-** स्वतन्त्रभारतस्य सर्वप्रथमं संस्कृतपाक्षिकमासीत् भारतवाणी। एवं 1959 तमे शारदा नाम्ना पाक्षिकम्, 1988 तमे हितसाधिका इति पाक्षिकम्, 1990 तमे गोरखपूरत: गोरखपुरचर्चा इति नामकं पाक्षिकम्, 1994 तमे दिशाभारती इति पाक्षिकं च प्रकाशितानि।

**मासिकपत्राणि-**

**ब्रह्मविद्या-**1948 तमे कुम्भकोणत: प्रकाशिता "ब्रह्मविद्या' एव स्वतन्त्रभारतस्य सर्वप्रथमा मासिकी पत्रिका। एषा पत्रिका काञ्ची कामकोटिपीठस्य मुखपत्रिका आसीत्। अस्या: सम्पादक: पण्डितराज एस्.सुब्राह्मण्यशास्त्री महोदय: आसीत्। दर्शनप्रधानपत्रिकाया: अस्या: प्रकाशनं सम्प्रति न भवति।

1949 तमे बालसंस्कृतम् 1950 तमे संस्कृतप्रचारकम्, 1956 तमे सरस्वती सौरभम्, 1960 तमे गुरुकुलपत्रिका, 1960 तमे एव जयतु संस्कृतम् इति काठ्मण्डूत: च मासीकीनां प्रकाशनमभवत्। 1960 तमे साहित्यवाटिका,1962 तमे गैर्वाणी,1970 तमे मधुमती,1976 तमे सर्वगन्धा, 1978 तमे संस्कृतामृतम्, 1979 तमे गीर्वाणसुधा, 1960 तमे श्रीपण्डित, 1982 पारिजातम्, 1983 तमे चन्दामामा, 1980 तमे भारतमुद्रा, 1987 तमे लोकसुश्री: तथा सत्यानन्दम्, 1992 तमे अभिनवसंस्कृम्, 1994 तमे संभाषणसन्देश:, 1996 तमे रावणेश्वरकाननम्, 1998 तमे अमृतभाषा,1998 तमे आर्यज्योति:, 2008 तमे रसना च मासिकी पत्रत्वेन भारते प्रकाश्यन्ते।

**द्वैमासिकपत्राणि-**

द्वैमासिकी पत्रत्वेन च अनेकानि पत्राणि भारते प्रकाश्यन्ते, तेषां नामानि अत्र सूच्यन्ते। 1946 तमे मालमसूर:,1950 तमे भारती विद्या, 1988 तमे प्रियंवदा, 1992 तमे प्रियवाक् इत्यादय: भवन्ति।

**त्रैमासिकपत्राणि-**

त्रैमासिकत्वेन एता: पत्रिका: भारते वर्तन्ते। 1951 तमे विद्यालयपत्रिका, 1953 तमे श्रीरविवर्मा-संस्कृतग्रन्थावली, 1960 तमे संस्कृतप्रभा, पाटलश्री: च 1962 तमे गैर्वाणी तथा सागरिका, 1964 संस्कृतसम्मेलनम्, संगमनी, संविदा, मधुमती, अमृतलता, संस्कृतसुधा च 1965 तमे विश्वसंस्कृतम्, 1966 तमे मुञ्जारव: प्रभृतय: नैकानि पत्राणि सन्ति।

**षाण्मासिक-वार्षिकपत्राणि-**

परिशीलनम्, आरण्यकम् इत्यादय: षण्मासिकीपत्रिका: भवन्ति। वार्षिकपत्रत्वेन बहूनि पत्राणि भारते प्रकाशितानि, तेषु सर्वप्राचीना वर्तते अमृतवाणी। पत्रमिदं बाङ्गलूरुत: प्रकाश्यते।

एवं संस्कृतपत्रकारिताया: चरित्रं विपुलं वर्तते। संस्कृतपत्रिका: प्रायेण कस्यचन व्यक्ते: उत सुहृन्मण्डलस्य परिश्रमेण प्रकाश्यन्ते। प्रत्येकं पत्रिकाणां पृष्ठत: तनु-मनत्यागस्य कथां वक्तुकामा: सन्ति। एकमपि संस्कृतपत्रं तस्य प्रसाधकेभ्य: धनलाभं न दत्तवदस्ति। जन्मनियोगत्वात् संस्कृतसेवने तत्परा: भूता: एव बहव: प्रकाशका: संस्कृतप्रेमिण:। भारतस्य विभिन्नेषु राज्येषु विभिन्नेषु साहचर्येषु वर्तमानानाम् एतेषां संस्कृतप्रसाधकानां सम्मुखे विद्यमाना: समस्या: सामान्येन समाना: एव।

1. लेखनानाम् अभाव:।
2. धनराशे: न्यूनता।
3. प्रचारणस्य उत प्रोत्साहनस्य न्यूनता।
4. आधुनीकरणस्य न्यूनता- एते सन्ति।

एतासां समस्यानां समाधानं अस्माभि: एव कर्तुं शक्यते इति वयं जानीम:। संस्कृतरचनां कर्तुं सुशक्ता: बहव: संस्कृतज्ञा: अद्यापि समूहे सन्ति। किन्तु ते प्रायेण स्वतन्त्रकृतीनां रचनामाकलय्य प्रकाशनार्थमुद्युक्ता: न भवन्ति।

अद्य प्रकाश्यमानासु पत्रिकासु लेखकेभ्य: शुल्कप्रदानं कर्तुं शक्या संस्कृतपत्रिका भारते सम्प्रति नास्ति इत्येव वक्तुं शक्यते। स्थितिरेषाऽपि लेखनात् वैमुख्यं प्रकटयितुं संस्कृतज्ञानां हेतु: स्यात्। संस्कृताध्यापका: छात्रा: च यस्यकस्यापि संस्कृतपत्रस्य ग्राहका: भविष्यन्ति तर्हि एतासां पत्रिकाणां क्षमता, श्रेष्ठता च द्विगुणीकृता भवेत्। ग्राहकसंख्याया: वर्धनेन न केवलं पत्राणां कृते धनार्जनं तद्वारा लेखकेभ्य: प्रशस्ति: च लभ्येत। अपि तु संस्कृतस्य पुन:प्रतिष्ठा तस्य मृतापवाददूरीकरणं इत्यादि लक्ष्यप्राप्तये संस्कृतस्य सहायता च भविष्यति।

आधुनिकसाहित्यस्य विकसने पत्रिकाणां महत्वं किमिति वयं जानीम: एव। कालिदासादीनां कृतय: एव संस्कृतसाहित्यस्य सम्पदिति लघुतां विहाय अर्वाचीनसाहित्यस्य निर्माणे बद्धश्रद्धा: भवेम। तत्र संस्कृतपत्राणां योगदानम् अपरित्याज्यमेव इति यथामतिं सविनयं संस्कृतपत्रायनस्य विषये प्रस्ताव्य विरमत्यतिविस्तरादयम्।

# शाङ्करस्तोत्रेषु मूल्यशिक्षा

**डा. सुशान्तकुमाररायः,शिक्षाशास्त्रविभागः**

आसीत्पुरा विश्ववन्द्या भारतीयार्षसंस्कृतिः। सदाचारपरिप्लावितेऽयं संस्कृतिः सुतरामन्वशिषत्समग्रं संसारम्। यस्याः छत्रच्छायाभिः समाच्छादिताः बभूवुः देशान्तरीयाः विविधाः संस्कृतयः, महनीयां भारतीयसंस्कृतिञ्चानुजग्मुः। भारतीयदर्शनं विभाकर इव सुविमलज्ञानांशुभिः मायाविजडितमज्ञानमशामयज्जगताम्। धर्मार्थकाममोक्षात्मकं पुरुषार्थचतुष्टयमुपदिश्य अकार्षीन्मङ्गलं समाजस्य। मानवः सर्वोऽपि वैदिकं पन्थानमनुससार, जग्राह च धर्मसमुच्चयम्। आनर्ज धर्मेणार्थान्। धर्मार्थाभ्यां धर्मार्थैश्च कामम्। धर्मसंयुताभ्यामर्थकामाभ्यां लेभे च तुरीयं पुरुषार्थं मोक्षम्। यदा आहारनिद्राभयमैथुनादिसामान्यप्रवृत्तिगामिनः बभूवुः पाश्चात्त्याः, तदा धर्माधारितः आहारनिद्राभयमैथुनैः ततोऽप्युद्र्ध्वतमं स्थानमधिजग्राह भारतीयसंस्कृतिः। यत्र आध्यात्मवादैः समाजवादः आसीत्सुनियन्त्रितः। अत एव भारतीयदर्शनैः प्रभाविताः समाकृष्टाश्च बभूवुः पाश्चात्त्याः दार्शनिकाः चीन्, फ्रान्स्, आरब् आदिदेशेभ्यः। प्राप्य वरान् भारतीयज्ञाननिधीन् स्वदेशेषु प्रचचरुः सुतरां सातितरां भारतीयां सनातनीं परम्पराम्। परमाधुनिकः पाश्चात्त्यसभ्यतानुकरणशीलः अस्मत्समाजः भोगवादमनुधावन् भारतीयसंस्कृतेरादर्शान् विमुखीकुर्वन् लक्ष्यते। केवलमर्थकामयोः सन्तृप्तये भौतिकविज्ञानमभिवर्धयति। पदं पदं भौतिकसमस्याः समादधाति विज्ञानेन। विज्ञानशिक्षायाः अभिवृद्ध्या चिकित्साक्षेत्रं, यातायातक्षेत्रं, राजनीतिक्षेत्रं, सम्प्रेषणक्षेत्रं, ग्रहान्तरविज्ञानक्षेत्रादीनि बोभूयन्ते विकसितानि। सुखैषुर्भोगवादी समाजः विज्ञानाश्रितः यथाकथञ्चिदपि सुखसञ्चयशीलो लक्ष्यते। एतदर्थमाश्रयते मार्गान्तरमपि। न्यूनश्रमैः बहुफललोलुपोऽयं वीक्ष्यते गर्हितमार्गगामी।भारतीयां सनातनीं परम्परां, वेदोक्तप्रतिपादितं धर्ममार्गं, महनीयमादर्शञ्च अनाकृत्य छलेन अर्थकामाभ्यां यतते। दिङ्मात्रमुदाहरणं पश्यामः। वैद्याः आधुनिकाः विना गुप्तधनं न पश्यन्ति नोपदिशन्ति च रोगिणः। उत्कोचं विना न सेवन्ते सेविकाः। विना पापधनं वृत्तिरपि नोपलभ्या समाजे। आधुनिके राजतन्त्रे वीक्ष्यामहे भ्रष्टाचारिणः मन्त्रिणः लुण्टकाः इव समाजस्य निरीहजनताद्रविणमपहरन्ति पापमार्गेण, प्रवञ्चनेन। यद्यप्यमी स्वसेवायै वृत्त्यर्थं वा लभन्ते विपुलतरं धनराशिम् अमथापि विनातिरिक्तं धनेन न कुर्वते कर्तव्यं, न हि पालयन्ति दायित्वानि। नाध्यापको

यथाविधि अध्यापयति, वैद्यो नो यथाविधि सेवते, नेतारो नो यथाविधि शासति। आरक्षकाः नो पालयन्ति यथाविधि समाजं विना गुप्तातिरिक्तधनेन। समाजे भ्रष्टं राजतन्त्रं, भ्रष्टा सामाजिकी व्यवस्था, भ्रष्टमनुशासनं, भ्रष्टाः राजनेतारः, भ्रष्टं तपोमयं वातावरणं, भ्रष्टा शिक्षापद्धतिः, भ्रष्टा चिकित्साव्यवस्था, भ्रष्टा परिवारभावना, भ्रष्टो भक्तिभावः, भ्रष्टञ्चाध्यात्मिकं चिन्तनमपि। किमत्र स्यान्मूलभूतं कारणं भ्रष्टताया इति चेत् मूल्यशिक्षायाः घोरतराभावः एवात्र भवेन्मूलभूतं कारणमिति विवदन्ति विद्वांसः शिक्षाविदः। मूल्यशिक्षायाः अभावेन विच्छिद्यते समाजीकरणप्रक्रिया। मूल्यशिक्षायाः अभावेन समुत्तमनागरिकाः न भवेयुः निर्मिताः। सभ्यानामभावेन समाजोऽयं समजोन्मुखी बोभवीति। नारीषु भोगवादभावना यौनपापाचारश्च उल्लंघयति सीमानम्। अतः १९३७ ईशाब्दे Indian Education Conference मध्ये महात्मगान्धी-महोदयैः प्रास्तावि मूल्यशिक्षा। ततः भारतीयसंविधाने लोकतन्त्रीयमूल्यानां विकासाय संस्तुतयः समागताः। तदनु विश्वविद्यालयशिक्षायोगेन(१९४८ -४९), धार्मिक-नैतिक-शिक्षासमित्या(१९५६), शिक्षायोगेन(१९६४-६६), राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षण-परिषदा(१९७०), नैतिकशिक्षायां शिमला काँन्फेरन्स् (१९८२), नवीनशिक्षानीत्यादिभिः छात्राणां मूल्यशिक्षायै संस्तुतयः प्रास्ताविषत।

**मूल्यशिक्षा-**

मूल्यशिक्षा इत्यत्र मूल्यं तथा शिक्षा इति पदद्वयं वर्तते। मूल्यं तु आङ्ग्लेयभाषया **Value** इति पदाभिधं वर्तते, यत्तु लैटिन् भाषायाः **Valere** पदादस्ति समागतम्। Valere इति पदस्यार्थस्तु उपयोगिता **Utility, Importance** वा वर्तते। अर्थात् मूल्यं तद्भवति येन व्यक्तेः विचारस्य वस्तुनो वा महत्त्वम् उपयोगिता चावगम्येते। संस्कृते यस्य आदर्शः, शीलम् इत्यादिभिः पदैः वर्तते व्यवहारः। **मूल्यं वर्तते सामाजिकजीवनादर्शः। यः आदर्शः मानवव्यवहारस्य मानदण्डत्वेन प्रथते।** कस्यापि समाजस्य ये विश्वासाः आदर्शाः सिद्धान्ताः नैतिकनियमाः सम्प्रदायाः व्यवहारमान-दण्डाश्च भवन्ति, समाजस्य सदस्याः येषां महत्त्वमङ्गीकुर्वन्ति, यैः सामाजिकानां व्यवहारः निर्दिष्टः नियन्त्रितश्च भवति तानि तस्य समाजस्य सामाजिकानाञ्च मूल्यानि भवन्ति (प्रो.डा.च.ल.न.शर्मा, षष्ठं पुष्पम्, रा.सं.सं, मा.वि.जयपुरम्, विक्रमाब्दः- २६०५,२००८. पृ.सं.२३)।

कस्यापि समाजस्य पूर्वजानां सामाजिकानां दीर्घानुभवस्य परिणामभूताः आदर्शाः भवन्ति मूल्यानि। **मूल्यानां स्वतन्त्रविषयत्वेन (Independent subject) अध्यापनं भवति मूल्यशिक्षा। परं पाठ्यक्रमे विद्यमानैः गणितविज्ञानराजनीतिशास्त्रेति-हासभूगोलभाषादिभिः विषयैस्साकं मनोवैज्ञानिकरीत्या मूल्यानां समावेशेन अध्यापनं भवति मूल्यपरकशिक्षा (Value oriented Education) इति।** अद्य प्रभृति मूल्यपरकशिक्षायाः बहुलो व्यवहारः वर्तते दृष्टिगम्यः।

भारतीया सनातनी परम्परा भारतीयप्राचीनसाहित्यरत्नानि च वर्तन्ते मूल्यशिक्षायाः स्रोतांसि। वेदेषु उपनिषत्सु स्मृतिग्रन्थेषु पुराणेषु इतिहासग्रन्थेषु च राजते मूल्यशिक्षायाः महाब्धिः। विशिष्य वेदान्तग्रन्थाः मूल्यशिक्षायै आधारभूताः वर्तन्त इति साभिमानं वक्तुं शक्नुमः। तपोनिधीनां वेदान्ततत्त्वविभाकराणां शङ्कराचार्याणां स्तोत्रेषु मूल्यशिक्षायाः प्रबलतरं स्रोतः अवश्यमनुध्येयम्।

राजन्ते मतान्तराणि शिक्षाविदां मूल्यवर्गीकरणे। अथापि मनोविज्ञानिना **स्प्रेञ्जर्** महोदयेन विहितं वर्गीकरणं वर्तते सर्वमान्यम्। तैः **सैद्धान्तिकानि (Theoreticals), आर्थिकानि(Economics), सौन्दर्यबोधात्मकानि(Asthetics), सामाजिकानि (Socials), राजनैतिकानि(Politicals), धार्मिकाणि(Religious)** च मूल्यानि इति भेदषट्कं न्यरूपि। अन्ये चात्र मानवीयमूल्यानि, सार्वभौमिकमूल्यानि इत्यपि विदधति विभागद्वयम्। सर्वविधान्यपि मूल्यान्येतानि कथं विभासन्ते शङ्कराचार्याणां स्योत्ररत्ना-गारेष्विति विचारयामः।

**साधनपञ्चके मूल्यशिक्षा-**

आचार्यैः शङ्करैः रचितेषु स्तोत्रेषु विलसत्यन्यतमं साधनपञ्चकम्। इदं शार्दूल-विक्रीडितच्छन्दसा रचितम्। अत्र पदं पदं मूल्यशिक्षोपदेशः विहितः आचार्येण। यथा-

**वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां,**
**तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम्।**
**पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयता-**
**मात्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम्॥**

श्लोकेऽस्मिन् **शैक्षिकं मूल्यं (नित्यमध्ययनम्), सैद्धान्तिकं मूल्यं (वेदोक्तकर्मानुष्ठानम्), आध्यात्मिकं च मूल्यं (ईशपूजनम्), वैयक्तिकं मूल्यं (पापनिवारणम्), आत्ममूल्याङ्कनम् (दोषोऽनुसन्धीयताम्)** इति मूल्यानि राजन्ते।

**सङ्गः सत्सु विधीयतां भगवतो भक्तिर्दृढा धीयतां,**
**शान्त्यादिः परिचीयतां दृढतरं कर्माशु सन्त्यज्यताम्।**
**सद्विद्वानुसर्प्यतां प्रतिदिनं तत्पादुका सेव्यतां,**
**ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यताम्॥**

श्लोकेऽस्मिन्- **सङ्गः सत्सु विधीयताम्, सद्विद्वानुपसर्प्यतां प्रतिदिनम्** इत्याभ्यां सामाजिकमूल्यं, **तत्पादुका सेव्यताम्** इत्यनेन विनयमूल्यं (वैयक्तिकं मूल्यं), **ब्रह्मैकाक्षरमर्थ्यताम्** इत्यत्र आध्यात्मिकं मूल्यञ्च वर्तते उपदिष्टम्।

**वाक्यार्थश्च विचार्यतां श्रुतिशिरपक्षः समाश्रीयतां**
**दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम्।**
**ब्रह्मैवास्मि विभाव्यतामहरहर्गर्वः परित्यज्यतां**
**देहेऽहम्मतिरुज्झ्यतां बुधजनैर्वादः परित्यज्यताम्॥**

अत्र गर्वस्य अहंभावनायाश्च त्यागः, दुस्तर्कात् विरमणं, पण्डितैः न वादः अपि तु तेषां समादरः विधेयः इत्युक्त्वा चारित्रिकं मूल्यमस्ति प्रतिपादितम्। तत्रापि चतुर्थे श्लोके **नैष्ठुर्यमुत्सर्ज्यताम्** इत्यत्र **चारित्रिकं मूल्यमस्**त्युपदिष्टम्। पञ्चमे श्लोके **चेतः समाधीयतां, पूर्णात्मा सुसमीक्ष्यताम्** इत्याभ्याम् **आध्यात्मिकं मूल्यं** तथा **प्रारब्धं त्विह भुज्यताम्** इत्यत्र **कर्मणः मूल्यं** प्रतिपादितं विद्यते।

**धन्याष्टके मूल्यशिक्षा-**

आचार्याणां विशिष्टं रचनान्तरं वर्तते धन्याष्टकम्। तत्र प्रथमे श्लोके- **ते धन्या भुवि परमार्थनिश्चितेहा** इत्यत्र आध्यात्मिकं मूल्यं, द्वितीये श्लोके वैयक्तिकं, चारित्रिकम्, आध्यात्मिकञ्च मूल्यं न्यगादीत्। चतुर्थे- समदर्शिनश्च इति पदेन सामाजिकं मूल्यं निरूपितम्। शान्तैरनन्यमतिभिर्मधुरस्वभावैः इति अष्टमश्लोकेन चारित्रिकमूल्यानि निरदिशन् आचार्याः।

**अहिमिव जनयोगं सर्वदा वर्जयेद्यः। कृपणमिव सुनारीं त्यक्तुकामो विरागी।**

इत्यादिभिः त्यागस्य मूल्यं प्रत्यपीपदद् आचार्यः। त्यागमूल्येन वैराग्यभावनायाः विकासेन

मिथ्यामोहः लोलुपतादयः दुर्गुणाः नैवाविर्भवेयुः।अन्तिमे सार्वभौमिकं मूल्यं प्रतिपिपादयिषुभिराभाणि आचार्यैः-

**सम्पूर्णं जगदेवनन्दनवनं सर्वेऽपि कल्पद्रुमाः**
**गाङ्गं वारि समस्तवारिनिवहाः पुण्याः समस्ताः क्रियाः।**
**वाचः प्राकृतसंस्कृताः श्रुतिशिरो वाराणसी मेदिनी**
**सर्वावस्थितिरस्य वस्तुविषयाः दृष्टे परब्रह्मणि॥**

**चर्पटपञ्जरिकास्तोत्रे मूल्यशिक्षा-** स्तोत्रेऽत्र-

**दिनमपि रजनी सायं प्रातः शिशिरवसन्तौ पुनरायातः।**
**कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः। भजगोविन्दम्....**
**अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम्।**
**वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशा पिण्डम्॥ भज....**
**बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः।**
**वृद्धस्तावच्चिन्तामग्नः पारे ब्रह्मणि कोऽपि न लग्नः॥ भज....**

इत्यादिषु श्लोकेषु आचार्यैः शाश्वतमूल्यानि वर्तन्ते प्रत्यपादिषत।

**द्वादशपञ्जरिकास्तोत्रे मूल्यशिक्षा-**

**मा कुरु धनजनयौवनगर्वं, हरति निमेषात्कालः सर्वम्-**

इत्यनेन चारित्रिकं शाश्वतं च मूल्ये प्रतिपादिते। एवमेव-

**कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं भावय कोऽहम्।**

इत्यत्र वैयक्तिकं चारित्रिकम् आध्यात्मिकञ्च मूल्यमस्ति निगदितम्।

**त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि सर्वसहिष्णुः।**

इत्यत्र समत्वमूल्यं सार्वभौमिकञ्च मूल्यं निगदितम्। मूल्येनामुना प्रभावितैः सद्भिः अस्माभिः आतङ्कवादः शामयितव्यो भवेत्।

**आनन्द- सौन्दर्यलहर्योः मूल्यशिक्षा-**

शङ्कराचार्यविरचितयोः अनयोः स्तोत्रयोः सौन्दर्यमूल्यानि सन्ति प्रतिपादितानि। यथा-

**मुखे ते ताम्बूलं नयनयुगले कज्जलकला। ललाटे काश्मीरं विलसति गले मौक्तिकलता॥**
**स्फुरत्काञ्चीशाटी पृथुकटितटे हाटकमयी। स्मरामि त्वां गौरीं नगपतिकिशोरीमविरतम्॥**
**विराजन्मन्दारद्रुमकुसुमहारस्तनतटीनदद्वीणानादश्रवणविलसत्कुण्डलगुणा।**
**नताङ्गी मातङ्गी रुचिरगतिभङ्गी भगवती सती शम्भोरम्भोरुहचटुलचक्षुर्विजयते॥** इति।

**प्रश्नोत्तरमालिकायां मूल्यानि-**

आचार्यैरत्र प्रश्नोत्तरविधिना गुरुमहिमा, गुरोः कर्तव्यमिति शैक्षिकमूल्यानि प्रतिपादितानि। यथा- **को गुरुरधिगमतत्त्वः सत्त्वहितायोद्यतः सततम्। किं मरणं मूर्खत्वं(१६)। कुत्र विधेयो यत्नो विद्याभ्यासे औषधदाने (१७)।** एवमेव **यस्य मानसं शुद्धं स शुचिरित्यत्र** चारित्रिकमूल्यं विमृष्टम्। **नलिनीदलगतजलवत्तरलं किमायुः** इत्यत्र शाश्वतं मूल्यं निरूपितम्। **किं मित्रं यन्निवर्तयति पापात्** इत्यत्र सामाजिकं मूल्यं, **कोऽलङ्कारः शीलं, किं वाचां मण्डनं सत्यम्** इत्यादिभिः पङ्क्तिभिः चारित्रिकमूल्यं निरूपितम्। **कोऽन्धो योऽकार्यरतः को बधिरो यश्शृणोति न हितानि (१५)। अवधीरणा क कार्या खलपरयोषित्परधनेषु (१८)। किमनर्घ्यं दत्तमवसरे च** इत्यादिषु सामाजिकानि (सहयोगस्य) मूल्यानि सन्ति प्रतिपादितानि।

एवं श्रीपरमहंसश्रीमच्छङ्कराचार्यविरचितेषु स्तोत्ररत्नेषु समाजोपकारकाणि आत्महिता-र्थानि, वैयक्तिकानि, सार्वभौमिकानि, शाश्वतानि, शिक्षाक्षेत्रे समाकलनीयानि च वरीवर्तन्ते अमूल्यानि मूल्यरत्नानि बोभूयन्ते, यानि नितरामनुसन्धेयानि।एवमेव शिक्षादर्शनतत्त्वानि, शिक्षामनोविज्ञानविषयान्, शिक्षाप्रविधिपरकाः विचारान्, शिक्षा-प्रशासनसम्बन्धितानि तत्त्वानि च तत्र तत्र स्तोत्रेषु आचार्याः प्रत्यपीपदन्। एतेषु विषयेषु अपि अनुसन्धानं विधाय शिक्षाजगतः समाजस्य च अभ्युन्नतीः विदधीमहीति शम्॥

**अनुशीलितग्रन्थसूची-**

1.स्तोत्ररत्नावली- सं. 2062, गीताप्रेस्, गोरखपूर्- 273005

2.बृहत्स्तोत्ररत्नाकरः- 2005, पं. रामतेज पाण्डेयः (सम्पादकः), चौखाम्बा विद्याभवन्, वाराणसी

3.जयन्ती (षष्ठं पुष्पम्)- वि. 2065 (2008), रा. सं. संस्थानम्, मा. वि. जयपुरपरिसरः, जयपुरम्

4.शिक्षा के दार्शनिक आधार- 2009, योगेन्द्र कुमार शर्मा, कनिष्कपब्लिषर्स, डिस्ट्रीब्यूटर्स, नई दिल्ली- 110002.

5. शिक्षायाः दार्शनिकाधाराः- 2005, डा. सोमनाथ साहु, सुशीला पब्लिकेशन्स, कुशङ्ग, चन्दन भाटी, बलाङ्गीर, ओडिशा- 767065.

# योगाः

**विजयानन्दः अडिगः बि.,ज्यौतिषविभागः**

अथ दृश्यते हि ज्योतिश्शास्त्रस्य त्रिष्वपि स्कन्धेषु योगशब्दस्य प्रयोगः। यथा होरास्कन्धे- द्विग्रहचान्द्रनाभसराजयोगादयः, संहितास्कन्धे- रोहिणीस्वात्याषाढीयोगाः विषदग्धामृतसिद्धियोगादयश्च, सिद्धान्तस्कन्धे- नित्ययोगः ग्रहभग्रहयोगौ चेति। देशकालसंसर्गतः समुद्भूयमानानां योगानां फलं होरासंहितयोः प्रोक्तत्वात्तत्साधनक्रमः गणितज्ञैः सिद्धान्तस्कन्धे अभ्यधायि। योगोनामयुतिः, सूर्यचन्द्रमसोः द्वयोः स्फुटयोः युतिरेव नित्ययोगः इत्युच्यते। उक्तं च सूर्यसिद्धान्ते[1]-

**रवीन्दुयोगलिप्ताश्चयोगाभभोगभाजिताः।**
**गतागम्याश्चषष्टिघ्न्योभुक्तियोगाप्तनाडिकाः॥**

इति। अतः रविचन्द्रस्फुटयोगकलाः भभोगकलाभिः विभज्यशेषप्रमाणं ताभिरेव त्यक्त्वा अवशिष्टं षष्ट्या सङ्गुण्य रविचन्द्रगतियोगेन विभज्य वर्तमानयोगकालप्रमाणं सिद्ध्यति। विष्कम्भादिषु नित्ययोगेषु जातानां शुभाशुभफलं तु नारदसंहिता-जातकपारिजातादिषु ग्रन्थेषु विस्तरशः विवृतमस्ति। इत्येवं नित्ययोगानां विचारः। द्वयोः ग्रहयोः अत्यल्पमन्तरं समकलाविकलात्वं वापि योग इत्युच्यते। अयमेव ग्रहयोगो भवति। सोऽयं ग्रहयोगः युद्धसमागमास्तभेदेन त्रिविधः। उक्तं च सूर्यसिद्धान्ते[2]–

**ताराग्रहाणामन्योन्यंस्यातांयुद्धसमागमौ।**
**समागमःशशाङ्केनसूर्येणास्तमनंसह॥**

इति। स्वगतिवशात्प्राङ्मुखम् अभिगच्छतां कुजादीनां पञ्चानां नक्षत्रवद्दृश्यमानानां ग्रहाणां कादाचित् कः अन्योन्यसंयोगः युद्धम् इति, चन्द्रेण सह संयोगः समागम इति, सूर्येण सह संयोगः अस्तः इति च उच्यते। यतो हि, यथा लोके समानबलवतोरेव परस्परं विरोधो दृश्यते तथा ग्रहेष्वपि सामान्येन सूर्यचन्द्रापेक्षया समानद्युतिमतां ताराग्रहाणां पारस्परिकः संयोगः युद्धाय कल्पते। तथैव यथा दुर्बलो राजा बलिष्ठेन राज्ञा सह सख्याय याति न युध्यते तथा अल्पद्युतयो ग्रहाः अधिकद्युतिना चन्द्रेण सह

---

[1]सूर्यसिद्धान्तः – अ.२- श्लो.६५
[2]सूर्यसिद्धान्तः – अ.७- श्लो.१

सख्याय आगत्य समागमं कुर्वन्ति न तु युध्यन्ते। परञ्च स्वतन्त्रप्रकाशेन महातेजोराशिना रविणा सह संयोक्तुकामाग्रहाः स्वसत्तां स्वयमेव नाशयन्ति इत्यतः अस्तङ्गताः भवन्ति।

अथ कथं नु ऊर्ध्वाधः कक्ष्याभेदेन संस्थितानां ग्रहाणां परस्परं योगः इति चेत् वराहमिहिरः[3] एवमाह-

**वियतिचरतामुपर्युपर्यात्ममार्गसंस्थानाम्।**

**अतिदूराद्दृग्विषयेसमतामिवसम्प्रयातानाम्।**

**युद्धंयथायदावाभविष्यदादिष्यतेत्रिकालज्ञैः।**

इति। अतः ऊर्ध्वाधोरूपकक्ष्याभेदंग्रहीतुम् असमर्थाः वयं भूवासिनः युद्धंसमागमम् अस्तमनं वा पश्यामः न तु आकाशे साक्षादेतादृशीस्थितिः सम्भवति। अत एव सूर्यसिद्धान्ते भगवतः उक्तिरस्ति[4] –

**भावाभावायलोकानांकल्पनेयंप्रदर्शिता।**

**स्वमार्गगाःप्रयान्त्येतेदूरमन्योन्यमाश्रिताः॥**

इति। एकस्मिन्नेव कदम्बप्रोतवृत्ते यदा द्वौ ग्रहौ भवतः तदा एव तयोः योगः; इत्युक्ते ग्रहवेधवलयं कदम्बप्रोतं विन्यस्यते चेत्ग्रहाः स्वभावतः कदम्बप्रोतवृत्ते एव सञ्चरन्ति इत्यतः ग्रहयोगोऽपि कदम्बप्रोतवृत्ते एव सम्भवति। परञ्च कदम्बप्रोतनक्षत्राभावात् ध्रुवसूत्रे(ध्रुवप्रोतवृत्ते) युतिः गणितज्ञैः उच्यते। भास्कराचार्यस्यापि अयमेव अभिप्रायः शिरोमणौ दृश्यते। ध्रुवसूत्रीययुतिदर्शनाय आयनदृक्कर्मकर्तव्यं भवति। यदि तु दृक्कर्मद्वयमपि क्रियते तर्हि समप्रोतीया युतिः भवति। एवं ग्रहयुतिं समप्रोतीयां वा ध्रुवप्रोतीयां वा कदम्बप्रोतीयां वा यथाभीष्टं दर्शयितुं शक्यते।अथ इदानीं ग्रहयुद्धभेदान्पश्यामः –

**आसन्नक्रमयोगाद्भेदोल्लेखांशुमर्दनासव्यैः।**

**युद्धंचतुष्प्रकारकंपराशराद्यैर्मुनिभिरुक्तम्॥**

इति बृहत्संहितावचनात्ग्रहयोरतिसान्निध्यात्भेदः, उल्लेखः, अंशुमर्दनम्, अपसव्यश्चेति चतुर्धा ग्रहयुद्धं भवति। एतेषां लक्षणं पृथक्पृथक् अभिहितं सूर्यसिद्धान्ते-

---

[3]बृहत्संहिता - अ१७- श्लो-२,३

[4]सूर्यसिद्धान्तः – अ.७- श्लो.२४

**उल्लेखंतारकास्पर्शाद्भेदेभेदःप्रकीर्त्यते।**
**युद्धमंशुविमर्दाख्यमंशुयोगेपरस्परम्॥**
**अंशादूनेऽपसव्याख्यंयुद्धमेकोऽत्रचेदणुः।**
**समागमोंऽशादधिकेभवतश्चेद्बलान्वितौ॥[5]**

इति। अर्थात् – यदि उभौ ग्रहौ परस्परं भिन्तःतदा एकः इतरस्य बिम्बोपरि दृश्यते; तदा उभयोः अत्यन्तं सङ्घर्षः जायमानः इव भाति। अतः भेदः – भेदनामकं युद्धम् इत्युक्तम्। अत्र ग्रहयोः शरान्तरं मानैक्यार्धात् अल्पं भवति। यदा तु एकस्य ग्रहस्य बिम्बपरिधिस्पर्श एव अन्येन ग्रहेण क्रियते तदा उल्लेखाख्यं युद्धम् इत्युच्यते। अत्र ग्रहयोः शरान्तरं मानैक्यार्धसमं भवति। यदा च ग्रहबिम्बयोः योगः न भवति केवलं तयोः किरणानामेव योगः दृश्यते तदा अंशुविमर्दनामकं युद्धं भवति। अत्र ग्रहयोः शरान्तरं मानैक्यार्धात्किञ्चिदधिकं भवति। यदि द्वयोः ग्रहयोः शरान्तरम् एकस्मात् अंशात् अल्पं भवति तदा दक्षिणेन अन्यो ग्रहः प्रदक्षिणीकृत्य आगच्छति तर्हि अपसव्यनामकं युद्धं भवति।

अत्र एवमपि कल्पयितुं शक्यते – भेदयोगे साक्षात्मल्लयुद्धम् अर्थात्मुष्टीमुष्टिः, उल्लेखे तु दण्डादण्डिः, अंशुमर्दने दृष्टियुद्धम् , अपसव्ये केवलं वाग्युद्धम् इति।

**उल्लेखे विग्रहं ब्रूयात्संग्रामं रश्मिसंकुले।**
**लेखनेऽमात्यपीडास्यात्भेदने तु धनक्षयः॥**
**भेदे वृष्टिविनाशो भेदःसुहृदां महाकुलानां च।**
**उल्लेखे शस्त्रभयं मन्त्रिविरोधः प्रियान्नत्वम्॥**
**अंशुविरोधे युद्धानिभूभृतां**
**युद्धे चाप्यपसव्ये भवन्ति युद्धानि भूपानाम्॥[6]**

इत्यादिना बहुधा संहिताग्रन्थेषु ग्रहयुद्धानां फलं पृथक्पृथक्निरूपितमस्ति। होरायामपि द्विग्रहयोगानां फलप्रवचने द्वयोः मध्यवर्तिस्फुटान्तरं शरान्तरं च सम्यग्विज्ञाय एव फलप्रवचनं कर्तव्यमस्ति अन्यथा समकलविकलात्वाभावे, शरान्तराधिक्ये योगफल-पत्तौ अपि ह्रासःसम्भवेत् इति विचारणीयोऽयमंशः॥

[5]सूर्यसिद्धान्तः – अ.७- श्लो.१८,१९
[6]बृहत्संहिता- अ.१७- श्लो.५

# योगशिक्षा

डा. पि.विद्याधरः, शिक्षाशास्त्रविभागः

शब्दोऽयं वेदोपनिषद्- गीता- पुराणादिषु नानाशब्देषु पुराकालादारभ्यैव विभिन्नेषु अर्थेषु व्यपदिश्यते। भारते अधुना विश्वे च अस्य योगशास्त्रस्य कृते विशिष्ट-ज्ञानमस्तीति अभिज्ञायते। यदा भारतस्य नूतनयुगे 2014 तमे नूतनचयनप्रक्रियानन्तरं शास्त्रस्यास्य विशेषता संसारस्य चतसृषु दिक्षु प्रसरिता इति ज्ञातोऽयं विषयः। यतः जून् 21 तमे दिनाङ्के **विश्वयोगदिवसः** इति। नाम्ना पाल्यते, तस्मात् किञ्चित् योगस्य विषये मद्विचारमत्र प्रस्तौमि।

योगशब्दः व्यापकार्थे ज्ञायते। **युजिर् योग** इति धातुना निष्पन्नः योगशब्दस्यार्थो भवति समरूपपरमात्मना सह नित्यसम्बन्धः। यदुक्तं श्रीमद्भगवद्गीतायां द्वितीयेऽध्याये **समत्वं योग उच्यते** इति। **युज् समाधौ** इति धातुना निष्पन्नयोगशब्दस्यार्थः चित्तस्य स्थिरता, नाम समर्थो योगस्थितिः। यथा-

**यत्रोपरमते चित्तं निरुद्धं योगसेवया।** (भगवद्गीता 6/20)

- **युज् संयमने** धातुना निष्पन्नयोगशब्दस्यार्थः- संयमनम्, प्रभावश्च।
  यथा- **पश्यमेयोगमैश्वरम्** (गीता 9/5)
- **योगश्चित्तवृत्तिनिरोधः**- पातञ्जलयोगदर्शनम् (1/2)

**योगशिक्षायाः आवश्यकता –**

शिक्षायाः प्रमुखोद्धेश्यमस्ति यत् **बालकस्य सर्वाङ्गीणविकासः**। सर्वाङ्गीणविकासो नाम मानसिक- शारीरिक- शैक्षिक- बौद्धिक- आध्यात्मिक- नैतिक- सामाजिकः इत्यादयः। एवं शिक्षायाः मुख्योद्धेशं साधयितुं योगशिक्षा महत्वपूर्णस्थानमाप्नोति। किमर्थमित्युक्ते यान्त्रिकयुगेऽस्मिन् मानवाः विविधैः प्रदूषितैः स्वशरीरस्य स्वास्थ्यं नाशयन्ति। दैनन्दिनकार्याचरणे अकालभोजनं, पर्याप्तनिद्रालोपः, शीघ्रपक्वभोजनं (fast food), आनुवेशिकता(heredity), स्थूलकायः इत्यादिरोगैः पीडिताः। पाश्चात्य पालना-नन्तरं भारतीयशिक्षाप्रणाल्यां सम्पूर्णपरिवर्तनमागतम्, यथा- **मेकाले** इत्यादयः वाञ्छिताः भारते नैतिकशिक्षा न वर्तते इति कथने संशयलेशोऽपि नास्ति। आधुनिकशिक्षाप्रणाली बाह्यविकासाय एवेति न तु आन्तरिकविकासायेति विवेकानन्द-प्रभृतयः बहुधा उद्घोषयन्। तदानीन्तनकालैव (18 दशाब्दे) तां प्राणालीं निराकृतवन्तः।

योगासनमेकं साधनम्। येन मनुष्यः बहुकिञ्चित् स्वयमेव स्वजीवने साधयितुं शक्नोति। योगसाधकाः स्वीयसाधनबलेन अत्युन्नतं स्थानं प्राप्नुवन्ति। तस्मात् योगसाधकाः शरीरं- मनः- प्राणैः एकीकृत्य साधनां- त्यागं- तपस्याञ्च कुर्वन्ति। अनेन साधनेन मोक्षप्राप्तिः जायते। ईप्सितकर्माणि साधयितुम् अर्हन्ति। तथा शरीराणामवयवावस्था सम्यग्भवति, मानसिकी सुस्थिरता च प्राप्स्यते। इन्द्रियाणां निग्रहणं भवति। योगशिक्षया मानवेषु हिंसा, द्वेषः इत्यादि भावाः न्यूनाः जायन्ते। सर्वप्रकारकजनाः (बालाः- स्त्रियः- पुरुषाः- युवानः- वृद्धाः) योगासनादीनि कर्तुमर्हन्ति। योगासनानां निरन्तराभ्यासेन अरिषड्वर्गाणां (काम- क्रोध- लोभ- मोह- मद- मात्सर्यादि) गुणाः संयमसाधकाः भवन्ति। तथा शरीरे रक्तप्रवाहः सुष्ठु भवति। आलस्यादिकं नश्यति। स्मृतिशक्त्यादीनि प्रवर्धन्ते, मानसिकोल्लासं सदैव वर्तते।

विद्यार्थीजीवने अभ्युन्नतिकाले योगासनानि महदुपकुर्वन्ति, यथा-

1.उत्तमगुणानामाकलने 2.बुद्धेः तीक्षणता सम्पादने

3.उत्तमस्वास्थ्यसम्पादने 4. उत्कृष्टचरित्रसाधने च सहयोगः भवति।

योगाद्वारा अध्ययनशीलाः, संयमनशालिनः, मेधाविनश्च भवन्ति। साम्प्रतिकयुगे विद्यार्थिनः चञ्चलमनस्काः, चाञ्चल्याः भूत्वा स्वचरित्रं स्वीयहस्तेन नाशयन्त्यः सन्ति। तथैव वाञ्छितवस्तु अप्राप्तावपि स्वं वा अपरं वा मारयन्नः दरीदृश्यन्ते। अपरिपक्ववातावरणे शिक्षां प्राप्नुवन् , तस्याधारित मित्रतामप्राप्नुवन्, अनावश्यक-विषयाणामुपरि इच्छां प्रादर्शयन्, अन्यान् दृष्ट्वा नकारात्मक प्रेरणां प्राप्नुवन्, असाङ्किकचित्राणि अवलोकयन्, असामाजिककार्येषु व्यापृताः सन्तः स्वजीवनं नाशयन्तः अवलोकयन्ते। तस्मात् योगशिक्षा अनिवार्यरूपेण पाठ्यपुस्तकेषु स्तरानुगुणं योजयेत्। योगासनानि अवश्यं प्रतिदिनं नियमितकालावधौ निश्चयेन कर्तव्यमध्ययनवेलायाम्।

**योगकरणवेलायाम् अनुसर्तव्याः सूचनाः –**

1.यं कमपि व्यायामात् प्राक् उदरशुद्धिः कर्तव्या।

2.योगासनानां प्राक् शौचादिदैनन्दिनकार्याणि अवश्यं समापनीयानि।

3.योगसमये उदरं रिक्तं भवेत्।

4.सुशिक्षिताध्यापकस्य समक्षैव प्रशिक्षणं प्राप्य किञ्चित् कालं तत्रैव सूचनानुगुणम् अभ्यासश्च कार्यः।

5.वातावरणं शुद्धम्, स्वच्छम्, योग्यञ्च स्यात्। अवधानस्य भङ्गः यथा न स्यात्। नाम वातावरणानुकूलं भवेत्।

6.योगसाधनसमये सर्वदा च सात्विकाहारः एव ग्राह्यः।

7.अनारोग्यस्य समये योगस्य अभ्यासः न कार्यः।

8.स्त्रियः निषिद्धसमयेषु अभ्यासाः त्याज्याः।

एवं बहुधा शिक्षकाणां सूचनानुगुणं साधुयोगाभ्यासेन नैतिकमूल्यानां रक्षणं भवति। स्वयं मानवः विवेकाविवेकज्ञानं प्राप्तुमर्हन्ति। स्वयं मानवः कुयोग्यविषयेभ्यः रक्षितः तस्मात् समाजोऽपि सुरक्षितो तिष्ठति।

**अष्टाङ्गयोगः –**

श्रीमान् वेदव्यासेन विरचित महाभारते **वैयासिकी** महापुराणे निगदितं वर्तते यत्- **वेदेषु चाष्टगुणिनं योगमाहुर्मनीषिणः** तथैव **योगाङ्गाऽनिष्ठानादशुद्धं क्षये ज्ञानदीप्तिराविवेकज्ञातेः** इति पातञ्जलि योगदर्शनेऽपि प्रत्यपीदत्। अर्थात् अष्टाङ्गयोगानुष्ठानेन क्लेशरूपकम् अशुद्धत्वं दूरीभवति। सम्यक् ज्ञानप्रकाशोऽपि एधतेति।

**अष्टाङ्गानि तद्यथा –**

यमनियमासन प्राणायाम प्रत्याहार।
ध्यान धारण समाधियोऽष्टावङ्गानि॥

अत्र अमीषाणाम् अष्टाङ्गानां सामान्यविचारः क्रियते।

**यमः –** पतञ्जलिनोक्तं यत्-

**अहिंसासत्यास्तेयब्रह्मचर्यपरिग्रहाः यमाः॥** (यो. द. 2/30)

अद्यत्वे योगस्योपयोगिता अनिवार्या अस्ति। योगशास्त्रं सम्पूर्णं पतञ्जलिदृष्ट्या विज्ञानसारः। सुष्टुयोगकरणेन साम्प्रतिकयुगे दृश्यमान नैकेषु क्षेत्रेषु आत्मन्यूनता, भयावहता, सन्दिग्धावस्था, समन्वयलोपः, परस्परद्वेषभावना इत्यादयः दूरीभवेयुः। योगेऽस्मिन् आत्मनः सह समुत्कर्षावस्थानां समावेषो दृश्यते। अर्थात् मानवजातेः समुन्नत्यै तथा वास्तविकशुद्धतायाम् अहिंसा- सत्य- अस्तेय- ब्रह्मचर्य- अपरिग्रहादि पञ्चयमाः निश्चितरूपेण पालनीयः।

**नियमाः –** पतञ्जलि उक्तरीत्या-

**शौचसन्तोषतपः- स्वाध्यायेश्वर- प्रणिधानातिनियमाः।** (यो. द. 2/32)

योगेषु अन्यतमाधारभूतमङ्गो भवति नियमः। अर्थात् सुस्वास्थ्यसाधनार्थं नियमान्तर्गताः शौच- सन्तोष- तप- स्वाध्याय- ईश्वरप्रणिधानादयः पञ्चनियमाः। मानवाः प्रत्यहजीवनाय अवश्यं पालनीयाः।

**आरोग्यसाधनम् (लाभाः) –** उपर्युक्त अङ्गद्वयेन **उद्धट्** विद्वांसानां वचनानुसारं प्रतिदिने स्नानादि कर्माणि सम्पाद्य शारीरिकशुद्धतां विधाय, शुद्ध- निरामिषभोजनं कृत्वा अस्थिरतां परश्रीकातरनां त्यक्त्वा मानवाः भगवतः नामकीर्तनञ्च विदधाति चेत् तेषां शरीरं निरोगं- मनगं- मनश्च शान्तं भवेदेव।

**आसनानि –** पतञ्जलिना प्रोक्तं यत्-

**स्थिरं सुखमासनम्।** (यो.द. 2/46)

अर्थात् स्थिरतया सुखेन चोपवेशनमेवासनम्। आधुनिकयुगे प्रतिगृहे सर्वेऽपि येन केनापि रोगेण बाधिताः एव दृश्यन्ते। निरोगजीवनसाधनार्थं योगासनेषु विद्यमान आसनानि सुष्ठु करणीयानि। हठयोगे मुख्यतया 84 प्रकारात्मकासनानां विषये विवेचितं वर्तते। उपर्युक्तासनानां क्रमरूपेण अभ्यासेन शरीरे विद्यमान अङ्गप्रत्याङ्गानि क्रियाशीलानि भवन्ति।

**उपयोगिता–** शीर्षासन- सर्वाङ्गासनविधानेन मस्तिष्के रक्तं शुद्धं भवति। यस्मात् धारणाशक्तिः- बुद्धिः- स्मृति इत्यादीनां विकासो भवति। मेधवृद्धिः, दुर्बलतायाः दूरीकरणमपि जायते।

**प्राणायामः –** पतञ्जलि प्रणीतम् –

**तस्मिन् प्रति श्वासप्रश्वासयोर्गतिर्वि प्राणायामः।** (यो.द.2/49)

प्राणायामस्य मुख्यमङ्गं भवति नासिका। आसनद्वारं सुखं स्थित्वा श्वासप्रश्वासयोः गतिनियन्त्रणमेव प्राणायामः।

**प्राणयामप्रकाराः –** यथा पूरक- कुम्भक- रेचक, नियमपालनेन यदि प्राणायामादिपालनं क्रियते तर्हि अज्ञानावरणस्य दूरीकरणं भवति। शुद्धप्राणायामद्वारा आयुरपि अभिवर्धते।

**प्रत्याहारः –** अनेन आलसप्रमादरूपतमोगुणस्य, बहिर्मुखतारूपरजोगुणस्य विनाशो भूत्वा इन्द्रियाणि वशीभूतानि भवन्ति।

**ध्यान- धारण- समाधयः-** इमे अन्तरङ्गयोगाः। धारणानन्तरं ध्यानस्य गतिर्भवतीति केचन वदन्ति।

**धारणा-** मनः यदा परब्रह्मणि स्थिरा भवति तदा धारणेत्युच्यते। धारणा द्विधा-वैराग्यधारणा, अन्तर्यामिधारणा चेति।

**ध्यानम्–** साधकस्य हृदि भगवतः समग्रशरीरं धारणारूपेण निश्चला भवति तदेव ध्यानम्।

**समाधिः –** मनः यदा भगवति लयं प्राप्नोति तदा समाधिरुच्यते। एभिः योगैः सत्वशक्तिः आधिक्यं भवति। येन मानवाः संयमी भूत्वा मानसिकविकारेभ्यः मुक्तो तिष्ठति।

**निष्कर्षः –** अतः साम्प्रतिकशिक्षाप्रणाल्यां विद्यालयेषु, कलाशालासु, विश्वविद्यालयेषु च निश्चितरूपेण योगशिक्षायाः प्रणालीः पाठ्यपुस्तकेषु सारयेत्। येन बालकानां शारीरिक-मानसिक-बाह्यान्तरिकविकासाश्च जाजायन्ते इति शिक्षाशास्त्रिणामभिमतम्।

**अनुसूचित ग्रन्थसूचि –**

1. श्रीमद्भगवद्गीता
2. योगदर्शनम्
3. पतञ्जलि योगसूत्राणि
4. महाभारतम्
5. विद्यालयप्रशासनं शारीरिकशिक्षा च।

# केरलस्य नवोत्थानप्रक्रियायां वैकुण्ठस्वामि-चट्टम्पिस्वामि-श्रीनारायणगुरु-ब्रह्मानन्दशिवयोगिनां योगदानम्

**गायत्रीदेवी जि, अद्वैतवेदान्तविभागः**

नवञ्च तदुत्थानञ्चेति नवोत्थानमुच्यते। अन्धविश्वासानाचारादिजटिलस्य जनसमूहस्य नवतया उत्थानमपि नवोत्थानमेव। अन्धविश्वासान् अनाचारांश्च दूरीकर्तुं बहवः आचार्याः बहुधा प्रायतन्त। तेषु केरले वैकुण्ठस्वामिनः, वायत्तस्वामिनः, चट्टाम्पिस्वामिनः, श्रीनारायणगुरवः, ब्रह्मानन्दशिवयोगिनः, आगमानन्दस्वामिनः, वाग्भटानन्दगुरवश्चैते आचार्याः अङ्गुलिगण्येषु अन्यतमाः प्रमुखाः सन्ति। एते महान्तः आचार्याः अध्यात्ममार्गेण समूहोन्नत्यर्थं प्रयत्नमकुर्वन्। तदानींतन जातिव्यवस्थाकारणेनैव एतस्याः जनतायाः अधःपतनमभूदिति ज्ञात्वा तन्निवारणम्, अर्थात् नैतिकाधःपतनादुन्नतिः, आत्मविद्यया एव भवतीति धिया तैः सामूहिकोत्थानाय प्रतिजज्ञे। एते महात्मानः अधःकृतानां प्रोन्नत्यै प्रवर्तमानाः सन्तः सामूहिकसांस्कारिकमण्डलेषु समत्वसम्पादनाय सवर्णानामवर्णानां च मनः परिवर्तनं चक्रिरे। एतेषु आचार्येषु **वैकुण्ठस्वामिचट्टम्पिस्वामिश्रीनारायणगुरुब्रह्मानन्दशिवयोगिनां योगदानविषये अत्र विचारः क्रियते।**

**वैकुण्ठस्वामिनः-**

कन्याकुमारीदेशे स्वामितोप्प्-ग्रामे 1809 तमे वर्षे पोन्नुमाडन्-वेयिलाल् अम्मादम्पत्योः पुत्रत्वेन अस्य जन्म अभूत्। अयं च महाभागः अधिकारिजनानां सवर्णानां च अधिकारदुर्विनियोगसमाप्तये प्रायतिष्ठ। किन्तु एते स्वजन्मदेशे, एवं समीपदेशेष्वपि स्वाशयं प्रचारयामासुः। अनन्तरकाले च तानि स्थानानि योजयित्वा कन्याकुमारी 'जिल्ला'प्रदेशःसञ्जातः, यश्च इदानीं तमिळनाडुराज्ये योजितः। अतः केरले एतेषां महाभागानां तावती प्रसिद्धिः न बभूव। 1836 तमे वर्षे एतैः **समत्वसमाजः** इति संस्था प्रास्थापि। अस्याः संस्थायाः प्रभावः समूहे अत्यन्तमहत्त्वपूर्णः आसीत्। कन्याकुमार्यां स्थापितायाः अस्याः संस्थायाः शाखाः कोल्लंदेशस्य कोट्टारक्करापर्यन्तं प्रसृताः। केरलस्य प्रथमा सामाजिकसंस्था[1] (Social Organization) 'समत्वसमाजः' आसीत्। सामूहिकानाचाराणां विनाशनं एवं

[1] Kerala History – A Sreedhara Menon, p.no. 508

समत्वस्य सम्पादनं च समत्वसमाजस्य लक्ष्यमासीत्। वैकुण्ठस्वामिभिः – अकिलत्तिरुट्, तिरुवरूल्, असत्[2]इति ग्रन्थत्रयं रचितम्। एषु ग्रन्थेषु चरित्रपराणि, आत्मकथायुक्तानि, दर्शनसम्बन्धीनि च विवराणि वर्णितानि।

वैकुण्ठस्वामिनः 1851 तमे वर्षे स्वजन्मदेशे, शास्तांकोविल्विलयिल् इति स्थाने मन्दिरं निर्माय दर्पणप्रतिष्ठाम् अकुर्वन्[3]। दर्पणप्रतिष्ठापनेन हि "अहंब्रह्मास्मि"[4] "तत्त्वमसि"[5]इत्यादि महावाक्योक्तम् अद्वैततत्त्वं भावयितुं शक्यत इति एतेषां मतम्। एवं प्रथमतया दर्पणप्रतिष्ठा एतैः कृता, तदनन्तरम् अस्य प्रयोजनं मत्वा नारायणगुरवः अपि एतन्मार्गम् अन्वसरन्। स्वात्मबोधेन च जनाः उद्बोधिताः स्युः, वर्णजातिभेदभावनां विहाय सरलतया सहोदरभावेन जीवनं यापयेयुः, तेन च सर्वे परमार्थभूतम् अद्वैततत्त्वं प्राप्नुयुः इति ते अचिन्तयन्। तस्मिन्काले केरले मद्यमांसादिना भूतपिशाचादीनां, काल्यादीनाम् उग्रदेवतानाञ्चाराधनं कुप्रसिद्धं आसीत्। जनाः अपि भूतबल्यादिकं कृत्वा यथेच्छं सुरां पिबन्मांसं च अभुञ्जन्। एतत्क्रूरपरम्पराम् उच्छेत्तुं क्रूरदेवताराधनं निषेधनीयं, तेन जनाः अपि सन्मार्गचराः भवन्ति इति एतेषां मतम्। सुरानिर्माणविक्रयोपयोगानां निवारणेन समूहे शान्तिः उत्पादयितुं शक्या इति तन्निवारणार्थमपि ते बहुधा प्रयत्नमकुर्वन्। एवं तैः स्वदेशे विद्यालयाः व्यवसायशालाश्च निर्मिताः, येन जनाः विद्यासम्पन्नाः सम्पादनशीलाः प्रयत्नशालिनश्च भवेयुः। तत्काले सर्वकारस्य 'कर'नियमाः (tax rules) बहुकठिनाः आसन्। तेषां पुनर्विचिन्तनं, न्यूनीकरणमित्यादि विषयान् अभिलक्ष्य तिरुवनन्तपुरे नाञ्चिनाडुग्रामे कृषकान्संयोजयित्वा सर्वकारस्य विरुद्धं घोषणं कृत्वा प्रक्षोभं कृतवन्तः। एवमायोजितः प्रक्षोभः भारते प्रथमतया सञ्चालितः आसीत्। सर्वकारस्य विरुद्धमेव प्रक्षोभः सङ्घटितः इत्यतः वैकुण्ठस्वामिना काराग्रहवासः अपि अनुभूतः।

तस्मिन्काले अधःकृतानां स्त्रीणां वक्षसि वस्त्रधारणं निषिद्धमासीत्। एतन्मध्ये अधःकृतेषु विभागेषु 'चान्नार्' इति अवर्णविभागीयाः क्रिस्तुमते एतादृशवर्णभेदः नास्तीति तन्मतं स्वीकृतवन्तः, ततः तद्विभागीयाभिः स्त्रीभिः वक्षसि वस्त्रधारणमपि

---

[2]हिन्दुत्वराष्ट्रियंकेरलत्तिल् – नारायणन्पि (Page No.26)
[3]हिन्दुत्वराष्ट्रियंकेरलत्तिल् – नारायणन्पि (Page No.26)
[4]बृहदारण्यकोपनिषत् - १-०४-१०
[5]छान्दोग्योपनिषत् - ६-१०-०३

कृतम्। एतद्दृष्ट्वा सवर्णाः क्रुद्धाः भूत्वा तासामुपद्रवं कृतवन्तः। अतः कारणात् चान्नार्जनाः दुःखिताः क्रुद्धाश्च बभूवुः। तदा च वैकुण्ठस्वामिनः एतान्सम्प्रचोद्य सङ्घशक्तिं बोधयित्वा जातिवर्णभेदभावनामपास्य एकीभूत्वा स्थातुं प्रेरितवन्तः। अस्य फलमेव चान्नार् प्रक्षोभत्वेन[6]आगतः, येन केरले सामूहिकनवोत्थानस्य दीपः प्रथमतया ज्वलितः। एते स्वामिपादाः जनान्स्वजीवनयापनाय स्वप्रयत्नेन धनसम्पादनं कर्तव्यमिति उद्बोधयामासुः। कर्मकारत्व (Slavery) मनोभाव एव परमदोषः, तादृशभावः मरणतुल्यः इति तेषां मतम्। तद्विना समत्वसम्पादनमशक्यमिति अभिप्रायः। अपि च सार्वजनिकवापीकूपतडागादीनां निर्माणेन जातिवर्णवर्गभेदनिराकरणम् अकुर्वन्। तस्माच्च ततः सर्वैरपि जलोपयोगः कर्तुं शक्यमभवत्। एवं मिश्रभोजनादिना अपि सवर्णानां आधिपत्यं, दुराचारं च शमयितुम् एते प्रवृत्ताः। अन्ये नारायणगुरुप्रभृतयः एतेषाम् आचारान्स्वजीवने कर्मपथे च आनीतवन्तः। वस्तुतः वैकुण्ठस्वामिनां प्रवर्तनैः प्रचोदिताः एते महान्तः सामूहिकोन्नत्यर्थम् अत्यन्तं प्रयतमानाः आसन्।

**चट्टम्पिस्वामिनः-**

एकोनविंशतिशतके जीवितेषु सामूहिकपरिष्कर्तृषु अग्रगण्याः एते महाभागाः तिरुवनन्तपुरं जिल्लाप्रदेशे 1853 तमे वर्षे ब्राह्मणजातीयस्य वासुदेवशर्मणः नायर्-जातीयायाः नङ्गम्मापिल्लायाश्च पुत्रत्वेन जनिं प्रापुः। एतेषां बाल्यनाम "कुञ्ञन्पिल्ला" इत्यासीत्। यथापूर्वं सवर्णानां विवाहविषये सूचितं तथा अस्य वासुदेवाख्यस्य ब्राह्मणस्य विवाहेतरसम्बन्धेन एते जन्मप्राप्तवन्तः इत्यतः पितुः स्नेहादिकं न प्राप्नुवन्। मातुः परिवारे अपि दारिद्र्यम् आसीदित्यतः "अय्यप्पन्" इत्यप्यभिधानसहितोऽयं कुञ्ञन्पिल्ला बाल्यकाले ब्राह्मणगृहेषु कार्यं कृत्वा विद्याभ्यासमकृत्वा जीवनं यापयामास। ब्राह्मणगृहेषु बालकानाम् अध्यापनं प्रचलतीति दृष्ट्वा जिज्ञासुरयं बालः तच्छ्रावंश्रावं स्वयं विद्यां समपादयत्। अयमपि पठतीति दृष्ट्वा दण्डं दातुं प्रवृत्ते सति तत्रत्यः अध्यापकः अस्मै सन्तुष्टः सन्पठितुमवसरं कल्पितवान्। पठनेन सह कार्यादिकं कृत्वा मातुः संरक्षणमपि अनेन कृतम्। संस्कृतं, मलयालं, तमिल् इत्यादिभाषाः

[6]केरलचरित्रम् – प्रो.टि.के.गङ्गाधरन्(Page No.376)

गणितेतिहासादि विषयांश्चाधीत्यापि अस्य आकाङ्क्षा अनिवर्तिता, तृप्तिः न जाता इति ज्ञात्वा पितृव्यस्य पुत्रः एनं पेट्टयिल् रामन्पिल्ला आशान् इति गुरोः गुरुकुलं प्रेषितवान्। ततः सर्वमधीत्य पुनः स्वप्रयत्नेन दर्शनान्यपि अभ्यस्य एते महाभागाः समाजोन्नत्यर्थं प्रयत्नं कृतवन्तः।

अस्पृश्यताद्यनाचारदोषभूयिष्ठे केरलराज्ये अवर्णानामधःकृतानां शिरसि पाशायमानानामनाचाराणां ध्वंसनार्थं प्रायेण कालः एव प्रतीक्षते स्म। द्वैतभावनया एव एतादृशाः अनाचाराः वर्धन्ते इति ज्ञात्वा चट्टम्पिस्वामिनः अद्वैतब्रह्मविद्यायाः प्रायोगिकाविष्करणेन जनान् उद्धारयितुं प्रवृत्ताः। एतेन च प्रायोगिकाद्वैतवेदान्तेन समूहस्य सांस्कारिकोत्थापनं कर्तुम् एते प्रायतन्त। अतः आदौ सर्वेषां दर्शनानाम् अध्ययनं कृत्वा अद्वैतभिन्नानि दर्शनानि निराकरणं कृतवन्तः। उपनिषत्सारभूतम् इदम् अद्वैतदर्शनं सामूहिकसांस्कारिकस्तरेषु मनुजानाम् एकत्वबोधसम्पादनाय उपकारकम् इति एते ज्ञातवन्तः। संन्यासस्वीकरणात्परं श्रीभट्टारकनाम्ना अपि एते प्रथिताः अभवन्।[7] 1923 तमे वर्षे एते महान्तः कोल्लंदेशस्य समीपस्थ 'पन्मना' ग्राममागताः। तत्र तदा अतिप्रसिद्धः आसीत्कुम्पलत्तुशङ्कुपिल्ला इति समाजप्रवर्तकः येन कोल्लंदेशे प्रसिद्धः 'देवस्वंबोर्ड्' कलालयः स्थापितः। स्वामिनः कञ्चित्कालमनेन महाभागेन सह उषित्वा 'भूमौ अन्तिमकालयापनाय अत्र पुनरागमिष्यामि'[8] इत्युक्त्वा ततः तिरुवनन्तपुरं प्रस्थिताः। गच्छताकालेन, रोगेण पीडितः सन्तः ते पन्मनां प्रत्यागताः। मध्ये मार्गे कोल्लंदेशे नारायणगुरुं दृष्ट्वा एकां रात्रिम् उषितवन्तः। पन्मनां प्राप्य तत्र 'कावु' (small forest situated near houses and temples) प्रविश्य 1924 तमे वर्षे मेय् मासस्य 5 दिनाङ्के स्वकर्मपरिसमाप्तौ ते ब्रह्मणिलीनाः।

तस्मिन्काले केरले वैक्कं सत्याग्रहः[9]सञ्जातः, यश्च अधःकृतेभ्यः मन्दिरसमीपस्थमार्गस्य उपयोगाय अवसरप्राप्त्यर्थम् आयोजितः आसीत्। सवर्णावर्णभेदेन विना मन्दिरप्रवेशार्थं मन्दिरसमीपस्थ- मार्गोपयोगार्थं च सर्वेभ्यः अवसरः दातव्यः इत्येवासीत्स्वामिनां मतम्। सर्वेष्वपि विषयेषु सुव्यक्ताभिप्रायसहिताः

---

[7]परमभट्टारकश्रीचट्टम्पिस्वामिकल् – पि.के.परमेश्वर्नायर्(Page No.42)
[8]केरलचरित्रम् – प्रो.टि.के.गङ्गाधरन्(Page No.405)
[9]केरलचरित्रम् – प्रो.टि.के.गङ्गाधरन्(Page No.401)

एते शास्त्रेषु सङ्गीतकलादिषु च प्रतिभाशालिनः आसन्। सर्वत्र समदर्शितां प्राप्य पिपीलिकसर्पश्वानादीनां नियन्त्रणं कर्तुमपि समर्थाः आसन्। बैबल्, खुरान् तथा वेदोपनिषत्तन्त्रयोगादिषु विद्यास्थानेषु एतेषां पाण्डित्यम् अतिगहनं दृश्यते स्म। प्रवर्तनपद्धतौ चिन्तायां च एते अद्वैतिनः एव। 'अद्वैतप्रचारकः' इति श्रीशङ्कराचार्यः प्रसिद्धः, किन्तु केरले अद्वैतमूलानि स्वांशीकृत्य केरलनवोत्थानप्रवर्तनेषु अग्रगण्यौ आस्तां नारायणगुरुचट्टम्पिस्वामिनौ। चातुर्वर्ण्यमतम् अनङ्गीकृत्य चट्टम्पिस्वामिनः युक्तिभिः 'वेदाधिकारनिरूपणे' 'आदिभाषायां' च अद्वैतं तत्त्वं समास्थापयन्। अद्वैतस्य उत्तमान् अंशान्स्वीकृत्य प्रवृत्तिपथे एतैः आनीतम्। अद्वैतमतं स्नेहस्य मतम् इति एतेषाम् अभिप्रायः। अतः एते 'अद्वैतचिन्तापद्धतिः' नामके ग्रन्थे अद्वैतस्य आशयान्विशदीकृत्य पूर्वपक्षसमाधानमपि अकुर्वन्। एतेषाम् आशयेषु आकृष्टः मन्नत्तुपद्मनाभः 'नायर् सर्वीस् सोसैट्टि'[10]स्थापयित्वा नायर् जनानां समुद्धारणाय प्रायतत, अनेन प्रेरिताः नायर् विभागीयाः अधः कृतानाम् उन्नत्यर्थं प्रयत्नम् अकुर्वन्। एवं नवोत्थानप्रक्रियायाः चालकशक्तिरेव आसन् एते महान्तः। तेन च एते सज्जनानां मनसि चिरंजीवन्ति।

**श्रीनारायणगुरवः-**

1854 तमे वर्षे तिरुवनन्तपुरंजिल्लायां 'चेम्पषन्ति' ग्रामे माडनाशान्-कुट्टियम्मादम्पत्योः पुत्ररूपेण ईळवविभागे महाजनोऽयं जन्म लेभे। तस्मिन्काले ईळवजनाः अधिकृताः चेदपि एतेषां वायल्वरम्पत्तु इति कुटुम्बं सम्मानितमासीत्। शास्त्रेषु चिन्तने च एतेषां प्रागल्भ्यं दृष्ट्वा श्रीचट्टम्पिस्वामिना बालसुब्रह्मण्यमन्त्रोपदेशः दत्तः। अनन्तरं तैक्काड् अय्याव्[11]इति योगिनं प्राप्य शिष्यत्वं सम्पाद्य सम्पादितविद्यायाः निदिध्यासनं कर्तुं मरुत्वामला देशं गत्वा तपः तप्तवान्, तत्फलं च समाजोन्नत्यर्थं विनियोजितवान्। ईळवादिभिः अधःकृतैः भूतादीनामुपासना क्रियते इति दृष्ट्वा तन्निवारणाय, सवर्णप्रतिष्ठितेषु मन्दिरेषु एतेषां प्रवेशनमपि निषिद्धमिति ज्ञात्वा च 'अरुविप्पुरं' नामकेदेशे 1887 तमे वर्षे महाशिवरात्रिदिने शिवलिङ्गप्रतिष्ठाम्[12]

[10]केरलचरित्रम् – प्रो.टि.के.गङ्गाधरन्(Page No.404)
[11]ब्रह्मश्रीनारायणगुरुविन्टेजीवनचरित्रसङ्ग्रहम् – एन्कुमारन्आशान्(Page No.5)
[12]केरलचरित्रम् – प्रो.टि.के.गङ्गाधरन्(Page No.390)

अकुर्वन्। यदा तु सवर्णैः एतद्विषये प्रतिरोधः कृतः तदा एते गम्भीररवेण – “एषः न ब्राह्मणशिवः, किन्तु ईळवशिवः”[13] इति प्रत्यवादिषुः। एवम् एतेषां समाजसमुद्धारण-शैल्या प्रसिद्धः मलयालमहाकविः कुमारनाशान् अपि प्रभावितः। तस्मिन्नेव काले डा.पल्पुमहाभागोऽपि अधःकृतानाम् उन्नत्यर्थं प्रयतमानः आसीत्। एवं नारायणगुरुः, कुमारनाशान् तथा डा.पल्पुः इति त्रयः मिलित्वा 1903 तमे वर्षे (1078कोल्लम्) जनवरीमासस्य 4दिनाङ्के 'श्रीनारायणधर्मपरिपालनयोग'[14]इति संस्थामस्थापयन्। योगप्रवर्तनैः, विवेकोदयनामिकायां मासिक्यां लिखितैः लेखनैश्च केरले विद्यमानानामनाचाराणां दूरीकरणार्थं बहुप्रयत्नमकुर्वन् एते महान्तः। विद्यालयानां पुस्तकशालानां च स्थापनाय प्रचोदनमपि एतैः दत्तम्। तेन च सर्वे विद्यासम्पन्नाः भवन्तीत्यतः समाजोन्नतिरपि स्वयम् अनायासेन भविष्यतीति एतेषां दूरदृष्टिरासीत्। 1903 तमे वर्षे नारायणगुरवः 'वर्कला'देशं प्रति बहुवारं यात्रामकुर्वन्, पुनश्च शिवगिरिस्थाने शारदामठमपि[15] स्थापितवन्तः। तथैव आलुवादेशे पेरियार्नदी(आलुवानदी) समीपे 1913 तमे वर्षे अद्वैताश्रममपि[16] प्रातिष्ठिपन्। तत्र जातिमतवर्णवर्गभेदं विना बालानां विद्यार्जनाय पाठशालामपि व्यवस्थापितवन्तः। तत्र आश्रमे सहभोजनपद्धतिमपि गुरूणां मार्गदर्शने सर्वौः अन्वसरन्।

मद्यनिर्माणम् ईळवजनानां कार्यमासीत्तस्मिन्काले। नारायणगुरवः मद्यस्य दोषफलानि ज्ञात्वा 1920 तमे वर्षे स्वस्य जन्मदिनाघोषवेलायां मद्यनिर्माणं, मद्यविक्रयणं तथा मद्यपानं निषेद्धव्यमिति उद्घोषणम् अकुर्वन्। मधुरै, कुम्भकोणं, कारायिक्कल् इत्यादिषु तमिल् देशेष्वपि तैः आश्रमाः स्थापिताः। यात्रान्ते एते अद्वैताश्रमं प्रत्यागताः। अत्रैव 1923 तमे वर्षे रवीन्द्रनाथठाकूर्महाशयाः गुरूणां दर्शनम् अवाप्नुवन्। 1924 तमे वर्षे नारायणगुरूणां शिष्यः महाकविः कुमारन् आशान् तथा चट्टम्पिस्वामिनः ब्रह्मैक्यम् अवापुः। 1925 तमे वर्षे नारायणगुरवः महात्मना गान्धिना सह तत्कालीनसामाजिकपरिष्करणविषये चर्चां कृतवन्तः, सा

[13]केरलचरित्रम् – प्रो.टि.के.गङ्गाधरन्(Page No.390)
[14]केरलचरित्रम् – प्रो.टि.के.गङ्गाधरन्(Page No.14)
[15]केरलचरित्रम् – प्रो.टि.के.गङ्गाधरन्(Page No.391)
[16]केरलचरित्रम् – प्रो.टि.के.गङ्गाधरन्(Page No.391)

सर्वकालेष्वपि अतिप्राधाना गण्यते।[17] विवाहादिकार्यक्रमेषु विद्यमानाः असमीचीनव्यवस्थाः निराकर्तव्याः इति कृत्वा तैः तत्र पृथक्तया आचारः स्थापितः, येन वधूवरयोः मनसि विवाहविषये पवित्रता समागच्छेत्। नूतनव्यवस्थानुसारेण, विवाहमण्डपम् अलङ्कृत्य तत्र अष्टमङ्गलवस्तूनि स्थापयित्वा दीपः ज्वालनीयः; वधूवराभ्याम् अष्टमङ्गलेन सह दीपस्य त्रिवारं प्रदक्षिणं कृत्वा अन्योन्यं पुष्पमालाधारणं कर्तव्यम्। विवाहसमये पावित्र्यसम्पादनाय पुरोहिताः मन्त्रोच्चारणं कुर्युः; अन्ते पुरोहिताः मलयालभाषायां विवाहस्य पवित्रताख्यापनाय श्लोकोच्चारणं च विदध्युः। मनोहरोऽयमाचारः तदीयैः विभागैः आदरेण स्वीकृतः। नूतनसमूहस्य निर्माणार्थं नारायणगुरवः शाङ्करवेदान्ततत्त्वान्येव स्वीकृतवन्तः। प्रपञ्चस्य मिथ्यात्वावगमार्थम्, एवं ब्रह्मणः परमार्थख्यापनार्थञ्च आत्मज्ञानमपेक्षते इत्यस्मिन्विषये शङ्करनारायणयोः मतं समानम् आसीत्। गुरुणा विरचिते दर्शनमाला नामके ग्रन्थे "ओंतत्सदितिज्ञानप्राप्तिरेव लक्ष्यम्" इति निरूपितं दृश्यते[18]। "यथा बीजादङ्कुरोत्पत्तिः तथा अयं दृश्यमान प्रपञ्चः मायाशक्तिसमुत्पन्नः"[19]इति प्रपञ्चोत्पत्तिनिरूपणं कृतमवलोक्यते दर्शनमालायाम्। यदिदं सदिति असदिति च अनुभूयते तत्सर्वं ब्रह्म एकमेवाद्वितीयं च। एवं ब्रह्मणः एकत्वे सति मतदेशभेदः केवलं कल्पित एव, न तु वास्तवरूपेण तस्य सत्यत्वम्। तस्मात् गुरुणा उच्यते – "एका जातिः, एकं मतम्, एको देवः मनुष्याणाम्"[20]इति। एवं परमात्मसत्यत्वबोधे सत्यपि सामान्यजनानामुद्धारणार्थम् आदौ विग्रहपूजादिकम् अङ्गीकृतवन्तः; किन्तु अन्तिमकाले दर्पणप्रतिष्ठा कर्तव्या इति आसीत्तेषां मतम्। दर्पणे स्वप्रतिबिम्बदर्शनेन, चिन्तनेन, मननादिना च आत्मबोधे जाते सति समाजनवोत्थानं सुकरम् इति तैः तत्र प्रयत्नः कृतः। एतच्च आदौ वैकुण्ठस्वामिना कृतमासीत्, किन्तु अनन्तरकाले नारायणगुरोः अनुगामिजनैः तान्परितः दर्पणं संस्थाप्य तथैव दर्पणप्रतिष्ठा इति व्याख्यानः कृतः, एवं प्रचारश्च कृतः। गुरुणा विरचिते आत्मोपदेशशतके, दर्शनमालायां, मुनिचर्यापञ्चके, ब्रह्मविद्यापञ्चके च अद्वैतसिद्धान्तस्य सरलया भाषया प्रतिपादनं द्रष्टुं शक्यते। एवम्

[17] Young India-Journal dtd. 10-7-1924
[18] दर्शनमाला-7-10
[19] दर्शनमाला- 1-03
[20] जातिनिर्णयम् – श्रीनारायणगुरुः .2

अद्वैतसिद्धान्तप्रचारणाय समाजोन्नत्यै च तैः कृताः प्रयत्नाः सुतरां स्मरणीयाः। एवम् एते महान्तः बहुविधसमाजोद्धारकर्मभिः सार्थकतां सम्पाद्य 1928 तमे वर्षे सेप्टम्बर्मासस्य 20 दिनाङ्के परंब्रह्म अध्यगच्छन्।

**ब्रह्मानन्दशिवयोगिनः–**

1852 तमे वर्षे दक्षिणमलबार्देशे कोल्लंकोट्ट्ग्रामे ब्रह्मानन्दशिवयोगिनः जन्म अभूत्। एतेषां बाल्यनाम गोविन्दमेनोन् इत्यासीत्। भारते तस्मिन्काले ब्रह्मसमाजस्य समाजपरिष्कारप्रवर्तनानि प्रचलितानि आसन्। केरले अपि तस्य प्रभावः सञ्जातः। ब्रह्मसमाजप्रवर्तकानां कृते कीर्तनानां रचना अनेन बहुवारं कृता अवलोक्यते। तेष्वन्यतमं वर्तते ब्रह्मसङ्कीर्तनम्। एतस्य कीर्तनस्य रचनायाः परं गोविन्दमेनोन् इति अभिधानभूतोऽयं ब्रह्मानन्दस्वामीति अपराभिधानेन प्रसिद्धिम् अविन्दत।

विविधेषु दुराचारेषु अन्धविश्वासेषु निमग्नाः जनाः उद्धर्तव्याः इति तेषां मनसि चिन्तनम् अभूत्। एतादृशानामनाचाराणामाचरणेन समाजे अधःकृतानां दुरितानि वर्धितानि आसन्। एवम्भूतानि दुःखानि निवार्य आनन्दं स्थापयितुम् एतैः आनन्दमतस्य उद्घोषणं कृतम्। आनन्दमतप्रचारणाय तैः 1905 तमे वर्षे **आनन्दमहासभा** इति संस्था आरब्धा[21]। एतेन च, सर्वेषां मनसि विद्यमानां कुटिलतां दूरीकृत्य अनुकूलोर्जःसम्पादनेन परमलक्ष्यभूतमानन्दमवाप्तुं शक्यते। आनन्दावाप्त्यर्थं राजयोगः एतैः निर्दिष्टः। आत्मचैतन्येन मनसः संयोगात् अपरिमितानन्दः उत्पद्यते। एतदर्थं ब्रह्मानन्दशिवयोगिनः स्वशिष्यान् राजयोगमपाठयन्।

समाजे विद्यमानस्य जातिसम्प्रदायस्य दुरितमनुभूयमानानाम् उद्धारणाय विमोचनाय च एतैः इदम् आनन्दमतम् आविष्कृतम्। तदिदं बाह्यवीक्षणे नूतनमिव भासते चेदपि आन्तरिकदृष्ट्या अद्वैतसिद्धान्त एवेत्यवगम्यते। अद्वैतमूल्यानां सिद्धान्तानां च प्रायोगिकरूपेण आविष्करणाय अयं बहुप्रयत्नम् अकरोत्, येन च सर्वे वर्णवर्गजातिभेदं विना मित्रतया अस्मिन्लोके व्यवहर्तुं शक्नुवन्। तदर्थम् आनन्दमतानुपालनं कर्तव्यमिति तैः उद्घोषितम्। तत्त्वचिन्तायाः मतानां च सम्मेलनेनैव आधुनिकेऽस्मिन्समाजे भिन्नतां त्यक्त्वा एकत्वं सम्पादयितुं शक्यते। एवं

---

[21]वाग्भटानन्दगुरुवुंसामूहिकनवोत्थानवुम् – डा. एम्.एस्नायर्(Page No.391)

समाजमतनवीकरणप्रक्रियायां निमग्नाः एते सर्वेषामपि अनाचाराणाम् अन्धविश्वासानां च निषेधम् अकुर्वन्। विग्रहपूजा, यागः, तीर्थाटनादयश्च अर्थरहिताः प्रवृत्तयः एव इत्यासीत्तेषामभिप्रायः। विग्रहाराधनाखण्डननामके ग्रन्थे एतैः एतादृशाः अभिप्रायाः समुल्लिखिताः वर्तन्ते[22]। तदानीन्तनसमाजे स्त्रीणामवस्था अपि अतिकठिना आसीत्; तत्र परिहाररूपेण एते स्त्रीपुरुषयोः समत्वं समाजे सम्पादनीयम् इति उद्घोषितवन्तः। स्त्रीणां कृते विद्या प्रदातव्या, तेन च समाजोन्नतिरवश्यं सम्पादयितुं शक्यते इति तेषामभिप्रायः। ग्रामेषु विद्यमानानां जनानामुद्बोधनाय एतैः ग्राम्यभाषायां गीतानि रचितानि, तेषां पठनेन आलापनेन च उन्नताः अद्वैताशयाः जनानां हृदयं प्राप्य तेषामुन्नत्यर्थं सहायभूताः सञ्जाताः।

तेषां मतानुसारेण समाजः महान्कुटुम्बः भवति। मानवानां समानरूपत्वात्भेदभावनाः निरर्थकाः एव। जातिवर्णव्यवस्थाः सामूहिकासमत्वञ्च तस्मादेव निवारणीयाः। वर्णव्यवस्थानुसारेण चत्वारो वर्णाः ये प्रचलिताः आसन् तेषां नाम्ना एव अवगन्तुं शक्यते, यदत्रविद्यमानाः भेदभावनाः निषेधनीयाः इति। ये ब्रह्मज्ञानिनः ते ब्राह्मणाः, दुःखात्दुरितात्भयाच्च ये मानवानां त्राणनं कुर्वन्ति ते क्षत्रियाः, वाणिज्यादिरूपव्यवहाराय ये आपणान्प्रविशन्ति ते वैश्याः, अज्ञानेन ये दुःखिताः भवन्ति ते शूद्राश्च। एकस्मिन्नेव कुटुम्बे एतादृशाः भवितुम् अर्हन्ति, यस्मात्स्वव्यापारानुगुणा इयं व्यवस्था। किन्त्वत्र समाजे कुलजन्माद्यनुसारेण ब्राह्मणादिभेदाः कल्पिताः। तदङ्गीकर्तुम् एते सन्नद्धाः नासन्। तदर्थं च एते आनन्दमतसंस्थापनमकुर्वन्। चातुर्वर्ण्यविषये इतराणि सर्वाणि व्याख्यानानि असमीचीनानि इत्येतेषां मतमासीत्। स्वमतस्थापनं समाजस्य मानवानां च प्रोन्नत्यै कृतमेतैः। मनश्शमः सम्पादनीयः इति शिष्यान् उद्बोधितवन्तश्चेदपि लौकिकसुखानां सम्पूर्णवर्जनाय प्रेरणां न दत्तवन्तः।

स्वेन संस्थापितस्य आनन्दमतस्य प्रचारणाय राजयोगाशयप्रचारणाय च बहवः ग्रन्थाः लिखिताः। आनन्दकल्पद्रुमनामके ग्रन्थे बहवो देवताः लोके पूजिताश्चेदपि तासां देवतानां स्वरूपम् अद्वैतानन्द एव इति स्थापितम्। राजयोगेन च आनन्दं प्राप्तुं शक्यत इति तेषामभिप्रायः। 'आनन्दमतपरस्यम्', 'आनन्दकुम्मि', 'विग्रहाराधनाखण्डनम्', 'आनन्दसोपानम्',

[22]विग्रहाराधनाखण्डनम् – ब्रह्मानन्दशिवयोगी(Page No.391)

'राजयोगपरस्यम्', 'आनन्दसूत्रम्', 'आनन्दविमानम्', 'मोक्षप्रदीपम्', 'आनन्दादर्शम्' इत्येतेषु ग्रन्थेष्वपि एते अद्वैतानन्दं बोधयित्वा जातिमतवर्णवर्गादिभेदाः समाजे मानवेष्वसमीचीनमेवेति अस्थापयन्। एवं कायेन,वाचा, मनसा च समाजोन्नत्यर्थम् अत्यन्तं प्रयत्नं विधाय एते महानुभावाः 1929तमे वर्षे ब्रह्मपदे विलीनाः।

एवं बहुभिः आचार्यैः केरलस्य नवोत्थानाय प्रयत्नः बहुधा कृतः। अत्र विषयव्याप्तेराधिक्यात्सीमाकरणेन **कुण्ठस्वामिचट्टम्पिस्वामिश्रीनारायणगुरुब्रह्मानन्दशिवयोगिनां** योगदानं सामान्यतया निरूपितम्। अत्रानुक्तानामपि योगदानम् अतिश्रेष्ठमेवेति स्मर्तव्यम्। किन्तु इदं सत्यं यत्कदापि इयं नवोत्थानप्रक्रिया न समाप्तिमेष्यति इति! तस्मिन्तस्मिन्काले विद्यमानान्दोषान्निवारयितुं, जनान्समुद्धर्तुं च भगवच्चैतन्यशक्तियुक्ताः प्रवर्तनं कुर्वन्त्येव। एतेषां वैकुण्ठस्वामिप्रभृतीनां प्रवर्तनैरेव केरलस्य प्रोन्नतिरारब्धा इत्यत्र नास्ति संशयः। अस्मिन्काले भविष्यत्काले च वर्तमानानां वर्तिष्यमाणानां च समाजोद्धारकाणां प्रेरकशक्तिरूपेणापि एतेषां योगदानम् अतिमहत्त्वमर्हति।

# ब्रह्मसूत्रशांकरभाष्यव्याख्यासु प्रकटार्थविवरणस्य प्राधान्यम्

**डा. आर्. प्रतिभा, अद्वैतविभागाध्यक्षा**

बादरायणाचार्यविरचितब्रह्मसूत्राणां अद्वैतसिद्धान्तप्रतिपादकभाष्यं शंकरभगवत्पादेन विरचितम्। शारीरिकमीमांसाभाष्यमिदं श्रुतियुक्त्यधिष्ठितं वर्तते। शंकरभाष्यस्य बहूनि व्याख्यानानि सन्ति। ब्रह्मसूत्रभाष्यस्य व्याख्यानमाश्रित्य भिन्नभिन्नप्रस्थानानि सन्ति।

तेषु प्रस्थानद्वयं अत्यन्त प्रधानं वर्तते। तौ प्रस्थनौ भामतिप्रस्थानं विवरणप्रस्थानं च। पद्मपादाचार्य विरचिता पञ्चपादिका, पञ्चपादिकाया प्रकाशात्ममुनिविरचितव्याख्या-माश्रित्य विवरणप्रस्थानं प्रवर्तते ।

पञ्चपादिकाविवरणं कठिनं वर्तते। किन्तु विवरणप्रस्थानमाश्रित्य रचितं चेदपि प्रकटार्थविवरणं सरलं वर्तते। ब्रम्हसूत्रशांकरभाष्यस्य अनुभूतिस्वरूपाचार्यविरचितं व्याख्यानं भवति प्रकटार्थविवरणम् ।

अनुभूतिस्वरूपाचार्यः दक्षिणभारते लब्धजन्मा तेदपि उत्तरभारते द्वारकापीठे जीवनं यापितवान् । उत्तरभारते अनेन आचार्येण न्यायशास्त्रं वेदान्तशास्त्रं चाधीतम्। अनुभूतिस्वरूपाचार्यस्य दीक्षागुरोर्वा विद्यागुरुणां वा नामानि नोपलभ्यन्ते। श्रीहर्षविरचित खण्डनखण्डखाद्यस्य शिष्यहितैषिणी टीका अनेनाचार्येण विरचिता । ग्रन्थस्यास्य अध्ययनेन अवगम्यते अयमाचार्यः श्रीहर्षस्य शिष्यः आसीत् इति । न्यायशास्त्रे वेदान्तशास्त्रे च अतुल्यपण्डितानां एतेषां अनेके प्रसिद्धाः शिष्या आसन् । तेषु केचन आनन्दगिरिः प्रज्ञानानन्दः नरेन्द्रगिरिः इत्यादयः । अनेन विरचिताः प्रसिद्धाः ग्रन्थाः

1. इष्टसिद्धिव्याख्या इष्टसिद्धिविवरणम्
2. गौडपादभाष्यटिप्पणिः
3. न्यायदीपावल्याः चन्द्रिकाव्याख्या
4. प्रमाण रत्नमालायाः निबन्धनाख्या व्याख्या ।
5. शिष्यहितैषिणी
6. प्रकटार्थविवरण्म्
7. सारस्वतप्राक्रिया (वेयाकरणग्रन्थः) च

अनुभूतिस्वरूपाचार्यस्य जीवनकालः ईशवीयद्वादशशतक एव । सिद्धान्तलेशसङ्ग्रहे अप्पय्यदीक्षितेन प्रकटार्थविवरणकारमतानि तत्र तत्र उद्धृतानि । अत एव ग्रन्थस्यास्य महत्वमवगम्यते ।

**सत्यं ज्ञानमनन्तं यत्कूटस्थं सुखविग्रहं ।**

**नित्यमुक्तं परं ब्रह्म भवामि तदहं सदा ।। इति**

परमात्मस्वरूपप्रतिपादनपरमङ्गलश्लोकेनैव प्रकटार्थविवरणमारभ्यते।

**ज्ञात्वापि यस्य बहुकालमचिन्तनेन । व्याख्यातुमक्षमतया परितापि चेतः ।।**

**तस्योपतापहरणाय मयेह भाष्ये । प्रारभ्यते विवरणं प्रकटार्थमेतत् ।। इति ।**

प्रकटार्थविवरणं भाष्यव्याख्यानं करोमीति ग्रंथकारेण उक्तम् ।

अमृतानन्दप्रकाशिकाकारेण – व्यर्थमिदमनर्थानृतत्ववर्णनं शास्त्रप्रामाण्यात् ज्ञानेनसत्यबन्धध्वंससंभवात्, इह लोके ज्ञानात् सत्यस्य ध्वंसः न दृष्टः इति शांकरभाष्यं नारम्भणीयमिति उक्तम्। तस्य खण्डनं प्रकटार्थकारेण एवं कृतं – सार्थकमिदं अनर्थवैतथ्यवर्णनम्, तदन्तरेण शास्त्रादपि तदसिद्धेः। शास्त्रं किल लोकावलोकितां पदशक्तिं पदार्थयोग्यतांचोररीकृत्य वरीवर्ति। इतरथा – अन्धो मणिमविन्दत् इत्यादेरपि यथाश्रुतेभात्वपातात् अपूर्वकल्पनावकाशप्रसङ्गच्च इति। अद्वैतपरकभाष्यं न निरर्थकम् अपि तु सार्थकमेवेति शास्त्रलक्षणमपि व्याख्याय प्रकटार्यकारेण समर्थ्यते। शाङ्करभाष्यवत् प्रकटार्थविवरणमपि सरलं वर्तते । सिद्धान्तसमर्थनार्थं युक्तियुक्तन्युदाहरणानि उदाहृतानि। अतिगहनं अध्यासस्वरूपं प्रकटार्थकरेण बालानां अवबोधार्थं स्पष्टतया व्याख्यातम्। न परमात्माध्यस्यति विद्यास्वभावत्वात्। न जीवः अनतिरेकात्, अतिरेकेऽपि कल्पितत्वात् इति तत्रोच्यते। अज्ञोऽध्यस्यति, तस्य भ्रान्तत्वप्रसिद्धेः, अज्ञश्चाज्ञानप्रतिबिम्बिता चिदुच्यते इति कस्य अध्यास इति स्पष्टीकृतम्। एका तावदनाद्यनिर्वाच्या भूतप्रकृतिश्चिन्मात्रसम्बन्धिनी माया। तस्यां चित्प्रतिबिम्ब ईश्वरः, तत्परिणामैरेव सर्वज्ञत्वादिमान्, बिम्बकल्पं तु निर्विकल्पकं ब्रह्म कैवल्यावलम्बकम्। तस्या एव परिच्छिन्नानिर्वाच्यानन्तप्रदेशेष्व-ज्ञानाभिधानेषु आवरणाविक्षेपशक्तिमत्सु प्रतिबिम्बितं तदेव चैतन्यमनन्तजीव-व्यवहारास्पदम् इति माया, ब्रह्म, ईश्वरः, जीवः इत्यादितत्वानि सरलतया

व्याख्यातानि। तथा एकस्यैव चिद्धातोरज्ञानानुप्रवेशेन प्रमातृत्वाध्यासशालित्वं संसारः, तद्ध्वंसश्च मोक्ष इत्यद्वैते न कोप्यपवर्गः। इति बन्धमोक्षव्यवस्था प्रतिपादिता ।

इतरेषां ख्यातीनां अन्यथाख्यात्यादीनां निरासं कृत्वा – स्मृतिरूपः परत्र पूर्वदृष्टावभासोऽध्यास इति अध्यासलक्षणप्रतिपादनावसरे अनिर्वचनयख्यातिः सम्यक् समर्थिता। पञ्चख्यातीनं निरूपणं सरलैः अष्टाभिः कारिकाभिः कृतम्। अन्ते अनिर्वचनीयख्यातिः एवं समर्थिता।

**शक्तिसत्त्वैव भात्यत्र यथेन्दाववभासते ।**
**अथवा त्रिविधं सत्वं वैतथ्यं तथ्यभेदतः ।।**
**देशान्तरादिसत्वं च प्रतिभासेत तत्तथा ।**
**परिशेषादिना रूप्यमनिर्वाच्यमितिस्थितम् ।। इति ।**

जीवेश्वरस्वरूपविषये प्रसिद्धाः अवच्छेदवादाभासवादप्रतिबिम्बवादाः। अध्यासभाष्य-व्याख्याने प्रकटार्थकारेण सरलतया प्रतिपादिताः ।

तत्रैवं सति यत्र यदध्यासः तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न संबध्यते। इति भाष्यवाक्यस्य व्याख्या एवं कृता – एवंभूताविद्यायाञ्च सत्यां यत्र जीवे यस्य मौढ्यादेरध्यासः तत्कृतेन मौढ्यादिदोषेण, पाण्डित्यादिगुणेन च अणुमात्रेणापि स जीवो न संस्पृश्यते। अतोऽसङ्गत्वव्याधातो नात्मनः इति ।

तया शास्त्रस्यास्य व्याख्येयत्वं अध्यासभाष्यव्याख्यायां समर्थयित्वा अनुबन्धचतुष्टयमपि तत्रैव प्रतिपादितम् । अधिकारितत्वं पुनः अथातो ब्रह्मजिज्ञासा इति सूत्रव्याख्याने अथ शब्दव्याख्यानावसरे विस्तरेण प्रतिपादितम् । ब्रह्मात्मैकत्वं विषयः अविद्यानिवृत्तिः एवं वेदान्तानां प्रयोजनम् । अधिकारिविषययोः प्राप्यप्रापक-भावः संबन्धः ।

अथातो ब्रह्मजिज्ञासा इति सूत्रव्याख्याने प्रकटार्थकारेण श्रुतिस्मृतिवाक्यान्यपि उद्धृत्य अथ शब्दस्य साधनचतुष्टयसम्पत्यानन्तर्यमिति अर्थः सुस्पष्टतया समर्थितः । ज्ञानकर्मसमुच्चयवादस्य स्पष्टतया निरासः अत्र कृतः। मोक्षसाधनं ब्रह्मात्मैकत्व-ज्ञानमेवेति तत्र समर्थयित्वा अन्येषां सर्वेषां अनित्यफलकत्वं एवमुक्तं-

**मृत्युना ह्याहते लोके जरया परिवारिते ।**
**व्याधिभिर्ग्रस्यमाने च किं स्वस्य इव भाषसे ।।**

**सर्वोपायैर्यदा नास्ति मर्तव्यस्य अतिक्रिया ।**
**सोहं कथं प्रतीक्षेय जानेनेवावृतश्चितम् ।।**
**रात्र्यां रात्र्यां व्यतीतायामायुरल्पतरं यदा ।**
**स्वल्पोदके मत्स्य इव धृतिं विन्देत कस्तदा ।। इति ।**

एवं अनेन व्याकारेण भाष्यस्य व्याख्यानं अत्यन्तं ललितरूपेण कृतम् । एवं शाङ्करभाष्यस्य व्याख्यानान्तराणां अपेक्षया प्रकटार्थविवरणस्य सविशेषतालालित्यं सुस्पष्टता च । मध्ये मध्ये स्मृतिवाक्यानि उद्धृतानि। स्वकीय कारिका अपि यथोचितं योजिताः। भास्करभाष्यं अद्वैतसिद्धान्तविरुद्धमित्यनेन यथासन्दर्भं भास्करभाष्यस्य खण्डनं प्रकटार्थविवरणे विद्यते । व्याख्यानमिदं पूर्णं तथा विवरणप्रस्थानानुसारि भवति।

ब्रह्मजिज्ञासा पदव्याख्याने जिज्ञासा तावद् ज्ञानमपेक्षते। ज्ञानं च ज्ञेयापेक्षम् । ज्ञेयान्तरं न निर्दिष्टम् । अतः ब्रह्मस्वरूपविचारः एवैकः प्रतिज्ञातः स्यात् न प्रमाणयुक्ति साधनाफलानाम् । जिज्ञासायां ब्रह्मणोन्यस्य स्वस्वाम्यादि सम्बन्धविषेशस्य असम्भवात् विषयत्वैनैव सम्बधः भविष्यति इति न शेषे इति शेषषष्ठीनिरासः कृतः । एवं व्याकरणसम्बन्धीकार्याणां भाष्ये सूचितानां सुस्पष्टं व्याख्यानमुपलभ्यते ।

ब्रह्मशब्दस्य देशतः कालतः वस्तुतः च अपरिच्छिन्नत्वं उच्यते । कालतो।नवच्छेदात् नित्यं वस्तुतः अनवच्छेदात् शुद्धं, महत्वादेव बुद्धं मुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितं ब्रह्म । एवं सर्वेषां सूत्राणां व्याख्यानं प्रकटार्थकारेण कृतम्। भाष्ये सूचितानाम् असूचितानाम् च कार्याणां सन्दर्भानुसारं स्पष्टं व्याख्यानं ग्रन्थेस्मिन् उपलभ्यते। प्रथमाध्यस्यय अन्ते अद्वैततत्वं प्रकटार्थविवरणकारेण एकस्यां कारिकायां एवं सङ्गृहीतम् । तद्यथा-

**मायया यज्जगद्वीजं जीवाविद्यावशेन च ।**
**तज्ज्ञानं सत्यमद्वैतं सिद्धं वेदसमन्वयात् ।। इति ।**

द्वितीयाध्यायान्ते व्याख्याने अद्वैतसिद्धान्तस्यश्रुतिप्रामाण्यं एवं समर्थितं-

**श्रुति (स्मृति) न्यायविरोधौ न मतान्तरेविरुद्धता ।**
**श्रुतिविप्रतिषेधोऽव वेदान्तार्थसमन्वय ।। इति ।**

अत्यन्तक्लिष्टयोः अविरोधसाधनाध्याययोः सुलभावगाह्यरूपेण व्याख्यानं प्रकटार्थ-विवरणे उपलभ्यते। एतादृशं लालित्यं शाङ्करभाष्यस्य व्याख्यानान्तरेषु नोपलभ्यते । अतः भाष्यस्य स्पष्टतया अवबोधार्थं व्याख्यानमिदं नितान्तमुपकरोति।

तृतीयाध्यायख्यानान्ते ब्रह्मज्ञानं सर्वेषां मोक्षसाधनमिति उक्तम्-

**वैराग्यं तत्वमर्थौ द्वौ ततः शब्दोपसङ्ग्रहम् ।**
**पुरुषार्थं स्वतन्त्राच्च प्रोचुर्नीचोच्चसाधनम् ।। इति ।**

चतुर्थोध्यायभाष्यव्याख्यानान्ते अहं ब्रह्मास्मि इति सुस्पष्टम् उद्घोषितम् । तद्यथा-

**शुद्धं ब्रह्मास्म्यहं नित्यमक्षरं परमं पदम् ।**
**तिष्ठामि क्व क्व गच्छामि जगदापूरितं मया ।। इति ।**

सर्वेषु भुतेषु अन्तर्यामिस्वरूपेण वर्तमानस्य परब्रह्मणः ज्ञानादेव मुक्तिरित्युक्तम् ।

**सर्वेषु भुतेषु चतुर्विधेषु स्थितो हरिस्तत्र हरो च तानि ।**
**सोऽहं हरिः सर्वमिदं स एवेत्युत्पद्यते यस्य मतिः स मुक्तः ।। इति।**

प्रत्येकपादानां अन्ते व्याख्याकारेण स्वगुरोः नाम वा स्वनाम वा न परामृष्टम्। केवलं एवमेवोक्तं – इति श्रीमच्छारीरमीमांसाभाष्यविवरणे प्रकटार्थे प्रथमाध्यायस्य प्रथमः पादः समाप्तः इति ।

श्रवणादि विचारस्थले अनेन ग्रन्थकारेण अपूर्वविधिः उक्तः । एवं तत्र तत्र स्वमतानि (भाष्यकारसम्मतानि) उल्लिखितानि वर्तन्ते। तया एकजीववादः ननाजीववाद-दृष्टिसृष्टिवादानां च व्याख्यानं सुस्पष्टं ग्रन्थेस्मिन् उपलभ्यते। सर्वधाऽपि शाङ्करभाष्यस्य व्याख्यासु सविशेषत्वं भजते प्रकटार्थविवरणम् ।

# दक्षिणामूर्तिस्तोत्रे तत्त्वमसिवाक्यार्थः

**डा. राधाकान्तपणडा, अद्वैतवेदान्तविभागः**

करुणासागरेण आचार्यपादेन यथाकथञ्चित् सर्वान् जनान् अद्वैततत्त्वप्रबोधेन समुद्धर्तुं प्रवृत्तेन नैकविधानि स्तोत्राणि विरचितानि, यानि सुललितपदगुम्फितानि, विविधदेवताविषयकाणि, आपामरविदुषामनायासेन अद्वैततत्त्वबोधकानि इति। तेषु स्तोत्रेषु ओतप्रोततया संस्फुरति औपनिषदम् अद्वितीयात्मतत्त्वं यत् प्रस्थानत्रये सविस्तारं सयुक्तिकं प्रपञ्चितम्।

स्तूयते अनेन इति स्तोत्रम्। येन स्तूयते यत् स्तोत्रं, गुणसङ्कीर्तनात्मकम्। स्तवनात् ज्ञायते इति स्तोत्रम् इत्यपि वक्तुं शक्यते। स्तवः, स्तुतिः, नुतिः इत्यनर्थान्तरम्। एवं च श्रद्धानदीविमलचित्तजलाभिषेकैः वाक्कुसुमैश्च क्रियमाणं यत् देवताराधनं तदेव स्तोत्रमिति निश्चप्रचम्। तच्च स्तोत्रं षड्विधम्। तदुक्तम्-

**नमस्कारस्तथाशीश्च सिद्धान्तोक्तिः पराक्रमः।**
**विभूतिः प्रार्थना चेति षड्विधं स्तोत्रलक्षणम्॥** इति॥

1. नमस्काररूपाणि- उमामहेश्वरस्तोत्रम्, मीनाक्षीपञ्चरत्नम्, नर्मदाष्टकम्, अर्धनारीश्वरस्तोत्रम् इत्यादीनि स्तोत्राणि।
2. आशीर्वादरूपाणि- जगन्नाथाष्टकम्, देवीचतुर्षष्ठ्युपचारपूजास्तोत्रम् इत्यादीनि स्तोत्राणि।
3. सिद्धान्तरूपाणि- दक्षिणामूर्तिस्तोत्रम्, हरिस्तुतिः, काशीपञ्चकम् इत्यादीनि स्तोत्राणि।
4. पराक्रमप्रकाशकानि- शिवानन्दलहरी इत्यादीनि स्तोत्राणि।
5. विभूतिपराणि- वेदसारशिवस्तोत्रम्, दक्षिणामूर्तिवर्णमालास्तोत्रम्, सौन्दर्यलहरी इत्यादीनि स्तोत्राणि।
6. प्रार्थनारूपाणि- मीनाक्षीस्तोत्रम्, अन्नपूर्णाष्टकम्, कृष्णाष्टकम् इत्यादीनि स्तोत्राणि।

पुनः प्रकारान्तरेण स्तोत्रसाहित्यं द्विविधं वर्तते। कानिचनस्तोत्राणि केवलं भक्तिप्रधानानि आत्मसमर्पणरूपेण निर्णीतानि। कानिचन भक्त्यात्मसमर्पणं भगवदाराधनासहितं वेदान्ततत्त्वमपि बोधयन्ति। तादृशस्तोत्राणि बहूनि उपलभ्यन्ते। तेषु अन्यतममिदं दक्षिणामूर्तिस्तोत्रम्।

दक्षिणा दिगभिमुखा मूर्तिः यस्य सः दक्षिणामूर्तिः, शिवः इत्यर्थः। पुनश्च दक्षिणो जगत्सृष्टिस्थितिविषये समर्थश्चासौ अमूर्तिश्च अशरीरश्च इति दक्षिणामूर्तिः। अस्य

स्तोत्रस्य प्रत्येकं श्लोकः अद्वैततत्त्वसंग्रथितः। तेषु तत्त्वमसिवाक्यार्थः विचार्यते। अद्वैतवेदान्ते तावत् जीवब्रह्मणोः ऐक्यप्रतिपादकं वाक्यं महावाक्यम्। तानि चत्वारि महावाक्यानि यथा- ऋग्वेदान्तर्गतायाः ऐतरेयोपनिषदः **प्रज्ञानं ब्रह्म**, यजुर्वेदान्तर्गतायाः बृहदारण्यकोपनिषदः **अहं ब्रह्मास्मि**, सामवेदान्तर्गतायाः छान्दोग्योपनिषदः **तत्त्वमसि**, अथर्ववेदान्तर्गतायाः मुण्डकोपनिषदः **अयमात्मा ब्रह्म** इति। एतानि चत्वार्यपि महावाक्यानि विभक्तिगतसामानाधिकरण्येन तथा लक्षणया च जीवब्रह्मणोः ऐक्यं प्रतिपादयन्ति। तेषु तत्त्वमसिमहावाक्यार्थः अत्र प्रतिपादितोऽस्ति प्रथमश्लोके। तत्र हि-

**विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं**
**पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया।**
**यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं**
**तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥** इति॥

श्लोकेऽस्मिन् प्रत्यगात्मनः सकलजगदधिष्ठानत्वं प्रतिपादितमस्ति। अर्थात् सकलप्रपञ्चोऽयं प्रतीचि अध्यस्त एव। यो निजान्तर्गतं भूतभौतिकरूपं विश्वं स्वात्मनि अनाद्यनिर्वाच्यया मायया स्वस्मात् बहिः(पृथक्) उद्भूतमिव पश्यन्नाचार्योक्तमहावाक्यसाक्षात्कारानन्तरं स्वप्रकाशात्मकमद्वयमात्मानं साक्षात्कुरुते, तस्मै श्रीदक्षिणामूर्तये गुरवे नमः इति। तत्र दृष्टान्तमाह- दर्पणदृश्यमाननगरीतुल्यमिति। यथा स्वच्छे निरन्ध्रेऽसङ्गे आदर्शे नानोपवनयुक्ता नगरी दृश्यते, तथैव स्वच्छे निरन्ध्रेऽसङ्गे आत्मनि उचावचात्मकस्य प्रपञ्चस्य भानम्। अर्थात् आत्मनि प्रपञ्चो वस्तुतोऽसन्नपि सन्निव भाति। दर्पणदृश्यमाननगरीतुल्यं विश्वं वर्तते। बहिरविद्यमानस्य बहिरवभासे दृष्टान्तं वदन् प्रबोधनिवर्त्यत्वमपि द्रढयति। यथा कश्चित् सुप्तो निजान्तर्गतमेव पूर्वपूर्वसंस्काराहितं वासनामयं विश्वं निद्रया बहिर्विषयत्वेनाविर्भूतमिव पश्यन् जाग्रदवस्थायामागतायां सत्यां स्वात्मनमद्वयं स्वप्नप्रपञ्चरहितमिति जानाति तथैव प्रकृते इति।

श्लोकेऽस्मिन् **विश्वं दर्पणदृश्यमाननगरीतुल्यम् .......**इत्यनेन पूर्वार्धेन त्वं पदवाच्यः जीवः उक्तः, उत्तरार्धे **श्रीदक्षिणामूर्तये** इत्यनेन तत्पदवाच्यः ईश्वरः उक्तः। **स्वात्मानमेव अद्वयम्** इति पदद्वयसामानाधिकरण्येन उभयोः तत्- त्वं पदार्थयोः ऐक्यं

साध्यते। पुनः अत्र एवकारेण जीवैव ब्रह्मेति निश्चीयते। अयमेवाभिप्रायः तत्त्वसुधा-व्याख्याने संसूचितः। तत्र हि तत्त्वसुधायाम्-

**अत्र च पूर्वार्धेन त्वं पदार्थः उक्तः, उत्तरार्धे श्रीगुरुमूर्तये, श्रीदक्षिणामूर्तये इति पदद्वयेन मूर्तिद्वययुक्तः तत्पदार्थः उक्तः। स्वात्मानमद्वयमिति पदद्वयसामानाधिकरण्येन यत्तच्छब्दाभ्यां च प्रत्यग्ब्रह्मैक्यलक्षणो वाक्यार्थः उक्तः।** इति।

एवं दक्षिणामूर्तिस्तोत्रस्य प्रथमश्लोके एव तत्त्वमसिवाक्यार्थः कृतो वर्तते। स एव पुनः श्लोकत्रयेण प्रपञ्चितोऽस्ति। प्रथमश्लोके तावत् जीवः निद्रादोषेण सम्पूर्णं विश्वं निजान्तः स्वप्ने पश्यति इति त्वंपदवाच्यार्थः सूचितः। द्वितीयश्लोके तत्पदार्थः संसूच्यते। तत्र हि-

**बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुनः**
**मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम्।**
**मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया**
**तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ 2॥**

श्लोकेऽस्मिन् सगुणब्रह्मणः एव सकलजगदुत्पत्त्यादिकारणत्वं प्रतिपादितमस्ति। अनुभूयमानम् अनेककर्तृभोक्तृसंयुक्तमिदं जगदुत्पत्तेः प्राक् भोक्तृभोग्यादित्रिपुटिरहितम् आसीत्। अर्थात् कारणात्ममात्रमासीद् इत्यर्थः। तत्र दृष्टान्तः यथा- बीजस्य मध्ये अङ्कुरः उत्पत्तेः प्राक् बीजमात्रमासीत्। तथैव आत्मा सृष्टेः प्राक् कारणावस्थायामासीत्। पुनश्च सर्गसमये आत्मा स्वमायया देशकालादीन् कल्पयित्वा विचित्रमिदं जगत्सृजति। अर्थात् सगुणात्मा जगतः कर्ता इति शेषः। ईश्वरस्य जगत्कर्तृत्वे दृष्टान्तः दत्तः यथा मायावी स्वमायया जनान् सृष्ट्वा चतुर्दन्तगजमारूढमष्टभुजमात्मानं सृजति। ततः तैः साकं युद्धं करोति। एतत्सर्वं मायाविनः सङ्कल्पमात्रेण सम्भवति। द्वितीयदृष्टान्तोऽधिकस्पष्टार्थमाह- महायोगीव इति। यथा विश्वामित्रादिमहायोगिनः विचित्रमिदं जगत् आरचितवन्तः इति पुराणादिषु प्रसिद्धम्। एतौ द्वावपि स्वस्वसङ्कल्पमात्रेण जगत् असृजताम्, तथैव सङ्कल्पमात्रेण ईश्वरोऽपि विचित्रं जगत् सृजति, स सर्वज्ञत्वपरोक्षत्वादिधर्मविशिष्टः ईश्वरः एव तत्पदवाच्यार्थः। तृतीयश्लोके उभयोः लक्षणार्थः प्रतिपाद्य ऐक्यं प्रतिपाद्यते। तत्र हि-

**यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते**
**साक्षात् तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान्।**

**यत्साक्षात्करणाद् भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ**
**तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥3॥**

यस्य निष्प्रपञ्चसच्चिदानन्दस्वरूपस्य ब्रह्मणः साक्षात्करणेन अस्माद्भवसागरात् तर्तुं शक्यते, पुनश्च संसारनिधौ आगमनं न भवति, यस्य सत्तया असत्कल्पमनिर्वचनीयमिदं जगत् घटः सन्, पटः सन् इत्यादिरूपेण भासते, तदेव तत्-त्वंपदयोः लक्ष्यार्थभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति।

तथा च दक्षिणामूर्तिस्तोत्रस्य प्रथमे श्लोके त्वंपदार्थं, द्वितीयश्लोके तत्पदार्थं च प्रतिपाद्य तृतीयश्लोके उभयोः लक्ष्यार्थभूतं सच्चिदानन्दस्वरूपं जगद्भासकमेकं ब्रह्म प्रतिपादितम् इत्येषः सर्ववेदान्तानां समन्वयः प्रथमशास्त्रार्थः प्रदर्शितः॥ इति शम्॥

**सन्दर्भग्रन्थाः-**

1. दक्षिणामूर्तिस्तोत्रम्- श्रीमच्छङ्कराचार्याः
2. मानसोल्लासः- श्रीसुरेश्वराचार्याः
3. दक्षिणामूर्तिस्तोत्रम् (तत्त्वसुधाव्याख्या)

# संस्कृतवाङ्मये भाषणकौशलम्

डा. इ.वेङ्कटेश्वर्लु, शिक्षाशास्त्रविभागः

भाषा – भाषाइति शब्दः भाष् व्यक्तायां वाचि इत्यस्माद्धातोः गुरोश्च हलः इति सूत्रेण अ प्रत्यये स्त्रियां टापि निष्पद्यते। **भाष्यते व्यक्तवाग्** इति भाषा अथवा **भाषणाद्भाषेत्याहुरिति**। अयं भाषाशब्दः आङ्ग्लभाषायां language इति व्यवह्रियते। यः लाटिन् भाषायाः lingua इति पदात् निष्पन्नः। भाषा भावविनिमयाय समुचितं साधनम्। ये मनसि विचाराः जायन्ते ते ध्वन्यात्मना परिणताः भाषाशब्दवाच्या भवन्ति- प्लेटो। ध्वनिभिः मानवीयविचाराणां बौद्धिकाभिव्यक्तिरेव भाषा इत्यपि वक्तुं शक्यते–स्वीट्। Lingua may be defined as the expression of thought by means of speech sound – Henry sweet. इति पाश्चात्त्यानां मतमासीत्। भारतीयप्राचीनभाषाप्रणाल्यां तु भाषायाः भाषाकौशलानाञ्च महत्त्वस्थानं भजते। आदौ भाषाः चत्वारः प्रकाराः सन्ति। यथा – मनुष्य-जन्तु-सरीसृपाः-पक्षिणां च। तदेतत् तुरीयं वाचो अनिरुक्तं यत् मनुष्याः वदन्ति। अथैतद् तुरीयं वाचो अनिरुक्तं यत् पशवो वदन्ति। अथैतद् तुरीयं वाचो अनिरुक्तं यत् वचांसि वदन्ति। अथैतत् तुरीयं वाचो अनिरुक्तं यदिदं क्षुद्रसरीसृपं वदन्ति। (शत.ब्रा.1.3.16)

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतस्सर्वाः प्रवृत्तयः।।[1]
सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे।।[2]

वक्तुं भाषा एकम् अलौकिकसाधनं भवति। भाषाया मानवः मनुष्यत्वं प्राप्नोति। ज्ञानवर्धनं मोक्षप्राप्तिरपि भाषया एव शक्यते[3]। देवत्वम्, ऋषित्वम् एवं वैदुष्यं च प्राप्नोति।[4] एकस्य श्रेष्ठस्य समाजस्य वा राष्ट्रस्य वा निर्माणं भवति, अपि च सङ्घटनं कर्तुं शक्यते अनयैव भाषया।[5] मानसिकविकासस्य कारणभूतायाः वाण्याः महिमायाः

[1]वा.पा. ब्रह्म.का. 1
[2]म.स्मृ. 1.21
[3]शब्दब्रह्मणि......मै.उ.6.22, म.भा. शान्ति.
[4]यं कामये तं .... ऋ.वे.10.125.5
[5]अहं राष्ट्री.....ऋ.वे.10.125.3

वर्णनं मानवेन किं क्रियते। मानवानां सम्पूर्णसंसारः भाषया वर्धितः भवति।[6] एतादृश्या वाण्या विना समस्तं जगदन्धकारभूयिष्ठं जायते।[7]

शब्दतत्त्वविज्ञैः शब्दाः नित्याः आतिष्ठन्ते। वार्तिककारेणोक्तं – सिद्धे शब्दार्थसम्बन्धे इति।[8] सिद्धशब्द इह नित्यपर्यायवाची। अतः शब्दाः नित्याः अर्थाः नित्याः तेषां सम्बन्धोपि नित्यः इत्येतेषां मतम्। आधुनिकाः भाषाशास्त्रिणस्तु भाषा मानवस्य क्रमिकविकासस्य परिणाम इत्यभिप्रयन्ति।

**संस्कृतभाषा**

संस्कृतम् इति पदं सम् उपसर्गपूर्वकात् कृञ् धातोः कर्मणि क्तप्रत्यये **सम्परिभ्यां करोतौ भूषणे** इति सूत्रेण अलङ्करणेर्थे सुडागमे सिद्धम्। या भाषा संस्कृता परिमार्जिता परिशुद्धा परिपूर्णा अलङ्कारभूता च भवति, सा संस्कृतभाषोच्यते। संस्कृतभाषायां पाणिनिमते 63 वर्णाः सन्ति। ते च स्वराः 22, व्यञ्जनानि 33, अथोगवाहाः 8 स्वराणां ह्रस्वदीर्घा-प्लुतोदात्तानुदात्तस्वरितसानुनासिकनिरनुनासिकेति नैकभेदाः जायन्ते। अत्र त्रीणिवचनानि, त्रीणि लिङ्गानि, त्रयः पुरुषाः च सन्ति।

संस्कृतस्य सर्वाणि पदानि चतुर्धा विभक्तानि। तथा च चत्वारः पदजाताः नामाख्यातोपसर्गनिपाताश्चेति। नाम- प्रातिपदिकम्, आख्यातम् – क्रियापदम्, उपसर्गः – प्र, परा, अनु इत्यादयः निपाताः – च, वा एव प्रभृतयः अव्ययानि च इति चतुर्धा विभक्ताः। संस्कृतभाषा संश्लिष्टा वर्तते। अस्यां प्रकृतिप्रत्ययौ सम्मिलितौ भवतः। केवला प्रकृतिः केवलः प्रत्ययो वा न प्रयोक्तुमर्ह इति व्याकरणशास्त्रम्। नित्यं पदं प्रयोक्तव्यं, पदं सुबन्तं तिङन्तञ्च भवति। पठने भाषणे लेखने वा प्रातिपदिकस्य प्रत्ययस्य वैयक्तिकरूपेण प्रयोगादिकं नैव सम्भवति। अनयोः विभज्य व्यवहारः न कदापि कुत्रापि सिध्यति। एतादृशमहत्त्वपूर्णायाः वाङ्मयमनन्तम् अखण्डमद्वितीयञ्च दरीदृश्यते। वाङ्मयस्याधिगमः भाषायाः आधीने अस्ति। अतः भारतीयप्राचीनाधि-गमप्रणाल्यां भाषाकौशलशिक्षणविधयः केचन प्रोक्ताः।

वेदरक्षणार्थम् आगतानि वेदाङ्गानि। तत्र भाषारक्षणदृष्ट्या व्याकरणं, शिक्षा च महदुपकुरुतः।

---

[6]वाचा हीदं सर्वं.....श.ब्रा.8.1.2.9, शब्देष्वेव....वा.पा. 1.109
[7]इदमन्धतमः....का. 1.4, वाग्रूपता...वा.प.1.115
[8]म.भा.1.1.2.वा

तत्र भाषायाः उच्चारणं कथं कर्तव्यम्? दोषाः कुत्र भवन्ति? तत्परिहारोपायाः के? इति सम्यग्विवेच्य भाषाणां भाषाकौशलानां श्रवण-भाषण-पठन-लेखनानां नैके विधयः, प्रविधयः च प्रोक्ताः शिक्षाग्रन्थेषु। पाणिनीयशिक्षायाम् उच्चारणविधिः सदृष्टान्तं प्रत्यपादि।

**भाषाकौशलानि**

भावाभिव्यक्तिसाधनं भाषा इति कथ्यते। मानवानां मनोगतभावानुगतं भावानां प्रकाशनाय क्रियमाणः ध्वन्यात्मकसङ्केत एव भाषा। भाषाविस्तृतिः यदा जाता तदध्येतुं शिक्षणमप्यपेक्षितम्। भाषाशिक्षणं नाम भाषायाः अध्ययने प्रधानभूतानां ज्ञानात्मक-अवबोधनात्मक-कौशलात्मक-अभिरुच्यात्मक-अनुभूत्यात्मकानां लक्ष्याणां प्राप्तिरेव।

भाषायाः श्रवणं भाषणं पठनं लेखनमिति चतुर्णां कौशलानां सम्पादनं कौशलात्मकेषु भवति। अम्बाम्बेति यथा बालः शिक्षमाणः प्रभाषते[9] (वाक्यपदीये) इति शिशोः मातृभाषाधिगमे शब्दानुकरणमेव आद्यं सोपानम्। अर्थमजानन् अन्यैरुक्तं श्रुत्वा तदेव उच्चारयितुं यतते। अनन्तरम् अर्थमवगच्छतिस्म। क्रमेण सम्भाषणम् अनन्तरं पठनं ततः परं लेखनं च करोति। श्रवणं भाषणं पठनं लेखनं च भाषाभ्यासस्य क्रमिकाणि सोपानानि। चतुर्षु कौशलेषु श्रवणं पठनं च ग्रहणकौशले, भाषणं लेखनं च अभिव्यक्तिकौशले अन्तर्भवतः। परञ्च भाषणकौशलं तु चतुर्षु कौशलेषु अन्यतमं भवति। यतः भाष्यतेति भाषा खलु अतः भाषणेन विना सा भाषा इति नैव कथ्यते।

**भाषणकौशलम्**

स्वीयमाशयं प्रकटीकर्तुं मानवाः भाषन्ते। समीचीने परिवेशे प्रवृद्धानां बालानां मातृभाषायां भाषणकौशलशिक्षणं न क्लेशाय। तेषामुच्चारणं स्पष्टं शुद्धं च भवति। भारतीयभाषासु संस्कृतशब्दाः विपुलतया अन्तर्गतास्सन्ति। तस्मात् संस्कृतशब्द-सम्पत्तिः छात्रेषु अधिकतया स्यात्। तस्योपयोगः कथं करणीय इति शिक्षणीयं भवति। भाषाया उच्चारणस्य विशेषताविषये शिक्षाग्रन्थेषु इत्थं निर्दिष्टम् –

**शङ्कितं भीतमुद्घृष्टमव्यक्तमनुनासिकम्।**
**काकस्वरं शिरसिगतं तथा स्थानविवर्जितम्।।**[10]

---

[9]वा.प.
[10]पा.शि. 34

**उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम्।**
**निष्पीडितं ग्रस्तपदाक्षरञ्च वदेन्न दीनं न तु सानुनास्यम्।।**[11]
**व्याघ्री यथा हरेत्पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।**
**भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत्।।**[12]
**मधुरं च न चाव्यक्तं चापि न पीडितम्।**
**सनाथैकस्य देशस्य न वर्णास्सङ्कटं गताः।।**[13]
**यथा सुमत्तनागेन्द्रः पदात्पदं निधापयत्।**
**एवं पदं पदाद्यन्तं दर्शनीयं पृथक् पृथक्।।**[14]

एवं वाल्मीकिरामायणेपि उत्तमवक्तुः भाषणं कथं स्यादिति हनुमान् द्वारा स्पष्टीकरोति–

**वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमरिन्दम।**
**नानृग्वेदविनीतस्य नायजुर्वेदधारिणः। नासामवेदविदुषः शक्यमेवं प्रभाषितुम्।।**
**नूनं व्याकरणं कृत्स्नं अनेन बहुधा श्रुतम्। बहुव्याहरतानेन न किञ्चिदपशब्दितम्।।**
**न मुखे नेत्रयोर्वापि ललाटे च भ्रुवोस्तथा। अन्येष्वपि च गात्रेषु दोषः संविदितः क्वचित्।।**
**अविस्तरमसन्दिग्ध अविलम्बितमद्रुतम्। उरस्थं कण्ठगं वाक्यं वर्तते मध्यमे स्वरे।।**
**संस्कारक्रमसम्पन्नां अद्रुतामविलम्बिताम्। उच्चारयति कल्याणीं वाचं हृदयहारिणीम्।।**
**अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया। कस्य नाराध्यते चित्तम् उद्यतासेरेरपि।।**
**एवं गुणगणैर्युक्ता यस्य स्युः कार्यसाधकाः। तस्य सिध्यन्ति सर्वार्था दूतवाक्यप्रचोदिताः।।**[15]

अत्र हनुमता कृतभाषणकौशलानि इत्थं स्युरिति निर्दिष्टानि। यदि भाषकः उपरि-निर्दिष्टानि सम्भाषणकौशलानि शिक्षन्ते तर्हि अवश्यं तस्य भाषणानि प्रभावयन्तीति प्राचीनशास्त्राणामुद्देश्यमासीत्।

**भाषणकौशलम् –**

अस्माकं प्राचीनाचार्यैः सम्भाषणमहत्त्वविषये बहुधा प्रत्यक्षीकृतम्। सम्भाषणकौशलस्य विषये एवमुक्तम् –

---

[11]पा.शि.35
[12]या.शि.195
[13]या.शि.196
[14]या.शि.197
[15]श्री.रा.किष्कि.3

**पिष्टमिव लक्ष्मीः निहिता अधिवाचि।**

**सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत[16]**

**अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि।।[17]**

**मा वो वचांसि परिचक्ष्याणि वोचम्।[18]**

**संलापो भाषणं मिथः[19]**

**ऋचो अक्षरे परमे व्योमन यस्मिन् देवा अधिविश्वे निषेधुः।**

**यतस्तन्न वेद किमृचा करिष्यति स इत्तद्विदुस्त इमे समासते।।[20]**

सम्भाषणस्य सप्त मर्यादाः वर्तन्त इति। तथा चोक्तम् –

**सप्तमर्यादाः कवयस्ततक्षुः।[21] आ भारती भारतीभिः सजोषा।[22] वाचो विसर्जनम्।[23] वाचं मे तर्पयत।[24]**

सम्भाषणकौशलस्य विशेषतामूचुः –

**पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः। स्वरमात्रविभागज्ञो गच्छेत् आचार्यसंसदम्।।[25]**

**वाचामेव प्रसादेन लोकयात्रा प्रवर्तते।[26]**

भाषाया अभिव्यक्तिविषये पाणिनीयशिक्षायाम् उच्यते–

**आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया।मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।।[27]**

**मारुतस्तूरसि चरन् मन्द्रं जनयते स्वरम्।[28]**

**सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः।**

**वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः।।[29]**

---

[16]ऋ.वे.20.72.2
[17]ऋ.वे.6.52.24
[18]ऋ.वे.6.52.24
[19]अ.को.
[20]ऋ.वे.2.264.38
[21]य.वे.20.5.6
[22]ऋ.वे.3.4.8
[23]य.वे.2.25
[24]शु.य.वे.23.48
[25]व्या.शि.187
[26]का.द.1.3
[27]पा.शि.6
[28]पा.शि.7
[29]पा.शि.9

ध्वनिषु शब्दानां तथा भाषाया अस्तित्वविषये एवं वदन्ति –

**श्रोतृग्रहणे हि अर्थे लोके शब्दशब्दः प्रसिद्धः।**[30]

विवक्षाजनितेन प्रयत्नेन कोष्ठस्थस्य वाचः प्रेरितस्य कण्ठताल्वाद्यभिघातः –

**यथास्थानं प्रतिघातात् वर्णाभिव्यक्तिः।**[31]

सम्भाषणसमये सम्यक् समालोच्य भाषणं कर्तव्यमिति वक्ति –

**हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम्।**
**आलोच्य भाषणेनापि भाषयेत् सूनृतं वृतम्।।**[32]

इत्थं संस्कृतवाङ्मये नैकानि भाषणकौशलानि उल्लिखितानि वर्तन्ते।न केवलं भाषणकौशलानि अपि चससान्दर्भिकं श्रवणभाषणकौशलानि अपि बहुत्र प्रोक्तानि। इमानि कौशलानि अर्वाचीनानां भाषाकौशलान्यपेक्षया सूक्ष्मेक्षिकानि इति मन्यामहे वयम्।

**सन्दर्भग्रन्थसूची –**


1. **प्राचीनभारत का शिक्षापद्धति – डा.कृष्णकुमार् मयूकप्रकाशन् हरिद्वार् 1999।**
2. **भारतीयभाषादर्शन- डा.विजयपालशास्त्री, सत्यम् पब्लिषिंग् हाउस् दिल्ली।**
3. **भाषापरिच्छेदः – श्रीपञ्चाननशास्त्री, चौखाम्भाप्रकाशनम्, वाराणसि।**
4. **वैदिकशिक्षापद्धतिः– डा.भाष्यकारमिश्रः, महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् उज्जयिनी, 2003।**
5. **वाग्विज्ञानम् – आचार्य श्रीरामचतुर्वेदी चौखाम्भा प्रकाशनम्, वाराणसि।**


[30]मी.भा.1.4.1
[31]न्या.सू.वा.भा.2.2.18
[32]स.सं. 28

# होराफलविसंवादित्वे हेतुः

**प्रसादभट्टः, ज्योतिषविभागः**

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालाभिपूर्वा विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम्॥**

ज्योतिश्शास्त्रं तु वेदस्य नेत्रस्थानीयमस्ति, यथोक्तं पाणिनीयशिक्षायाम्- **ज्योतिषामयनं चक्षुः** इति। ज्योतिषज्ञानं विना अहोरात्र- पक्ष- मास- ऋतु- संवत्सराणां शुभत्वाशुभत्व- ज्ञानमपि सम्भवं नास्ति। ज्योतींषि ग्रहनक्षत्राणि तेषां गतिस्थित्यादि अवबोधकं शास्त्रं ज्योतिषं शास्त्रम्। वेदेषु बीजभूतं शास्त्रमेव तत्तत्काले **सूर्य-ब्रह्म-व्यास-वशिष्ठ-अत्रि-पराशर-कश्यप-नारद-गर्ग-मरीच्यादयः** देवर्षयः स्वतेजस्तपोबलेन शास्त्रप्रवर्तनद्वारा महावृक्षरूपेण वर्धयामासुः। गच्छता कालेन आर्यभट्ट-वराहमिहिर-ब्रह्मगुप्त-भास्कराचार्य-केशवगणेशादयः स्वबुद्धिकौशलेन स्वतन्त्रग्रन्थव्याख्यानो-पपत्त्यादिभिः महान्तं तं ज्योतिर्वृक्षं संररक्षुः॥

अस्य महतो ज्योतिर्वृक्षस्य सन्ति त्रयः स्कन्धाः, यथा- सिद्धान्तः संहिता होरा चेति। उक्तं च नारदसंहितायाम् –

**'सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्।**
**वेदस्य निर्मलं चक्षुः ज्योतिश्शास्त्रमनुत्तमम्'[1]॥ इति।**

होरास्कन्धे सर्वप्रजानां प्राग्जन्मार्जितकर्मविपाकानां विज्ञापनमेव विषयः। होराग्रन्थेषु आधानलग्नात् जन्मलग्नात् प्रश्नलग्नाद् वा प्रतिव्यक्त्यनुभूयमानं फलं प्रोच्यते। ज्योतींषि अधिकृत्य प्रवृत्तस्यास्य ज्योतिश्शास्त्रस्य वेदोक्तकर्मणां सुकालनिर्णायकत्वेन वेदाङ्गत्वमिति ज्ञातपूर्वाः सकलशास्त्रमर्मज्ञाः। तत्र होरास्कन्धेऽस्मिन् राशि- होरा- द्रेष्काण- नवांश- द्वादशांश- त्रिंशांशबलाबलपरिग्रहः, ग्रहाणां दिक्स्थानकालचेष्टाभिः अनेकप्रकारबलनिर्धारणम्, प्रकृतिधातुद्रव्यजाति-चेष्टादिपरिग्रहः, निषेकजन्मकालविस्मापनप्रत्यादेशसद्योमरणायुर्दायः, दशान्तर्दशा-ष्टकवर्गराजयोगचन्द्रयोगादिग्रहादियोगानां नाभसादीनां च योगानां फलानि, आश्रयभावावलोकननिर्याणगत्यनूकानि तत्कालप्रश्नशुभाशुभनिमित्तानि, विवाहादीनां

1.नारद संहिता - १/४

विस्तृतविचारः क्रियते। इदानीन्तनकाले ज्योतिश्शास्त्रस्य सिद्धान्तसंहितास्कन्धयोरध्ययनं लुप्तप्रायम्। गणितस्कन्धे तु पञ्चाङ्गकरणादिषु आवश्यकत्वात्किञ्चिदध्ययनमस्ति। परं संहिताध्ययनेन कोऽपि मग्नः। प्रायशः बहुजनाः भविष्यत्कालिकफलजिज्ञासवः सन्तः ज्योतिर्विदं प्राप्नुवन्ति। होरास्कन्ध एव किञ्चित्कृतपरिश्रमाः गणितसंहितास्कन्धान्तर्गतविषयान् अजानन्तोऽपि स्वयं महादैवज्ञं मन्यमानाः फलादेशे प्रवर्तन्ते। एवमेव होरास्कन्धमेव समग्रं ज्योतिश्शास्त्रं मन्यमानाः जनाः अपि तदुक्तं फलं क्वचित्विसंवादिदृष्ट्वा कृत्स्नं ज्योतिश्शास्त्रमेव अप्रमाणमिति साधयन्ति। वस्तुतस्तु राष्ट्रविप्लवः, राजकीयपरिस्थितिः, प्रवाहानावृष्टिभूकम्पापघातादीनि न होराशास्त्रान्तर्गतानि। सर्वाण्येतानि ज्योतिषस्य संहितास्कन्धान्तर्गतानि। संहितास्कन्धं प्रायोगे न त्यजन्तु, तत्पुस्तकपठनेनापि अजानन्तो ज्यौतिषिकाः तत्सम्बन्धिविषयेषु कथं? किं फलमादिशन्ति पृच्छकेभ्य:? जातकफलस्य साफल्येऽपि बहुहोराशास्त्रज्ञानं, पञ्चसिद्धान्तज्ञानं ऊहापोहपाटवं मन्त्रसिद्धिश्च आवश्यिका भवति। तदुक्तं-

**अनेकहोरातत्त्वज्ञः पञ्चसिद्धान्तकोविदः।**
**ऊहापोहपटुः सिद्धमन्त्रो जानाति जातकम्[2]॥**

अत एव शास्त्रज्ञस्यापि दैवज्ञस्य ऊहापोहपटुत्वं सिद्धमन्त्रत्वं च नास्ति, सम्यग्भविष्यत् फलादेष्टुं न शक्नोति सः। यदि यो होरातत्त्वमजानन्केवलं सिद्धमन्त्रः ऊहपोहपटुत्वेन फलं प्रवक्तुं प्रयतते दैवज्ञाभासस्य तस्य ज्यौतिषिक इति पदवाच्यत्वमपि नास्ति। एवं विना ज्योतिषं यो अन्येन मार्गेण फलमादेष्टुं प्रयतते न तस्य वचः सत्या भवेत्। यदि अर्धसत्याभवेदपि स केवलं भविष्यवादी भवति, न दैवज्ञः। यथोक्तं आचार्यवराहमिहिरेण-

**कुहकावेषपिहितैः कर्णोपश्रुतिहेतुभिः।**
**कृतादेशो न सर्वत्र प्रष्टव्यो न स दैववित्[3]॥**

एवं पूर्वोक्तलक्षणाभावे फलादेशो व्यभिचरेत्। न व्यभिचरेदपि स केवलं भविष्यवादी न ज्यौतिषिक इति आचार्यवराहमिहिरस्यापि सम्मताभिप्रायः। अतःत्रिष्वपिस्कन्धेषु शास्त्रज्ञानं सांवत्सरिके न सम्पादनीयमिति समाप्यते मया।

---

2.प्र.मा १/१८

3.बृहत्संहिता- २/३१

# महामहोपाध्यायः भैरवमिश्रः

**वि.श्रीनिवासनारायणः, व्याकरणविभागः**

पुराणपुरुषस्य कुम्भसम्भवस्य अगस्त्यस्य वंशे महावैयाकरणः श्रीमान् भैरवमिश्रः जनिं लेभे, यथा स्ववंशमूलपुरुषः महातपस्वी अगस्त्यः श्रीरामाय ऐन्द्रशरासनादिदानेन, रावणहननवेलायाम् आदित्यहृदयाद्युपदेशेन च स्वीयां भक्तिं प्राकटयत्, तथैव तद्वंशोत्पन्नःभैरवमिश्रोऽपि,परीक्षाव्याख्याने हीत्थं[1] मङ्गलं, प्रतिज्ञाञ्च अकार्षीत् –

**प्रणम्य जानकीनाथं पाणिन्यादिमुनीन् गुरून्।**

**बालानां सुखबोधाय सिद्धान्तस्थापनाय च॥**

इत्यादिना श्लोकेन। तथैव परिभाषाविवृतौ –**वन्देऽहं परमात्मानं सर्वज्ञं रघुनन्दनम्** इत्यादिना श्लोकेन, चन्द्रकलायां अव्ययीभावप्रकरणारम्भे तिङन्तप्रकरणारम्भे च कृतैः मङ्गलाचरणैश्चभगवति श्रीरामे भक्तितात्पर्यपूर्णः इति सुज्ञायत एव। एवमेव भगवत्याः सरस्वत्याः मारुतेश्च उपासकोऽयमिति तत एवावगम्यते।

**वंशपरिचयः -**

अयमेव महावैयाकरणः स्वीयायां लघुशब्देन्दुशेखरस्य चन्द्रकलाव्याख्यायां अव्ययीभावप्रकरणव्याख्यानारम्भे[2] स्वं वंशपरिचयमदात् –

भैरवमिश्रः महर्षेः अगस्त्यस्य कुम्भसम्भव इति विशेषणदानेन तज्जन्मवृत्तान्तमसूसुचत्, तन्महिम्नः प्रस्तावाँश्च अकार्षीत्। तथा हि – मित्रावरुणौ यज्ञदेवते, ते कदाचित् नर-नारायणयोः ऊरुभागजमृदः जातां ऊर्वशीं ददृशतुः। तस्मिन् मोहे अकस्मात् तयोः वीर्यं कुम्भे पतितम्। तस्मात् कुम्भात् जातौ अगस्त्य-वसिष्ठनामकौ महानुभावौ। अतः कुम्भसम्भवः-घटोद्भवः-कलशसूतः तयोः नामान्तराणि। अयं महापुरुषः लोकत्रयोपकाराय बहूनि कार्याणि व्यधात्, तेष्वपि स्ववंशमूलभूतस्य पुरुषस्य विशेषद्वयं व्याख्यारम्भे प्रदर्शयाम्बभूव।

तद्यथा–दक्षिणदिशि स्थिताः राक्षसाः ऋषीन् देवान् मनुष्याँश्च पीडयामासुः, विशिष्य तेषु एकः कालकेशिः इति नामा राक्षसः देवाः रात्रौ युद्धं न कुर्वन्तीति विज्ञाय रात्रौ देवेषु दुराक्रमणं करोति स्म। दिवा च स्वपरिवारेण सह समुद्रोदरे प्रच्छन्न इत्यतः त्रस्ता

[1] भूषणसारःदर्पण-परीक्षा पृ.6.

[2] लघुशब्देन्दुशेखरचन्द्रकला.प्रथमभागः पृ. 736.

देवाः अगस्त्यं प्रति स्वसमस्यापरिष्करणाय प्रार्थयामासुः। तदा अगस्त्यः तदुपकाराय समुद्रजलं सम्पूर्णमपि एकस्मिन् कराम्भोजकुहर एव चुलीकीकृत्य पपौ। तदा राक्षसाः दृग्गोचराः सन्तः देवैः नाशिताः।

मेरुपर्वतः सप्तस्वपि पर्वतेषु उन्नततमः। प्रतिदिनं सूर्योऽपि मेरुपर्वतं परितः प्रदक्षिणं कुर्वन्नेव भ्रमणं करोतीति तस्य विशेषः। तेन कारणेन दक्षिणस्यां दिशि विद्यमानः विन्ध्यपर्वतः पीडितः आसीत्। विन्ध्यः सूर्यं स्वस्यापि प्रदक्षिणं कर्तव्यमित्यादिदेश। तदा सूर्यः अनवधानात् तथा नाकरोत्। तेन गर्वात् सः मेरुपर्वतात् उन्नतो भविष्यामि इति विचिन्त्य वर्धितुं प्रारभत। कतिपयदिवसानन्तरं विन्ध्यशिखराणि अत्युत्तुङ्गानि समभवन्। सूर्यभ्रमणं कष्टतरमभूत् तेन देवादीनां कार्यजातं प्रतिषिद्धम् अतः ते सर्वे विन्ध्यपर्वतं स्वावनत्यै प्रार्थयाम्बभूवुः, तदा विन्ध्यः नाश्रृणोदेव। तदा ब्रह्मा अगस्त्यमहर्षिसाहाय्यं स्वीकर्तुं उपदिदेश। तदा देवप्रार्थनया अगस्त्यः स्वपत्न्या लोपामुद्रया सह विन्ध्यपर्वतसमीपं गत्वा तस्थौ, तदा विन्ध्यः उत्तुङ्गशिखरोऽपि नतमस्तको भूत्वा चरणयोः साष्टाङ्गं प्रणाममकार्षीत्। तदा अगस्त्यः हे!विन्ध्याद्रे तव भक्त्या सन्तुष्टः, किन्तु अस्मिन् दक्षिणदिग्भागे बहुकार्यवशात् त्वरितः गच्छन्नस्मि। अतः प्रत्यागमनं प्रतीक्षस्व इत्यवोचत्। ततः निर्गतः सः एतावत्पर्यन्तं न प्रत्यावर्तत। तत्प्रतीक्षया विन्ध्यः नतमस्तक एव प्रतीक्षत इत्यतः क्लेशः परिहृतः। अतः अशरण्या दुराधर्षा आताप्यादिभिः अन्वितापि दक्षिणा दिक् अनेन महापुरुषेण शरण्या कृता इति भैरवमिश्रेण कथितम्।

एवमेव रामायणे महाभारतादौ धर्मजयाय अत्यन्तमुपकारमकार्षीदिति तत्तद्ग्रन्थावलोकनेन ज्ञायते। तथा अयं अगस्त्यसंहिता इति नाम्ना कस्यचन वेदभागस्य द्रष्टा आसीत् तथैव वैद्ये ज्योतिषे च अस्य कृतयः वर्तन्त इति बहुधा अयं लोकाराध्य इति। अत एव जैमिनीयब्राह्मणादिभिः सप्तर्षिमण्डले अन्यतमत्वेन संकीर्त्यते। तस्मिन् स्फीते कुले उत्पन्नः जगदीशः, ततः बन्दिमिश्रः तस्मिन्नेव वंशे लक्ष्मणमिश्रः जन्म प्राप्नोत् तस्य अद्वितीयः सुतः भवदेवमिश्रः यश्च श्रीमान् विद्वद्वरः उदारधीः इति ख्यातः, अयं महावैयाकरणः स्वपिता स्वगुरुरिति च परिभाषेन्दुशेखरव्याख्यारम्भे[3]

[3]परिभाषेन्दुशेखरः. परिभाषाविवृतिः. पृ.1

असूचयत्, अयं भवदेवमिश्रः बृहच्छब्दरत्नस्य व्याख्याता इति अन्यत्र सूचितम्[4]। भैरवमिश्रस्य माता भरद्वाजकुलोद्भवा सीता इति स्वयमेव मङ्गलाचरणे प्रोवाच[5]। अयं काश्यामेव जनिं लेभे इति च व्याख्याने सूचितमेव, तद्यथा - **भैरवः काश्यां जातो मिश्रोपनामकः**, तेन अयं सनाढ्यब्राह्मणः इति सरयूपारीण इत्यादि च ये वदन्ति ते परास्ताः। एतावता भैरवमिश्रस्य वंशः अयम्-

अगस्त्यः (मूलपुरुषः)
⇩
जगदीशः
⇩
बन्दिमिश्रः
⇩
लक्ष्मणमिश्रः
⇩
भवदेवमिश्रः — सीता (भरद्वाजगोत्रोत्पन्ना)

भैरवमिश्रः

अनेन अयं निधिमिश्रस्य पुत्र इति वंशवृक्षान्तरं प्रदर्श्य यदुक्तं[6] तत् परास्तम्। तथैवायं स्वगुरुविषये किमपि नावोचत् किन्तु ग्रन्थारम्भे सूचनामात्रेण स्वपितरं भवदेवमिश्रं गुरुरूपेणावादीत्, अतः बहुभिः पण्डितैः एतस्य गुरुः कः इत्यस्मिन् विषये बहुधा चर्चितम्, तत्र केचित्[7] अयं शक्त्युपासक इति ब्रुवन्तः अयं नागेशस्य साक्षाच्छिष्य इति अवादिषुः। तत्तु नागेशकाल-ग्रन्थकर्तृकालयोः परिशीलनात् असमीचीनमिति भाति। नागेशस्य कालः क्री.श. 1673-1753 इति युधिष्ठिरमीमांसकैः सूचितम्। तथैव अयं न शक्त्युपासकः किन्तु सीतासहितस्य रामचन्द्रस्य मारुतेः सरस्वत्याश्च पादुकासेवनाल्लब्धसेमुषीवैभव इति तत्कृत्यवलोकनात् ज्ञातुं शक्यमेव।

**भैरवमिश्रस्य कालः -**

महामहोपाध्यायादिबिरुदैः समलङ्कृतः श्रीमान् भैरवमिश्रः वैयाकरणग्रन्थव्याख्यातृषु अग्रगण्यः इति ख्यातः स्वकालविषये कुत्रापि उल्लेखं नाकार्षीत्,

[4] A DICTIONARY OF SANSKRIT GRAMMAR P. NO: 269, AUFRECHT CATA. CATALO. PART. I, P.NO-397

[5] परिभाषेन्दुशेखरः. परिभाषाविवृतिः. पृ.1

[6] A GLIMPSE OF THE HISTORY OF SANSKRIT GRAMMAR. P. NO.:244.

[7] युधिष्ठिरमीमांसकः, संस्कृतव्याकरणशास्त्रेतिहास् प्रथमभागः - पृ. 308, तथैव बलदेवोपाध्यायस्य संस्कृतसाहित्य का बृहद् इतिहास्, पञ्चमभागः - पृ.204.

किन्तु स्वकृतिषु प्रायः सर्वत्र ग्रन्थसमापनतिथ्युल्लेखमकरोत् तद्यथा – परिभाषेन्दुशेखरव्याख्यायां **परिभाषाविवृतौ**[8]–

**नेत्राष्टभूतिचन्द्राख्ये वत्सरे दुर्मुखे रवौ।**

**ज्येष्ठमासे सिते पक्षे ग्रीष्मर्तौ विश्ववासरे॥**

**पूर्णेयन्तनुताम्मोदं यथाशक्ति विवेचिता।** इत्यादिना श्लोकेन 1882 वैक्रमे वर्षे दुर्मुखनामके ज्येष्ठमासे शुक्लपक्षे ग्रीष्मर्तौ विश्ववासरे[9] समापितेति उदलेखीत्।

लघुशब्देन्दुशेखरव्याख्यायाः **चन्द्रकलायाः**कारकप्रकरणान्ते[10]–

**अङ्कार्षिसिद्धीन्दुमिते वत्सरे विजयाह्वये माघे**

**मास्यसिते पक्षे नवम्यां भानुवासरे॥** इत्यादिना श्लोकेन 1881 वैक्रमे वर्षे विजयाह्वये माघमासे कृष्णपक्षे नवम्यां तिथौ भानुवासरे समापितेति सूचनामकरोत्।

लघुशब्देन्दुशेखरव्याख्यायाः **चन्द्रकलायाः** तद्धितप्रकरणान्ते[11]–

**शब्देन्दुशेखरव्याख्या तद्धितान्तस्य या कृता।**

**सा वै शम्भुतिथौ वर्षे साष्टभूतीन्दुसम्मिते॥**

**अश्विनस्यासिते पक्षे भैरवेण समापिता॥** इत्यादिना श्लोकेन 1881 वैक्रमे वर्षे अश्विनिमासे कृष्णपक्षे शम्भुतिथौ[12] समापिता इति असूचयत्।

लघुशब्देन्दुशेखरव्याख्यायाः **चन्द्रकलायाः** समाप्तौ[13]–

**शश्यष्टभूतिचन्द्राख्ये मन्मथे शुभवत्सरे।**

**माघे मास्यसिते पक्षे मूले कामतिथौ शुभा॥**

**पूर्णा वारे दिनमणेः इयञ्चन्द्रकलाभिधा॥**

तथैव अनेन तद्धितप्रकरणान्ते चन्द्रकलाव्याख्यायाम् उपसंहारे[14]–

---

[8]परिभाषेन्दुशेखरः. परिभाषाविवृतिः पृ. 273

[9]गुरुवासरः, (क्रि.श. 1825 आङ्ग्लमासः मै दिनाङ्कः 15.)

[10]चन्द्रकलाप्र.भा.पृ.736 (क्रि.श.1823 आङ्ग्लमासः जनवरी 5.)

[11]चन्द्रकलाप्र.भा.पृ.419 (क्रि.श. 1823 आङ्ग्लमासः अक्टोबर् 3.)

[12]अष्टम्याम्

[13]चन्द्रकला द्वि.भा.पृ.1127 (क्रि.श. 1825 आङ्ग्लमासः जनवरी 16.)

[14]चन्द्रकलाद्वि.भा. पृ. 419-420

**अस्ति दौलतरायाख्यो राजराजोऽपरः कृती।**
**तल्लब्धजीविकेनैषावन्तिकायाः प्रभुर्महान्॥**

इत्यादिना श्लोकेन दौलतरायाख्यः भैरवमिश्रस्य जीविकादातेति, अवन्तिपुराधीश इति च सूचितम्। अवन्त्याः इदानीम् उज्जयिनी इति व्यवहारः वर्तते दौलतरायसिंह इति कश्चन महाराष्ट्रियः राजा क्री.श. 1794-1827 समये तद्राज्यमपालयदिति च चरित्रात् लभ्यते। अनेन भैरवमिश्रस्य क्री.श. 1780-1840 कालः स्यादिति विमर्शकैरभिप्रेतम्[15]।

**भैरवमिश्रस्य कृतयः -**

यद्यप्यस्य महानुभावस्य इतरेषु तन्त्रेषु प्रकृष्टा पाण्डिती वरीवर्ति, तथापि सर्वमस्य जीवनं व्याकरणशास्त्रायैवार्पितम्। अनेन रचिताः व्याख्याः गुरुपरम्परायां पठन-पाठनेषु उपयुज्यमानाः सत्यः वैयाकरणानामुपजीव्याः राजन्ते।एतदधीत्यैव कोऽपि वैयाकरणः प्रौढेषु ग्रन्थेषुच्छिन्नसंशयः भवतीति कीर्त्यते। नागेशग्रन्थयोः परिभाषेन्दुशेखर-लघुशब्देन्दुशेखरयोः व्याख्या अतिप्रसिद्धा राराष्टि, लघुशब्देन्दु-शेखरस्य सम्पूर्णस्य एतद्व्याख्यानं विना नान्यद् व्याख्यानं तद्ग्रन्थोपजीवकं वर्तते। एवमेव नागेशगुरोः हरिदीक्षितस्य कृतेः प्रौढमनोरमाव्याख्यानभूतस्य लघुशब्दरत्नस्य विस्तृतं व्याख्यानं रचयाम्बभूव। एताः व्याख्याः अध्यापने अध्ययने च गुरुभिः अध्येतृभिश्चाद्रियन्ते। तत्कृतयश्चेत्थम् –

कारकटीका, परिभाषाविवृतिः(परिभाषेन्दुशेखरव्याख्या), चन्द्रकला (लघुशब्देन्दु-शेखरटीका), चन्द्रकलानिर्णयः, परीक्षा (भूषणसारव्याख्या), भैरवीयपञ्चसन्धिः, शब्दरत्नव्याख्या भैरवी इत्यादि। तद्व्याख्याविशेषाः केचित् परिशीलयन्ते –

**परिभाषाविवृतिः–**

इयं परिभाषेन्दुशेखरस्य नातिविस्तृता मूलार्थप्रकटनक्षमा च व्याख्या, अत्र प्रतिपदं विशेषाः वर्तन्ते। तद्यथा -एकदेशविकृतमनन्यवत् इति परिभाषाव्याख्यासन्दर्भे **रामौ** इत्यादौ कार्यकालपक्षे कथं पदत्वम् इत्यादिमूलस्य अवतरणिकायाम्-**कार्यकालपक्षमुपक्रम्य एतत्परिभाषावतरणं न युक्तम्, आकडारादिस्थानां भपदसंज्ञानां विषये यथोद्देशपक्षे एव इत्युक्तत्वात्, तदाश्रयणेन रामावित्यादौ दोषाभावात् इति प्रश्ने –**

[15]भैरवमिश्रः -by M.S.Bhatta. JHR 35 pp 76-78.

**यत्र तदधिकारस्थसञ्ज्ञाद्वयप्रसक्तिः तत्रैव यथोद्देशपक्षः इति पूर्वोक्तग्रन्थतात्पर्यम्, तदेवोक्तन्तत्र "आकडारादिस्थभपदसञ्ज्ञाविषये त्विति"यत्र तु न द्वयोः प्रसक्तिः तत्र कार्यकालत्वमपि अत एव अन्तादिवच्च इति सूत्रे परादिवद्भावस्य फलं वृक्षे तिष्ठतीत्यादौ कार्यकालपक्षे निघातसिद्धिः फलम्** इत्याद्युक्तम्। अस्मिन् विषये बहुषु व्याख्यानेषु महती व्याकुलता वर्तते, केचिन्नागेशस्य समर्थनमकार्षुः, केचित्तिरश्चक्रुः, अस्मिन् व्याख्याने तु पूर्व-प्रकृतग्रन्थयोः समन्वयः कृत इति।

**चन्द्रकला –**

चन्द्रकलाव्याख्याने मूलपङ्क्तिसमन्वयेन सह अपेक्षिते स्थले सरूपसूत्रादौ तन्त्रादिविषये महती चर्चा कृता, तथैव अभेदस्य सम्बन्धत्वाभावनिरूपणे नागेशग्रन्थानुसारि व्याख्यानं सरलैः वाक्यैः अकारि। एतद्व्याख्यानात् अन्यत् किमपि नास्ति यत् पूर्णस्य लघुशब्देन्दुशेखरस्य मूलार्थानुगणम्, तदाशयप्रकटनक्षमञ्च व्याख्यानान्तरम्। तत्र आरम्भे एव **कृतभूरिपरिश्रम** इति पदस्य व्याख्याकाले तद्व्याख्यापाटवमवगम्यते, एतस्य लेखनकालविषये पूर्वं चर्चा कृता।

**शब्दरत्नव्याख्यानं भैरव्याख्यम्[16]–**

अन्तादिवच्च, अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, अदस् शब्दनिरूपणसन्दर्भे कारकप्रकरणे अभेदस्य सम्बन्धत्वव्यवहारादिनिरूपणे च महती प्रतिभा प्रदर्शिता, तथैव कृत्तद्धितसमासाश्च इति सूत्रे अतिप्रातिपदिकम् इत्यादिपरकृतन्यासविषये महतीं चर्चां कृत्वा सिद्धान्तमुपस्थापयामास। यत्र क्वापि स्पष्टं भाष्ये, ध्वनितं चेदं भाष्ये कैयटे इत्यादिवाक्यसन्दोहः दृष्टः अपादानादिस्थले, तत्र ससन्दर्भं भाष्यं तदाशयञ्च यथायथं व्याकरोतीति विशेषः, अत एवायं व्याख्यानग्रन्थः गुरुपरम्परासु आद्रियमाणः राराजते। इयं व्याख्या कारकान्तभागस्य उपलभ्यते। कुत्रचित् अपेक्षिते स्थले मनोरमाग्रन्थस्य समन्वयः प्रदर्शितः इति एतद्व्याख्यानस्य विशेषः।

**भूषणसारव्याख्या परीक्षा–**

इयं व्याख्या प्रायः अन्यव्याख्यालेखनात्पूर्वं कृता इति भाति। यतः शब्दरत्नादिग्रन्थान्तरव्याख्यासु नागेशस्य महान् प्रभावः प्रतिस्थलं दरीदृश्यते, किन्तु भूषणसारव्याख्याने परीक्षाख्ये प्रायः दर्पणव्याख्यैव अनुसृता। यत्र कुत्रचित् यदि

[16]प्रौ.म. पृ. 167, 252, 615

तिरस्करणीयम्, तत्र तु तिरस्चकार तद्यथा – फलत्वपरिष्कारवेलायां दर्पणकारोक्तं लक्षणद्वयमनूद्य द्वितीयलक्षणं **व्यापकत्वादिदमेवादर्तव्यम्**[17] इत्यादिना ग्रन्थेन समीचीनमिति सूचितम्, या च व्याख्या दर्पणकारानभिमता। एवमेव बहुष्वपि स्थलेषु। भूषणसारस्य वैयाकरणमतोन्मज्जनव्याख्याभूतस्य पञ्चदशाधिकाः व्याख्याः वर्तन्ते। ताः प्राचीनाः अर्वाचीनाश्च इति भेदेन विभक्तुं शक्याः। तत्रापि भैरवमिश्रस्य व्याख्या प्राचीनव्याख्यासु अन्तिमेति गुरुचरणानाम् अभिप्रायः[18]। शाङ्करीव्याख्यायाः कर्तारः शङ्करशास्त्रिणस्तु इत्थं लिखन्ति[19]–**भैरवमिश्राः प्रयागक्षेत्रनिवासिनः तथा भट्टनागेश-ग्रन्थानामुपरि विद्वत्ताप्रचुराः टीका लिखन्तो महावैयाकरणा महानैयायिकाश्च भूत्वा काशिकाटीकाकृतो हरिरामस्य गुरवो स्युः** इत्यादि। तन्न सम्यगिति भाति, यतः तैरेव काशिकाव्याख्याकालः लिखितः 1854 इति। क्रिस्तुशकमाश्रित्य अयं वर्षः अष्टादशशतकस्यान्तिमभागस्य वर्तते। अयं भैरवमिश्रस्तु क्रिस्तुशकानुसारेण एकोनविंश-शतकस्य आरम्भभागे व्याख्यानानि चकारेति तेनोपदर्शिततिथ्यवलोकना-त्स्पष्टमेवेत्यतः तदनन्तरकालिक एवेति सुस्पष्टमेवेति शाङ्करीव्याख्यातारः उपेक्ष्या एव। एवं रूपेण व्याकरणशास्त्रस्येतिहासे भैरवमिश्रः प्रमुखं स्थानमावहतीति शम्।

**यदत्र सौष्ठवं किञ्चित् तद्गुरोरेव मे न हि।**
**यदत्रासौष्ठवं किञ्चित् तन्ममैव गुरोर्न हि॥**

## उपयुक्तग्रन्थसूची -

भूषणसारतत्त्वप्रकाशिका रा.सं.विद्यापीठम्, 2010.
भूषणसारः (दर्पण-परीक्षायुतः) चौखाम्बासंस्कृतसीरीज्, 1996.
भूषणसारः (शाङ्करीव्याख्यायुतः) आनन्दाश्रममुद्रणालयः 1957.
प्रौढमनोरमा (भैरवीशब्दरत्नसहिता) वाणीविलासप्रकाशनम्, 1997.
परिभाषाविवृतिः (परिभाषेन्दुशेखरः) चौखाम्बासंस्कृतप्रतिष्ठानम्2002.
न्यूकेटलागस् केटलागरम्
Effimeries
A Dictionary of Sanskrit Grammar
A Glimpse Of the History Of Sanskrit Grammar.
Indian research journal

[17] भू.स. पृ. 9
[18] भू.सा.त.प्र. पृ.28
[19] भू.सा. शाङ्करीव्याख्यायाः प्रस्तावे पृ.3-4

# नारायणभट्टपादः

कविता.के., अनुसन्धात्री

अनेकेषां पण्डितानां पादस्पर्शेन पवित्रीकृतं भवति अस्माकं केरलराज्यम्। तेषु प्रधानिनः भवन्ति शङ्कराचार्यः, शक्तिभद्रः, मेल्पत्तूरनारायणभट्टतिरिः, श्रीनारायणगुरुः, चट्टम्पिस्वामी इत्यादयः पण्डितवर्याः। तेषु महापण्डितेषु अग्रेसरो भवति मेल्पत्तूरनारायणभट्टपादः। नारायणभट्टपादः सुविख्यातः नानाशास्त्रपण्डितः महान् वैयाकरणाः अपि च भगवतः श्रीकृष्णस्य परमभक्तः कविश्च आसीत्। अनेन पण्डितेन स्वकीये प्रक्रियासर्वस्वाख्ये व्याकरणग्रन्थे अन्तिमभागे स्वीयपरिचयः दत्तः।

भूखण्डे केरलाख्ये सरितमिहनिलामुत्तरेणैव नावा-
क्षेत्राद् गव्यूतिमात्रे पुनरुपरिनवग्रामनाम्नि स्वधाम्नि
धर्मिष्ठाद् भट्टतन्त्राद्यखिलमतपटोर्मातृदत्तद्विजेन्द्रा-
ज्जातो नारायणाख्यो निरवहदतुलां देवनारायणाख्याम्।।

पण्डितस्यास्य जीवनसमयः 735तमवर्षादारभ्य 841तमवर्षपर्यन्तं षडुत्तरशत-संवत्सरपरिमित इति वर्ण्यते चरित्रकारैः। केरलभूखण्डे निलानद्याः उत्तरदिशा तिरुनावायक्षेत्राद् गव्यूतिमात्रे दूरे मलप्पुरं जनपदस्य मेल्पुत्तूरिल्लं नाम गृहे अयं पण्डितश्रेष्ठः जनिमलभत। भट्टपादस्य पिता सर्वशास्त्रेष्वपि पण्डितः मातृदत्तः भवति । मातुः गृहं तृशूर जनपदस्य पय्यूर ग्रामे स्यात्। दामोदरः इति ज्येष्ठभ्राता, मातृदत्तः इति अनुजः च आसीत् पण्डितस्यास्य। न केवलम् एकशास्त्रे अपि तु सर्वेष्वपि शास्त्रेषु निपुणः आसीत् नारायणपण्डितः इति प्रक्रियासर्वस्वाख्ये स्वीयव्याकरणग्रन्थे उक्तश्लोकात् ज्ञायते। यथा-

मीमांसादि स्वतातान्निगममविकलं माधवाचार्यवर्यात्
तर्कं दामोदर्यादपि पदपदवीमच्युताख्यात् बुधेन्द्रात्
तेषां कारुण्ययोगात् किमपि च कवितामाप्नवंकर्ममेतत्
भूयात् कृष्णार्पणं मे भवतु च सततं धीरखारेः कथायाम्।।

मीमांसादिशास्त्राणि स्वपितुः सकाशात्, वेदाः माधवाचार्यवर्यात्, तर्कः दामोदर-ज्येष्ठात्, व्याकरणं पण्डितश्रेष्ठाच्युतपिषारटीतः च अधीतम्।

**कृतयः**

नारायणभट्टपादेन रचिताः अनेकाः संस्कृतकृतयः सन्ति। नारायणभट्टपादः केरलीयः

चेदपि अस्य प्रायेण सर्वाः अपि कृतयः संस्कृतभाषायामेव लिखिताः। स्तोत्रम्, प्रशस्तिः,चम्पू,मुक्तकं, शास्त्रग्रन्थाः इत्यादिषु विभागेषु स्वप्रतिभां प्रदर्शितवान् अयं पण्डितश्रेष्ठः। नारायणीयम्, श्रीपादसप्ततिः, गुरुपवनपुरेशस्तोत्रम्, गोश्रीनगरवर्णना, माटमहीशप्रशस्तिः, शैलाब्धीश्वरप्रशस्तिः, सूक्तश्लोकाः, प्रक्रियासर्वस्वम्, राजसूयम्, दूतवाक्यम्, पाञ्चालीस्वयंवरम् इत्यादयः अस्य पण्डितस्य प्रसिद्धाः कृतयः सन्ति। रामायणमहाभारतादीनाधारीकृत्य बहुप्रबन्धान् रचितवान् अयं पण्डितः।

**स्तोत्रकाव्यानि**

संस्कृतवाङ्मयं स्तोत्रकाव्यैः समृद्धमेव। इष्टदेवतास्तुत्यर्थं कविप्रतिभा अनितरसाधारणतया परिलसति। सर्वानपि देवानधिकृत्य प्रायेण स्तोत्रकाव्यानि सन्ति। केरलीयसंस्कृतवाङ्मयेऽपि बहूनि स्तोत्रकाव्यानि वर्तन्ते। स्तोत्रकाव्यमण्डले विशिष्टस्थानम् आवहति पण्डितश्रेष्ठः मेल्पुत्तूर् नारायणभट्टपादः। भट्टपादस्य स्तोत्रकाव्येषु प्रसिद्धे भवतः नारायणीयम्, श्रीपादसप्ततिः च।

क) नारायणीयम्

नारायणभट्टपादेन रचितेषु स्तोत्रकाव्येषु अन्यतमो भवति नारायणीयम्। भट्टपादेन चतुश्शतवर्षेभ्यः प्राक् गुरुपवनपुरालयं गत्वा सान्द्रानन्दावबोधात्मकमित्यारभ्य सहस्राधिकैः श्लोकैः नारायणीयम् इति स्तोत्रकाव्यं विरच्य वातरोगात् मुक्तः जातः इति जनश्रुतिः। केरलीयानां मनस्सु चिरप्रतिष्ठितम् इदं स्तोत्रकाव्यम्। अस्मिन् नारायणीये शतदशकानि,सहस्राधिकाः श्लोकाः च सन्ति। श्लोकाः वृत्तनिबद्धाः भवन्ति। भागवतकथामाधारीकृत्यैव इदं स्तोत्रकाव्यं विरचितम्। भागवतप्रथमस्कन्धादारभ्य नवमस्कन्धपर्यन्तं याः कथाः वर्तन्ते ताः सर्वाः अपि कथाः नारायणीयस्य प्रथमतः षड्त्रिंशत् दशकपर्यन्तं वर्णिताः सन्ति। कृष्णावतारकथा नारायणीयस्य सप्तत्रिंशत्तमे दशके कविना मनोहारितया वर्णिताः अस्ति। भगवता श्रीकृष्णेन उद्धवाय दत्ता तत्त्वोपदेशकथा अस्य स्तोत्रकाव्यस्य एकनवतिदशकादारभ्यते। भट्टपादस्य पाण्डित्यं कियदस्ति इति ज्ञातुं कानिचन उदाहरणानि अत्र प्रस्तूयन्ते।

चतुर्थे दशके अष्टाङ्गयोगः, प्राणस्य शुक्लकृष्णादि गतयः(मरणानन्तरं) इत्यादयः प्रतिपादिताः सन्ति।

पञ्चदशतमे दशके सांख्यतत्वानि सम्यक् प्रतिपादितानि सन्ति। नवतितःशतदशकपर्यन्तं वैष्णवमहत्वं,भक्तिकर्मयोगानि, तत्त्वज्ञानं, ध्यानयोगम् इत्यादीनां विषयाणां वर्णनं सरलभाषया प्रतिपादितमस्ति।

जीष्णोस्त्वं कृष्ण सूतः खलु समरमुखे बन्धुखाते दयालुं
खिन्नं तं वीक्ष्य वीरं किमिदमयि सखे नित्य एकोयमात्मा।
को वध्यः कोऽत्रहन्ता तदिह वधभियं प्रोज्य मय्यर्पितात्मा
धर्म्यं युद्धं चरेति प्रकृतिमनयथा दर्शयन् विश्वरूपम्।।

श्लोकेऽस्मिन् सम्पूर्णं गीतारहस्यम् अन्तर्निहितमस्ति। शास्त्रविषये विशिष्य व्याकरणशास्त्रे भट्टपादस्य पाण्डित्यम् अद्भुतावहमेव। नारायणीये उपर्युक्तानि प्रायेण सर्वाण्यपि क्रियापदानि वैविध्यं, वैचित्र्यम्, औचित्यम् इत्यादिगुणैः अलङ्कृतानि। कृत्तद्धितसमासानां प्रयोगमपि अत्र द्रष्टुं शक्यते। अत एव केरलदेशे अस्य ग्रन्थस्य नित्यपारायणग्रन्थत्वेन प्रसिद्धिः।

**ख) श्रीपादसप्ततिः**

नारायणभट्टस्य स्तोत्रकाव्येषु अन्यतमं भवति श्रीपादसप्ततिः। मुक्कोलदेवीपादवर्णनापुरस्सरं लिखितं स्तोत्रकाव्यं भवति श्रीपादसप्ततिः। मुक्कोल इति कैरल्यां विख्याते मुक्तिस्थलमित्याख्ये देशे विराजमाना देवी मुक्कोलभगवती इति संज्ञया प्रथिता। स्तोत्रेऽस्मिन् नामानुसारं अर्थ- चमत्कृतिप्रधानाः सप्ततिश्लोकाः सन्ति। सप्ततितमे स्वीयम् आयुषं प्रकल्प्य कविना सप्ततिश्लोकात्मकं स्तोत्रं व्यालेखि इति केचन अभिप्रयन्ति। शार्दूलविक्रीडितवृत्ते निर्मितम् इदं स्तोत्रकाव्यं सहृदयदिशा, भक्तिदिशा च अतिरमणीयं भवति। प्रस्तुतकृतौ अन्तिमश्लोके-

सैषा मुक्तिपुरीगिरीन्द्रतनया भक्तेननारायणेना-
बद्धा खलु सप्ततिर्दिशतु वः कल्याणहल्लोहलम्।।

इति प्रस्तावः कवेः नाम नारायणः, कविः मुक्तिपुरीश्वर्याः भक्तः च आसीत् इति सूचनां ददाति। श्रीपार्वत्याः पादारविन्दे प्रणम्य भट्टपादेन रचिता इयं कृतिः। अस्याः एवमारभ्यते-

दक्षाधः करपल्लवे लसदसीं दक्षोर्ध्वगे शूलिनीं
वामोर्ध्वे फलकोज्ज्वलां कटितटन्यस्तान्यहस्ताम्बुजाम्।

शूलाग्राहत कासरासुरशिरोनिष्ठां प्रहृष्टां सुरै-
जुष्टामिष्टफलप्रदां भगवतीं मुक्तिस्थलस्थां भजे ।।

श्रीगुरुपवनपुरेशस्य उपदेशमनुसृत्यैव भट्टपादेन इदं स्तोत्रकाव्यं निर्मितम् इति उक्तिः अपि वर्तते। वार्धक्यकाले एव भट्टपादः तत्र आगतः। सायूज्यप्राप्तिपर्यन्तम् अयं पण्डितः तत्रैव कालम् अनयन्।

नारायणीयं तथा श्रीपादसप्ततिः च भट्टपादेन स्वस्य नाममुद्रया एव उपसंह्रियते-

द्वेधा नारायणीयं श्रुतिषु च जनुषा स्तुत्यतावर्णनेन
स्फीतं लीलावतारैरिदमिह कुरुतामायुरारोग्यसौख्यम्।।

(नारायणीयम्)

स एषा मुक्तिपुरीगिरीन्द्रतनयात् भक्तेन नारायणे
नाबद्धाखलु सप्ततिर्दिशतु वः कल्याणहल्लोहलम्।।

(श्रीपादसप्ततिः)

शङ्कराचार्यभगवत्पादानन्तरं सर्वेऽपि नारायणभट्टपादमेव स्मरन्ति। संक्षिप्तभागवत-कथाप्रतिपादकनारायणीयं, मुक्कोलदेवीपादवर्णनापुरस्सरं लिखिता श्रीपादसप्ततिः च सदा सर्वथा तं प्रसिद्धकविरिति प्रख्यापयति च। स्वीयपाण्डित्यस्य कवित्वस्य च अभूतपूर्वं सौन्दर्यं तस्य सर्वास्वपि कृतिषु दरीदृश्यते। सहृदयानां मनस्सु भट्टपादः तत्कृतयः च चिरं राराजन्ते इत्यस्मिन् विषये नास्ति संशीतिः। अत एव केरलीयानां तथा संस्कृतज्ञानां हृत्सु चिरप्रतिष्ठितः सन् चिरं जीवत्ययं भट्टपादः।

# सुगमरामायणे सुभाषितानि

जिन्सीमोल्.एस् , विद्यावारिधिः

सुष्टु भाषितं सुभाषितम्। किं कर्तव्यं किमकर्तव्यं इति सन्देहे मानवान् सुपन्थानं नेतुं मार्गदर्शकानि भवन्ति सुभाषितानि। सुभाषितानां भाण्डागारः भवति संस्कृतभाषा। अस्याः भाषायाः विभिन्नेषु ग्रन्थेषु सत्य-धर्म-नीति बोधकानि, तथा उत्तमजीवनाय मार्गनिर्देशकयोग्यानि च सुभाषितानि दृश्यन्ते।एतादृशसुभाषितानाम् एकं स्रोतो भवति भारतीयसंस्कृतेः आधारभूतत्वेन विराजमानं वाल्मीकिरामायणम्। भारतीयसंस्कृतेः - वैशिष्ठ्यस्य- महत्त्वस्य च प्रत्यक्षप्रभावो भवति अयं ग्रन्थः। रामकथाद्वारा मानवमूल्यप्रदर्शकः अयं ग्रन्थः मानवजीवनाय सन्देशत्वेन तिष्ठति।अत एव अस्मिन्नाधुनिके युगेऽपि रामकथाऽऽधारीकृताः रामकथापरकाः च अनेकाः कृतयः विरचिताः दृश्यन्ते। एतेष्वन्यतमं भवति उत्तरप्रदेशीयेन रमेशचन्द्रशुक्लवर्येण विरचितं **सुगमरामायणमहाकाव्यम्**। चतुर्दशाध्याययुक्ते अस्मिन् महाकाव्ये रामायणकथया समाजोन्नत्यै प्रयत्नः क्रियते। रामायणमिव सुगमरामायणेऽपि सन्दर्भोचिततया अनेकानि सुभाषितानि योजितानि दृश्यन्ते यथा-समाजजीवनं किमर्थं भवेदिति प्रश्नस्योत्तरप्रदाता मार्गनिर्देशकः सुभाषितम्-

धर्मज्ञानां सुजनसुहृदां जीवनं त्वादृशानां
न्यायारूढार्जवनयवतां वेदरक्षापराणां ।
मर्यादासंस्कृतिमतिमतां सज्जनानां बुधानां
भोगार्थं नो भवति विषयाणां न संशीतिरत्र।।(सु रा-8.25)

राष्ट्रोन्नतिः प्रत्येकं मानवानाम् उन्नमनेन भवति। किन्तु अस्मिन्नाधुनिके युगे सर्वे मानवाः कुमार्गेणैव अटन्ति।अधिकारिणः, जनाः सर्वदा मानवमूल्यानि त्यक्त्वा राष्ट्रोपद्रवम् एव क्रियन्ते।राष्ट्रपालकाः एव अक्रमकारिणः भवन्ति चेत् राष्ट्रस्योन्नतिः कथं भवति? इति विचिन्त्य विरचितं सुभाषितं भवति-

अनीतिलीनो नृपतिः कुमार्गणो निपात्य देशं परमार्तिसागरे ।
समस्तराष्ट्रं नयतेऽपि चापदं अदो भवेयुः क्षितिपाः सुमार्गगाः।। (11.76)

कर्मफलतत्पराः सन्ति मानवाः किन्तु मातापित्रोः संरक्षणे परिपालने च लाभमेव पश्यन्ति कुबुद्धयः।एतादृशानां कृते उत्तमभक्तस्य वैशिष्ट्यद्वारा निष्कामकर्मत्वप्राधान्यं प्रतिपादयति यथा –

सन्तः स्वयञ्चाददते न कर्तृतां
ते कामयन्ते सततं भवन्तु ते ।
श्रेयोगता मानगता यशोगताः
भक्तिं प्रगाढां दधते हि तेषु ये।।(11.17)

विवेकशून्याः कुमार्गिणः दुष्टाः अहङ्कारिणः च अन्तिमफलत्वेन नाशमेव प्राप्नुवन्ति इति बोधयति इदं सुभाषितम्-

धर्मच्युता निन्द्यदुराग्रहस्थिताः
मानवलेपोद्धतशौर्यचञ्चलाः
उन्मत्तचित्ताः परमप्रमादिनः
कालेन लोकेऽपि पतन्ति गच्छता ।।(12.72)

स्वधर्मपालने तात्पर्यहीनाः अधार्मिकाः अलसाः च भूत्वा ये अटन्ति ते जीवन्ति सति मृतवन्तः एव भवन्ति इति प्रतिपादयत् सुभाषितं भवति-

यः कर्मनिष्ठो न च नैजधर्मभृत्
शोकास्पदं सोऽवनिमण्डले नरो।
जातस्य मृत्युर्ह्यसुधारिणो ध्रुवो
जन्मापि नूनं मृततां गतस्य च।।

एतादृशानि मानवोपकाराणि प्रेरणादायकानि मार्गनिर्देशकानि च सुगमरामायणे दृश्यन्ते। एवं रामकथाद्वारा समाजस्योन्नतिः इत्याशयो अत्र सफलतामुपैति।एवं मानवजीवनोपकाराणि मार्गनिर्देशकानि सुभाषितानि सरलया भाषया शैल्या च प्रतिपादितत्वात् समाजहिताय सद्गुणोत्पादनाय च भवन्ति। सद्गुणादि मूल्यानां प्राप्तिः बाल्यादेव भवेत्।समाजस्य प्राथमिकघटको भवति परिवारः। अतः सर्वे स्वपरिवारेषु एतादृशानि काव्यानि पठित्वा सुभाषितानां सारं पुत्रान् बोधयन्ति चेदेव समाजोन्नतिः सहजतया भवति।

# पदपदार्थदोषनिरूपणं-वामनमते

**गोविन्दन्.एन्, शोधच्छात्रः**

अलङ्कारशास्त्रस्य प्रमुखः आचार्यः आसीत् वामनाचार्यः। अस्य प्रसिद्धालङ्कारग्रन्थो भवति काव्यालङ्कारसूत्राणि। अलङ्कारशास्त्रस्य सर्वेऽपि विषयाः तेन काव्यालङ्कारसूत्रे निरूपिताः वर्तन्ते। ग्रन्थेऽस्मिन् पञ्चाधिकरणानि, द्वादशाध्यायाः च विद्यन्ते।

प्रथमे शारीराधिकरणे काव्यस्य प्रयोजनम् तथा त्रिविधरीतीनां च वर्णनम् क्रियते। द्वितीये दोषदर्शनाधिकरणे पद-वाक्य-वाक्यार्थदोषाणां प्रतिपादनमस्ति। गुणविवेचनम् नाम तृतीये अधिकरणे दशगुणानां शब्दार्थगतत्वेन विंशतिभेदप्रदर्शनम् प्रतिपाद्यते। चतुर्थे अधिकरणे शब्दार्थालङ्काराणां लक्षणोदाहरणानि निरूपितानि। प्रायोगिकं नाम पञ्चमे अधिकरणे कतिपयप्रयोगाणां शुद्धीकरणरीतीनां तथा तत्प्रयोगकरणप्रकाराणां निरूपणं क्रियते। एतेषु सर्वेषु अध्यायेषु समुदायरूपेण 319 सूत्राणि विद्यन्ते। आचार्योऽयं रीतिसम्प्रदायस्य प्रवर्तकः आसीत्। "रीतिरात्मा काव्यस्य" इति सूत्रमनेन प्रणीतम्। आचार्यस्य विशिष्टसिद्धान्ताः भवन्ति गुणालङ्काराणां परस्परभेदः, वैदर्भीगौडीपाञ्चालीति त्रिविधरीतयः, वक्रोक्तेः विशिष्टलक्षणम्, विशेषोक्तेः विचित्रलक्षणम्, आक्षेपस्य द्विविधकल्पना, समस्तार्थालङ्काराणामुपमाया एव प्रपञ्चस्वीकारः च।

**पददोषाः**

वामनेन स्वीये काव्यालङ्कारसूत्रे दोषदर्शनं नाम द्वितीयेऽधिकरणे पददोषाः प्रतिपादिताः सन्ति। पददोषाणां प्रतिपादनात् पूर्वं दोषलक्षणं निरूपितमस्ति। यथा-

**"गुणविपर्ययात्मानो दोषाः"।**

अर्थात् गुणविपरीतस्वरूपत्वं भवति दोषलक्षणम्। एतेषां दोषाणाम् अवगमनम् अर्थतः सिद्ध्यति।

शब्दार्थशरीरं हि काव्यम्। अत्र पदवाक्यात्मकः भवति शब्दः । अर्थश्च पदार्थवाक्यार्थरूपः। तत्र पदपदार्थप्रतिपत्तिपूर्विका वाक्यवाक्यार्थप्रतिपत्तिरिति क्रममभिसन्धाय प्रथमं पददोषान् प्रतिपादयन्ति। यथा-

**"दुष्टं पदमसाधु कष्टं ग्राम्यमप्रतीतमनर्थकं च"।**

असाधु, कष्टम्, ग्राम्यम्, अप्रतीतम्, अनर्थकं चेति पञ्चपददोषाणि सन्ति। एतानि पददोषाणि क्रमेण व्याख्यातानि। प्रथममसाधु लक्षणं प्रतिपादयति। यथा-

1) "शब्दस्मृतिविरुद्धमसाधु"।

व्याकरणशास्त्रात् विरुद्धं पदम् असाधु भवति। अस्योदाहरणं भवति "अन्यकारकवैयर्थ्यम्'। द्वितीयं भवति कष्टम्। यथा-

2) "श्रुतिविरसं कष्टम्"।

कर्णोद्वेगकरं पदं कष्टम् भवति। उदाहरणो भवति-

अचूचुरच्चण्डि! कपोलयोस्ते कान्तिद्रवं द्राग्विशदः शशाङ्कः।

चण्डि द्राग्विशदः शशाङ्कः ते कपोलयोः कान्तिद्रवम् अचूचुरत् इत्यन्वयः। अत्र "द्रागिति' पदं कष्टं भवति। तृतीयं भवति ग्राम्यम्। यथा-

3) "लोकमात्रप्रयुक्तं ग्राम्यम्"।

ग्रामे भवं ग्राम्यमिति व्युत्पत्तिः। लोकमात्रसिद्धमित्यर्थः। अर्थात् लोके एव यत्प्रयुक्तं पदं , न तु शास्त्रे तद् ग्राम्यं भवति। उदाहरणो यथा-

" कष्टं कथं रोदिति फूत्कृतेयम्"। अत्र "फूत्कृतेति' पदं ग्राम्यं भवति।

यथा वा- "ताम्बूलभूतगल्लोऽयं तल्लं जल्पति मानवः" इत्यादौ यत्तल्लगल्लादिपदं प्रयुज्यते, तदपि ग्राम्यं द्रष्टव्यम्। चतुर्थं भवति अप्रतीतम्। यथा-

4) "शास्त्रमात्रप्रयुक्तमप्रतीतम्"।

अर्थात् शास्त्रे एव यत्प्रयुक्तं न तु लोके, तदप्रतीतं पदम्। यथा-

"किं भाषितेन बहुना रूपस्कन्धस्य सन्ति मे न गुणाः।

गुणानान्तरीयकं च प्रेमेति न तेऽस्त्युपालम्भः"।।

अत्र रूपस्कन्धनान्तरीयकपदे शास्त्रे एव प्रयुक्तं न तु लोके इत्यतः अप्रतीतम् पदम्। पञ्चमं भवति अनर्थकम्। यथा-

5) "पूरणार्थमनर्थकम्"।

पूरणमात्रप्रयोजनमव्ययपदमनर्थकम्। यथा-

"उदितस्तु हास्तिकविनीलमयं तिमिरं निपीय किरणैः सविता"।। अत्र "तु' शब्दस्य पादपूरणार्थमेव प्रयोगः। न तु वाक्यालङ्कारार्थम्।

**पदार्थदोषाः**

वामनेन काव्यालङ्कारसूत्रे पददोषान् प्रतिपाद्य पदार्थदोषा: प्रतिपादिता: सन्ति। यथा-
"अन्यार्थनेयगूढार्थाश्लीलक्लिष्टानि च"।।

अन्यार्थम्, नेयार्थम्, गूढार्थम्, अश्लीलम्, क्लिष्टं चेति पञ्च पदार्थदोषाणि सन्ति। एतानि क्रमेण व्याख्यातानि। प्रथमं भवति अन्यार्थम्। यथा-

1) "रूढिच्युतमन्यार्थम्"।।

रूढि: इत्युक्ते प्रसिद्धि: इत्यर्थ: । तत: च्युतं रूढिच्युतम्। रूढेषु पदेषु रूढिमनादृत्य यौगिकार्थे यत् प्रयुज्यते, तदन्यार्थम् पदम्। यथा-

"ते दु:खमुच्चावचमावहन्ति ये प्रस्मरन्ति प्रियसङ्गमानाम्"।।

अत्र आवहन्ति, प्रस्मरन्ति इति पदद्वयं क्रमेण धारयति, स्मरन्ति इति यौगिकार्थे प्रयुज्यते। पदयो: रूढ्यर्थौ भवत: करोति, विस्मरन्ति च। अनेन प्रस्तुतप्रयोगा: अन्यार्थका: भवन्ति। द्वितीयं भवति नेयार्थम्। यथा-

2) "कल्पितार्थं नेयार्थम्"।।

अश्रौतस्याप्युन्नेयस्य पदार्थस्य कल्पनात् कल्पितार्थं नेयार्थम्। यथा-

"सपदि पङ्क्तिविहङ्गमनामभृत्तनयसंवलितं बलशालिना।
विपुलपर्वतवर्षि शितै: शरै: प्लवगसैन्यमुलूकजिता जितम्"।।

अत्र पङ्क्तिविहङ्गनामभृद् इति शब्देन दशरथ: तथा उलूकजिता इति पदेन इन्द्रजिता इत्यर्थो: कल्पितार्थो: सन्ति। अत: अनयो: पदयो: नेयार्थमिति दोष:। तृतीय: पदार्थदोष: भवति गूढार्थम्। यथा-

3)"अप्रसिद्धार्थप्रयुक्तं गूढार्थम्"।।

यस्य पदस्य लोके अर्थ: प्रसिद्ध: अप्रसिद्ध: च तदप्रसिद्धे अर्थे प्रयुक्तं तद् गूढार्थं भवति। यथा-

"सहस्रगोरिवानीकं दुस्सहं भवत: परै:" ।।

सहस्रं गाव: अक्षीणि यस्य स: सहस्रगु:। सहस्रगु: इत्युक्ते इन्द्र: इत्यर्थ:। अत्र "गोशब्दस्य' अक्षिवाचित्वं कविषु अप्रसिद्धमिति । अत: पदस्यास्य गूढार्थमिति दोष:। चतुर्थ: पदार्थदोष: भवति अश्लीलम्। यथा-

4)"असभ्यार्थान्तरमसभ्यस्मृतिहेतुश्चाश्लीलम्"।।

यस्य पदस्य अनेकार्थस्य एको अर्थः असभ्यः स्यात् तदसभ्यार्थान्तरम्। यथा- "वर्चः' इति पदस्य तेजः, विष्ठा इत्यर्थद्वयमस्ति। अत्र "विष्ठा' इति पदम् अश्लीलम् भवति, अतः अश्लीलम् इति दोषः। यत्तु पदं सभ्यार्थवाचकमपि एकदेशद्वारेण असभ्यार्थं स्मारयति तदसभ्यस्मृतिहेतुः। यथा "कृकाटिका' इति। "प्रेतयानं खटिः काटीरिति शवयानपर्यायत्वेन अभिधानात् कर्णापरभागवाचकमपि कृकाटिकापदं काटीत्येकदेशेन असभ्यार्थस्मृतिहेतुः इति अश्लीलम् इत्यभिप्रायः। पञ्चमः पदार्थदोषः भवति क्लिष्टम्। यथा-

5) "व्यवहितार्थप्रत्ययं क्लिष्टम्"।।

अर्थस्य प्रतीतिः अर्थप्रत्ययः। सः व्यवहितः यस्मात् भवति तद् व्यवहितार्थप्रत्ययं क्लिष्टम्। यथा-

"दक्षात्मजादयितवल्लभवेदिकानां ज्योत्स्नाजुषां जललवास्तरलं पतन्ति"।

दक्षात्मजाः ताराः। तासां दयितो दक्षात्मजादयितः, चन्द्रः इत्यर्थः। तस्य वल्लभाः, चन्द्रकान्ताः इत्यर्थः। अत्र हि व्यवधानेन अर्थप्रत्ययः। अर्थात् विलम्बेन अर्थाभिधायकं क्लिष्टम्।

**उपसंहारः-** अत्र वामनमते बहूनि उदाहरणानि सन्ति तथापि स्थलाभावात् केचन उदाहरणान्येव मया अत्र प्रदर्शितानि।

# व्याप्तिपञ्चलक्षण्यां प्रथमलक्षणे साध्याभाववत्तासम्बन्धविचारः

**वि.वि.एस्.आर्. लक्ष्मीः, शोधच्छात्रा, राष्ट्रियसंस्कृतविद्यापीठम्**

**उपोद्घातः—**

न्यायशास्त्रे प्रमाणचतुष्टयं वर्तते। तदुक्तं सूत्रे – **प्रत्यक्षानुमानोपमानशब्दाः प्रमाणनि।**[1] इति। तेषु नैय्यायिकैः अनुमानप्रमाणस्य प्रामुख्यमङ्गीक्रीयते। **प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्क-रसिकाः**[2] इत्यनेन एतद् ज्ञायते च। अनुमानं नाम **अनुमिति करणम्**[3]**। असाधारणं कारणं करणम्।**[4] अनुमितिं प्रति व्याप्तिज्ञानं करणम् भवति। तदुक्तं करणं व्याप्तिधीः भवेत् इत्यनेन। तथा चानुमिति-हेतुभूतव्याप्तिज्ञाने का व्याप्तिरिति जिज्ञासायां मणिकारैः पूर्वपक्षव्याप्तेः पञ्चलक्षणानि अगादिषत। तत्र पञ्चलक्षणेषु अन्यतमं प्रथमं च लक्षणं भवति—**साध्याभाववद-वृत्तित्वम्** इति।

**साध्याभाववदवृत्तित्वम्**[5] व्याप्तिः। तथा च साध्याभावनिष्ठाधेयता-निरूपिताधिकरणतावन्निरूपितवृत्तित्वाभावः व्याप्तिः इति फलति। **पर्वतो वह्निमान् धूमात्** इत्यत्र लक्षणसमन्वयः— तथा हि- साध्यो वह्निः, साध्याभावः वह्न्यभावः, तन्निष्ठाधेयतानिरूपिताधिकरणं जलह्रदः, तन्निरूपितवृत्तित्वं मीनशैवालादौ, तदभावः धूमे वर्तते इति लक्षणसमन्वयः।

**धूमवान् वह्नेः** इत्यत्र नातिव्याप्तिः। तथा हि, साध्याभावः धूमाभावः, तन्निष्ठाधेयतानिरूपिताधिकरणं तप्तायोगोलकम्, तन्निरूपित-वृत्तित्वमेव वह्नौ इति नातिव्याप्तिः।

**ननु तथापि गुणत्ववान् ज्ञानत्वात्, सत्तावान् जातेरित्यादौ विषयित्वाव्याप्यत्वादि-**

[1] न्या. भा. सू. सं. 3, पृ. 17

[2] प. प्र. पृ. 55,56

[3] त. सं. पृ. 87

[4] त. सं. पृ. 68

[5] न्या. सि. मु. पृ. 218

**सम्बन्धेन तादृशसाध्याभाववति ज्ञानादौ ज्ञानत्वादे-र्वर्तमानत्वादव्याप्तिरिति मथुरानाथेनोक्तम्[6]।**

ननु साध्याभावनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितवृत्तित्वाभावः व्याप्तिः इति कथने **गुणत्ववान् ज्ञानत्वात्** इत्यत्राव्याप्तिः। तथा हि, साध्याभावः गुणत्वाभावः, विषयितासम्बन्धेन तन्निष्ठाधेयतानिरूपिताधिकरणं ज्ञानम्, तन्निरूपितवृत्तित्वमेव ज्ञानत्वे वर्तते इत्यव्याप्तिः। एवं **सत्तावान् जातेः** इत्यत्राव्याप्तिः। तथा हि, साध्याभावः सत्ताभावः, तन्निष्ठाव्याप्यत्वात्मकस्वाभाववद्वृत्तित्वसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावद्ज्ञाननिरूपितवृत्तित्वमेव जातौ वर्तते इति अव्याप्तिः। तथा हि- स्वं सत्ताभावः, स्वाभावः सत्ताभावाभावः सत्तात्मकः, तदधिकरणमात्मा, तन्निरूपितवृत्तित्वं ज्ञाने वर्तते इति भावः।

**अत्रेयमाशङ्का— ननु वह्निमान् धूमादित्यादौ कालिकादिसम्बन्धेन वह्निसामान्याभाववति पर्वतादौ धूमस्य वृत्तेरव्याप्तिसम्भवे तत्परित्यागे बीजाभावेति चेन्न।**

ननु यत्किञ्चित्सम्बन्धेन साध्याभावनिष्ठाधेयतायाः विवक्षणे, **पर्वतो वह्निमान् धूमात्** इति प्रसिद्धस्थले एवाव्याप्तिसम्भवे, **गुणत्ववान् ज्ञानत्वात्** इति स्थले अव्याप्तिकथनमयुक्तम्। पर्वतो वह्निमान् धूमात् इत्यत्राव्याप्तिप्रकारस्तु—कालिकसम्बन्धेन वह्न्यभावनिष्ठाधेयतानिरूपिताधिकरणं पर्वतः अपि भवति, तन्निरूपितवृत्तित्वमेव धूमे वर्तते इति तत्परित्यागः अयुक्तः इति चेन्न।

**कालिकविशेषणतासम्बन्धेन साध्याभावादेरव्याप्यवृत्तितया, विवक्षणीयनिरवच्छिन्नाधिकरणत्वाप्रसिद्ध्या तत्सम्बन्धावच्छिन्नाधिकरणताया धर्तुमशक्यत्वादव्याप्त्यसम्भवात्।**

अग्रे **कपिसंयोगी एतद्वृक्षत्वात्** इत्यत्राव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिवारणाय साध्याभावनिष्ठाधेयतानिरूपिताधिकरणतायां निरवच्छिन्नत्वं विवक्ष्यते। तथा च प्रकृते कालिकसम्बन्धेन वह्न्यभावनिष्ठाधेयतानिरूपितनिरवच्छिन्नाधिकरणं पर्वतः न भवति। तथा हि- यथा संयोगसम्बन्धेन वह्न्यादेः पर्वतादौ एकदेशे सत्त्वेपि, एकदेशे तदभावः। अतएव संयोगसम्बन्धेन द्रव्यादेः अव्याप्यवृत्तित्वं, तथैव कस्मिंश्चित्काले पर्वतादिषु कालिकसम्बन्धेन वह्न्यभावः, अन्यकालेषु तदभावः इति कालिकेनापि द्रव्यादीनामव्याप्यवृत्तित्वात् कालिकसम्बन्धावच्छिन्नाधेयतानिरूपितनिरवच्छिन्ना-

[6] मा. व्या. प. पृ. 14

धिकरणता न प्रसिद्ध्यतीति भावः। एवञ्च तादृशाधिकरणाप्रसिद्ध्या कालिकसम्बन्धावच्छिन्नवह्न्यभावाधिकरणतायाः धर्तुमशक्यत्वादव्याप्तिः न सम्भवति। अतः **गुणत्ववान् ज्ञानत्वात्** इति स्थलानुधावनम्। अत्र तु विषयितासम्बन्धेन गुणत्वाभावनिष्ठाधेयतानिरूपितनिरवच्छिन्नाधिकरणं ज्ञानम्, तन्निरूपितवृत्तित्वमेव ज्ञानत्वे इत्यव्याप्तिः।

**एतेन जन्यमात्रस्य कालोपाधित्वस्य मूर्तमात्रस्य दिगुपाधित्वस्य चास्वीकारात्तेन सम्बन्धेन साध्याभावाधिकरणतायाः पर्वते असत्त्वे, अव्याप्यत्वसम्बन्धेन वह्न्यभाववति पर्वते हेतोर्वृत्तेरव्याप्तितादावस्थ्यमिति परास्तम्। संयोगेन द्रव्यमात्रस्याव्याप्यवृत्तितया तत्सम्बन्धघटिताव्याप्यत्वसम्बन्धेन निरवच्छिनाधिकरणतायाः अस्वीकारादिति ध्येयम्।**

न च जन्यानां कालोपाधित्वम् इति नियमानङ्गीकारे, कालिकसम्बन्धेन वह्न्यभावाधिकरणं पर्वतः न भवतीत्यव्याप्त्यसम्भवेपि, अव्याप्यत्वात्मकस्वाभाववद्वृत्तित्वसम्बन्धेन वह्न्यभावाधिकरणं पर्वतः भवति, तथा हि- स्वं वह्न्यभावः, स्वाभावः वह्न्यभावाभावः वह्न्यात्मकः, संयोगेन तदधिकरणं पर्वतः, तद्वृत्तित्वं तादात्म्येन पर्वतवृत्तित्वं पर्वते भवति, एवञ्च स्वाभाववद्वृत्तित्वसम्बन्धेन वह्न्यभावाधिकरणं पर्वतः, तद्वृत्तित्वमेव धूमे इत्यव्याप्तिरिति वाच्यम्। अग्रे निरवच्छिन्नाधिकरणत्वविवक्षणेन, संयोगेन द्रव्यमात्रस्याव्याप्यवृत्तितया, संयोगसम्बन्धघटिताव्याप्यत्वसम्बन्धस्यापि अव्याप्यवृत्तितया, तेन सम्बन्धेन वह्न्यभावनिष्ठाधेयतानिरूपितनिरवच्छिन्नाधिकरणतायाः अप्रसिद्ध्याव्याप्त्यसम्भवः। अत्र **गुणत्ववान् ज्ञानत्वात्** इत्यस्मिन्स्थले अव्याप्यत्वसम्बन्धः नाव्याप्यवृत्तिः। तथा हि- स्वं गुणत्वाभावः, स्वाभावः गुणत्वाभावाभावः गुणत्वात्मकः, समवायेन तदधिकरणं ज्ञानात्मकगुणः, तादात्म्येन तद्वृत्तित्वं ज्ञाने इति स्वाभाववद्वृत्तित्वसम्बन्धेन गुणत्वाभावाधिकरणं ज्ञानम्, तन्निरूपितवृत्तित्वमेव ज्ञानत्वे इत्यव्याप्तिः। अत्राव्याप्यत्वसम्बन्धे संयोगस्याप्रवेशात् न कापि क्षतिः।

**अत्र गुणत्ववान् ज्ञानत्वात् इत्यादौ विषयितासम्बन्धेनाधिकरणत्वास्वीकारेण लक्षणेधिकरणत्वप्रवेशाद् दोषाभावात्, वत्त्यनियामकसम्बन्धेन व्याप्यव्यापकभावास्वीकारात्। वृत्त्यनियामकसम्बन्धावच्छिन्नप्रतियोगिताकत्वास्वीकाराद्वा, तत्स्थले सत्तावान् जातेरिति स्थलानुधावनं कृतं मथुरानाथेनेति ध्येयम्।**

न च साध्याभावाधिकरणत्वस्य यत्किञ्चित्सम्बन्धेन विवक्षणे **गुणत्ववान् ज्ञानत्वात्** इत्यत्राव्याप्तिः भवतीत्युक्तम्, तत्स्थलं त्यक्त्वा **सत्तावान् जातेः** इति स्थलान्तरानुधावने बीजं किं इति वाच्यम्। **गुणत्ववान् ज्ञानत्वात्** इत्यत्र विषयितासम्बन्धेन गुणत्वाभावाधिकरणं न प्रसिद्ध्यति, यतः विषयितासम्बन्धस्य वृत्त्यनियामकत्वात्, वृत्त्यनियामकसम्बन्धेन अधिकरणं न प्रसिद्ध्यति। तथा चात्र स्वरूपसम्बन्धेन गुणत्वाभावाधिकरणं द्रव्यम्, तन्निरूपितवृत्तित्वाभावः ज्ञानत्वे इत्यत्राव्याप्तिः न भवतीति सत्तावान् जातेः इत्यत्राव्याप्तिर्कथिता मथुरानाथतर्कवागीशैः।

**ननु तत्राप्यव्याप्यत्वसम्बन्धेन साध्याभाववति हेतोः वृत्तेरव्याप्तिः संभवतीति चेन्न। ज्ञाने गुणत्वाभावाभाववत्समवेतत्वाप्रसिद्ध्या, तन्निरूपिततादात्म्यसम्बन्धावच्छिन्नवृत्तितायाः तादात्म्यस्वरूपत्वाद्वृत्त्यनियामकसम्बन्धघटिताव्याप्यत्वसम्बन्धस्यापि वृत्त्यनियामकतया तेन सम्बन्धेनाधिकरणत्वाप्रसिद्ध्या अव्याप्त्यभावादिति विभावनीयम्।**

न च सत्तावान् जातेः इत्यत्राव्याप्यत्वसम्बन्धेन सत्ताभावाधिकरणमादाय याव्याप्तिः दर्शिता, तद्वदेव **गुणत्ववान् ज्ञानत्वात्** इत्यत्रापि अव्याप्यत्वसम्बन्धेन गुणत्वाभावाधिकरणं ज्ञानं भवति, तन्निरूपितवृत्तित्वमेव ज्ञानत्वे इत्यव्याप्तिर्वक्तुं शक्यते इति वाच्यम्। गुणत्ववान् ज्ञानत्वात् इत्यत्राव्याप्यत्वसम्बन्धः अव्याप्यवृत्तित्वघटितः। तथा हि- स्वं गुणत्वाभावः, स्वाभावः गुणत्वाभावाभावः गुणत्वात्मकः, समवायेन तदधिकरणं ज्ञानात्मकगुणः, तद्वृत्तित्वं समवायेन ज्ञाने न भवति, अपि तु तादात्म्येन ज्ञाने भवतीत्येव वक्तव्यः। एवञ्च तादात्म्यस्य वृत्त्यनियामकतया, तत्सम्बन्धघटिताव्याप्यत्वसम्बन्धस्यापि वृत्त्यनियामकतया, तेन सम्बन्धेन गुणत्वाभावाधिकरणमादाय अव्याप्तिः न सम्भवति। **सत्तावान् जातेरि**त्यत्र तु स्वाभाववद्वृत्तित्वसम्बन्धेन सत्ताभावाधिकरणं ज्ञानम्। तथा हि- स्वं सत्ताभावः, स्वाभावः सत्ताभावाभावः सत्तात्मकः, तदधिकरणमात्मा, तन्निरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वं ज्ञाने भवतीति तादृशसम्बन्धेन सत्ताभावाधिकरणं ज्ञानम्, तन्निरूपितवृत्तित्वमेव जातावित्यव्याप्तिः। अत्राव्याप्तिवारणाय **साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तिसाध्यसामान्यीय**

**प्रतियोगितावच्छेदकसम्बन्धेन साध्याभावाधिकरणत्वं वक्तव्यम्।**[7] अर्थात् साध्याभावनिष्ठाधेयतायां साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तिसाध्य-सामान्यीयप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वं विवक्षणीयम्। तथा च **साध्यता-वच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तिसाध्य सामान्यीयप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नसाध्याभावनिष्ठाधेयतानिरूपिताधिकरण तावन्निरूपितवृत्तित्वाभावः व्याप्तिः** इति फलति।

प्रथमतः **पर्वतो वह्निमान् धूमात्** इत्यत्र समन्वयः। तथा हि- संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकाभाववृत्तिवह्न्यत्मकवह्न्यभावाभावनिरूपितप्रतियोगिताव-च्छेदकसम्बन्धःस्वरूपसम्बन्धः, तेन सम्बन्धेन लक्षणघटकसाध्याभावाधिकरणं जलह्रदः, तन्निरूपितवृत्तित्वं मीनशैवालादौ, वृत्तित्वाभावः धूमे इति समन्वयः।

एवं **सत्तावान् जातेः** इत्यत्र नाव्याप्तिः। तथा हि- साध्यतावच्छेदकसम्बन्धा-वच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकः यः साध्याभावः सत्तात्वा-वच्छिन्नप्रतियोगिताकाभावः, तन्निष्ठा या साध्यसामान्यीयप्रतियोगिता सत्ता-त्मकसत्ताभावाभावनिरूपिता सत्ताभावनिष्ठा प्रतियोगिता, तदवच्छेदकसम्बन्धः स्वरूपसम्बन्धः, तेन सम्बन्धेन लक्षणघटकसाध्याभावाधिकरणं सामान्यादिकं, तन्निरूपितवृत्तित्वाभावः जाताविति नाव्याप्तिः। इति शम्।

## परिशीलितग्रन्थसूची-


श्रीमदन्नम्भट्टविरचितः **तर्कसङ्ग्रहः**

श्रीविश्वनाथपञ्चाननभट्टाचार्यप्रणीता **न्यायसिद्धान्तमुक्तावली**

श्री जगदीशतर्कालङ्कारकृतम् **पक्षताप्रकरणम्**

**न्यायभाष्यम्**

**माथुरीव्याप्तिपञ्चकम्** - डा. ओरुगन्टि श्रीरामलालशर्मा।


[7] मा. व्या. प. पृ. 16

# व्याकरणशास्त्रे विकल्पसूत्रस्य उपयोगः

**श्रीमती. जि.वि.लक्ष्मी कीर्तिसुधा**

वैयाकरणप्रमेयनिरूपणे बहूनि शास्त्राणि अत्यन्तमुपकारकाणि वर्तन्ते, तत्र अन्यतमं दर्शनं योगदर्शनम्, यस्य कर्ता वैयाकरणसिद्धान्तप्रवर्तकः महाभाष्यकर्ता सहस्रफणामण्डितः आदिशेषावतारभूतः भगवान् पतञ्जलिः। तत्र गुरुपरम्परागतः श्लोकोऽयं प्रमाणम् -

आबाहुपुरुषाकारं शङ्खचक्रासिधारिणम्।
सहस्रशिरसं श्वेतं पतञ्जलिमुपास्महे॥ इति।

**योगश्चित्तवृत्तिनिरोधः**(यो.सू.1-2) इति योगस्य लक्षणं प्रतिपादितं योगसूत्रकारेण भगवता पतञ्जलिना। दर्शनेऽस्मिन् पञ्चचित्तवृत्तयः (प्रमाणम्- विपर्ययः- विकल्पः- निद्रा- स्मृतिश्चेति) सन्ति। तेषु तृतीया चित्तवृत्तिरस्ति विकल्पः।

व्याकरणशास्त्रे **वा-विभाषादिशब्देन** विकल्पः उच्यते। उद्देश्यतावच्छेदकावच्छिन्ने लक्ष्ये शास्त्रप्रवृत्ति-तदभावयोः विकल्पशब्देन व्यवहारः। अतः व्याकरणशास्त्रे उपयुज्यमानस्य विकल्पशब्दस्य योगदर्शनस्थस्य विकल्पशब्दस्य च न समानार्थता। परन्तु व्याकरणशास्त्रे प्रयुक्तस्य व्यपदेशिवद्भावस्य सादृश्यम् योगदर्शनोक्तेन विकल्पेन[1] भवितुमर्हतीति वक्तुं शक्यते। **शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः** (यो.सू. 1-9) इति हि भगवत्पतञ्जल्युक्तं विकल्पसूत्रम्।

तस्यायमर्थः – शब्दश्च तज्जन्यज्ञानञ्च शब्दज्ञानम्, ते अनुपातिनी यस्य सः शब्दानुपाती इति द्वन्द्वगर्भितबहुव्रीहिसमासः। शब्दज्ञानजन्यो बाह्यवस्तुशून्यो विकल्प इति सूत्रार्थः।

बाह्यवस्तुशून्यो अन्तःकरणवृत्तिविशेषो बाधाबाधकालाविशेषेण सदैव जायमानो विकल्पः भवति बौद्धपदार्थाङ्गीकारेणैव इत्याशयः। वैयाकरणराद्धान्तभूते बौद्धार्थे निरूपणीये सूत्रमिदं जीवातुभूतमित्यत्र विप्रतिपत्तिगन्धोऽपि नेति निश्चप्रचम्।

---

[1] ईदूदेद् द्विवचनं प्रगृह्यम्(पा.1.1.11), आद्यन्तवदेकस्मिन्(पा.1.1.21) इत्यादि सूत्रभाष्ये व्यपदेशिवद्भावः दृश्यते। व्यपदेशी- निमित्तसद्भावाद्विशिष्टोऽपदेशः - मुख्यो व्यवहारो यस्यास्ति स व्यपदेशी इति। तद्वत् असहायेऽपि शास्त्रप्रवृत्तिः, यथा लोके राहोः शिर इत्यादौ।

**तस्य चायं सन्दर्भः -**

योग्यताज्ञानं न शाब्दबोधे स्वातन्त्र्येण कारणम्, न वा अयोग्यत्वनिश्चयः शाब्दबोधप्रतिबन्धकः, किन्तु परस्परान्वयविरोधदर्शक एव तेन अप्रमात्वनिश्चयात् न प्रवृत्तिरिति निरूपणे कौण्डभट्टनागेशप्रभृतयः महावैयाकरणाः मुनित्रयवचनप्रामाण्य-स्थापनतत्पराः भगवतः पतञ्जलेः महाभाष्यनिगूढार्थप्रतिपादकाः सन्तः तत्प्रसङ्गात् योग्यताज्ञानस्य शाब्दबोधकारणत्वमिति परमतखण्डनवेलायां प्रकृतं सूत्रं प्रमाणीचक्रुः।

**शाब्दबोधविषये तन्त्रान्तरीयाणां मतिः -**

जलेन सिञ्चतीत्यादौ सेचनं स्वनिरूपितकारणतासम्बन्धेन जले, जलञ्च स्वनिष्ठकारणतानिरूपकत्वसम्बन्धेन सेचने चान्वेतीति तदभावाभावात् योग्यतायाः सत्त्वात् शाब्दबोधः भवति अर्थाबाधात्। वह्निना सिञ्चतीत्यादौ तु वह्नेः सेकक्रियान्वयरूपार्थबाध एवेति एतादृशस्थले अन्वयबोधः न भवति किन्तु पदार्थोपस्थितिमात्रमेव इति न शाब्दबोध इति नैयायिकादयः वदन्ति।

**वैयाकरणमतम् –**

वैयाकरणानां मते बौद्ध एवार्थः अतः पदार्थज्ञाने प्रतिबन्धः न वर्तत एव। इदं **हेतुमति च** (पा.3.1.26) इत्यादि सूत्रभाष्ये स्पष्टम्। तत्र हि- **इह कथं वर्तमानकालता कंसं घातयति, बलिं बन्धयति इति चिरहते च कंसे चिरबद्धे च बलौ? अत्रापि युक्तैव। कथम् ये तावदेते शौभिका नाम, एते प्रत्यक्षं कंसं घातयन्ति, प्रत्यक्षञ्च बलिं बन्धयन्ति। चित्रेषु कथम्? चित्रेष्वप्युद्गूर्णनिपतिताश्च प्रहारा दृश्यन्ते कंसस्य च कृष्णस्य च। ग्रन्थिकेषु कथम्, यत्र शब्दग्रन्थनमात्रं लक्ष्यते? तेऽपि हि तेषामुत्पत्तिप्रभृत्याविनाशात् तदृद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ति** इत्युक्तम्। अतः शाब्दबोधे बाधज्ञानस्याप्रतिबन्धकत्वम्। अत एव वह्निना सिञ्चेत्युक्ते अद्रवेण वह्निना कथं सेकं ब्रवीषीति उपहासः सङ्गच्छते, अन्यथा बोधानापत्तौ तु वाक्यार्थज्ञानाभावात् उपहाससङ्गतिः कथं सङ्गच्छेत।

तदुक्तम् खण्डनकारादिभिः –

अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि।
प्रमाबाध्याऽप्रमा तत्र ह्यतः प्रामाण्यनिर्णयः॥ इति।

तस्यायमर्थः – बाधितत्वेन निर्धारितेऽपि विषये शब्दः ज्ञानं जनयत्येव। तत्र प्रवृत्त्यापत्तिस्तु नेति

द्वितीयार्धेन सूचयति – बाधितेऽर्थे अप्रमात्वनिश्चयात् तत्र न प्रवर्तत एव, अप्रमात्मिकैव शाब्दबुद्धिस्तत्रेति न दोषः, अत एव अङ्गुल्यग्रे करिशतं विहरति मम कर्णकुहरं प्रविश्य सिंहः क्रीडति इत्यादयः प्रयोगाः स्वरसतः सङ्गच्छन्ते। अतः बाधनिश्चयः न शाब्दबोधे प्रतिबन्धकः अन्यथा -

एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।
मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः॥

इत्यादितः बोधानापत्तेः।

अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः सङ्ख्यया
प्रज्ञाचक्षुरवेक्ष्यमाणबधिरश्रव्याः किलाकीर्तयः।
गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरान्
मूकानां प्रकरेण कूर्मरमणीदुग्धोदधे रोधसि॥

इति। अयं श्लोकः श्रीहर्षविरचिते नैषधीये द्वादशे सर्गे षडुत्तरशततमः। दमयन्तीस्वयंवरसन्दर्भे मगधाधिपस्य कीकटस्वामिनामकस्य वर्णनसन्दर्भे अयं श्लोकः। श्लोकस्य भावोऽयम् – अस्य भूपतेः अकीर्तयः कूर्मरमण्याः कच्छप्याः उत्पन्नं यद्दुग्धं तन्मयः यस्समुद्रः तस्य तीरे गीयन्ते। कीदृशास्ता अकीर्तय इति वर्णयति – परार्धादपि परया सङ्ख्यया गणिताः, परार्धसंख्येति गणिते अत्युत्तमा संख्या, यस्याः परा संख्या नास्ति। प्रज्ञाचक्षुभिः-जात्यन्धैः दृश्यमानाः तेषां प्रत्यक्षविषयाः। एतादृशाश्चाकीर्तयः निषादादिसप्तस्वरातिरिक्तमष्टमं स्वरं स्वीकुर्वता वन्ध्यायाः जातेन मूकानां समूहेन अष्टमस्वरेण गीयन्त इति। अर्थबाधनिश्चयस्य शाब्दबोधप्रतिबन्धकत्वे अस्मात् श्लोकात् बोधो न स्यात् अर्थबाधात्, अस्य भूभृतः कीर्तयः न सन्तीत्यादिध्वनिरूपचमत्कारानापत्तिश्च इत्यादिविस्तरेण वैयाकरणभूषणे मञ्जूषादौ च सविस्तरं कौण्डभट्टादिभिः सुनिरूपितम् वर्तते।

अतः अर्थः बौद्ध एव ज्ञानविषयः शक्तिग्रहविषयश्च स एव शक्यः अत एव वन्ध्यासुतादिषु अर्थवत्सूत्रेणैव प्रातिपदिकत्वम् अन्यथा गवित्ययमाह इत्यादाविव

समासग्रहणकृतनियमात् प्रातिपदिकत्वं न स्यात्। अत एव शशशृङ्गादिपदेभ्यः बोधः सर्वसिद्धः सङ्गच्छते।

अत्र **वाक्यपदीय**कारः परमं प्रमाणम् -

अर्थभागैस्तथा तेषामन्तरोऽर्थः प्रकाशते।
एकस्यैवात्मनो भेदौ शब्दार्थावपृथक्स्थितौ॥ (वा.प. द्वि.का. 31)

अतः स्फोटः आन्तरः वर्णैरभिव्यज्यते इति वैयाकरणकुलसिद्धान्तसङ्गतिः। अत एव अथ गौरित्यत्र कः शब्दः इत्यारभ्य येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययः भवति सः शब्दः इत्यादि महाभाष्ये पस्पाशाह्निके कृतं वाकोवाक्यं सङ्गच्छते। भगवान् पतञ्जलिः योगदर्शने विकल्पसूत्रे अर्थस्य वैकल्पिकत्वमुपदिदेश, तेन अर्थः सर्वोऽपि विकल्प एव तेनैव गगनकुसुमादिशब्दाः अप्रमात्मकं ज्ञानं जनयन्तीति सिद्धम्। एतादृशैरेव सिद्धान्तैः समानैः भगवान् पतञ्जलिरेक एव योगदर्शनं व्याकरणशास्त्रञ्च प्रवर्तयाम्बभूवेति स्पष्टं निर्धारयितुं शक्यते। अत एव चरकसंहितायाः सुप्रसिद्धव्याख्याता चक्रिपाणिदत्तः एवं लिलेख –

पातञ्जलमहाभाष्यचरकप्रतिसंस्कृतैः।
मनोवाक्कायदोषाणां हन्त्रेऽहिपतये नमः॥ इति

अत्र अहिपतिः – सर्पराजः स च सहस्रफणायुतः पतञ्जलिरेव। अत एव पूर्वाचार्यैरुपदिष्टः गुरुपरम्परागतः प्रणामः सङ्गच्छते –

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥ इति

अनेन योगदर्शनकर्ता व्याकरणमहाभाष्यकर्ता च एकः न इत्यादयः प्रवादाः समूलं नाशिताः भवन्ति।

भगवान् पतञ्जलिः समेषां वाक्शुद्ध्यर्थं व्याकरणमुपदिश्य वैयाकरणेभ्यः अध्यात्ममार्गोपदेशाय योगशास्त्रमपि चकारेति निश्चप्रचम्।

एवमिदं योगदर्शनं व्याकरणशास्त्रस्यात्यन्तमुपकारकमिति स्थालीपुलाकन्यायेन प्रदर्शितमिति शम्।

# अद्वैतशास्त्रे कर्मणएव वन्ध-मोक्षकारणत्वं कर्मयोगस्य च नैतिकमूल्याङ्कनम्

मृत्युञ्जयचक्रबर्ति, शोधच्छात्रः

## उपोद्घातः

औपनिषदिके चिन्तने उत्तरमीमांसाविचारसन्दर्भे वा विचारितेषु अथवा विचार्यविषयेषु कर्मतत्त्वमतीव महत्वपूर्णं तत्त्वम्। प्रायःसर्वासूपनिषत्सु श्रीमद्भगवद्गीतायां ब्रह्मसूत्रे तद्भाष्ये च सविस्तरमालोचितमिदं तत्त्वम्। वेदचतुष्टयस्य कर्मकाण्डोक्तसिद्धान्तं परित्यज्य ज्ञानकाण्डे स्वीकृते सति कुतः तावदालोच्यमानविषयत्वेन वेदान्ते कर्मणः स्वीकारः इति संशयः।

मीमांसाशास्त्रे कर्म नाम यज्ञदानादिकम्। परन्तु वेदान्तशास्त्रे कर्मविषये बहुत्र बहुधा चर्चा कृता। सामान्यतः कर्म नाम जीवव्यवहारः। स च व्यवहारः आविद्यकः। अस्य विभागोऽपि बहुधा कृतास्ति। यथा नित्य-नैमित्तिकादयः, गीतायां पुनः कर्माकर्म-विकर्मादिभेदः दृश्यते। इतोऽपि वेदान्तनये सञ्चितारब्धसञ्चियमानानि त्रिणि कर्माणि श्रूयते। कुत्रचित् सदा कर्मकरणाय उपदेशः विद्यते कुर्वन्नेवेहेत्यादिश्रुत्या। कुत्रचित् चोच्यते कर्म अविद्याजन्यं संसारबन्धहेतुः । पुनः उच्यते कर्मन्यैव हि संसिद्धिमास्थिता जनकादयः। इति। वस्तुतः सत्यमेव यद्गीतं गीतायां – **किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिता** इति। कर्म सर्वैः अनुष्ठीयते। इदानीं साधुकर्माचरणमपि संसारहेतुः इत्यपि उच्यते शास्त्रे- उच्यते नाभुक्तं क्षीयते कर्म , परन्तु तथा चेत् भगवता कथमुक्तं न मे कर्माणि लिम्पन्ति इति।एवं कुत्रचित् उच्यते कर्मणः फलमवश्यं भोक्तव्यमेव, कैश्चित् पुनः कर्म क्रियते चेदपि फलभोगः न भवति। सामान्यतः कर्म एव पुनर्जन्म प्रति कारणम्। कुत्रचित् पुनः कर्म एव संसारचक्रं नाशयति। वस्तुतः सत्यमेव यदुक्तं गीतायाम् -**गहना कर्मणो गतिः**। इति। प्रबन्धेतदेव तत्त्वं यथाशास्त्रं निरूप्यते।

## कर्मस्वरूपम्

क्रियते इति कर्म। अनेन क्रियाव्यापारविशेषं बोधयति। प्रायः सर्वेष्वेव शास्त्रेषु कर्मस्वरूपं स्वस्वप्रस्थानानुसारेण प्रतिपादितम्। तथा च विविधशुभाशुभ-फलजनकत्वेन सर्वानर्थकारणम् संसारवीजम् कर्म इति दार्शनिकानां निश्चयः। किं कर्म पुरुषोत्तम इति जिज्ञासिते सति भगवता उपदिष्टं यत् **भूतभावोद्भवकरं विसर्गो कर्मसंज्ञित** इति। अस्य मर्मार्थो हि परार्थे क्रियमाणं कर्म। तच्च त्यागः विसर्गो वा।

त्यागः कः इति चेदुच्यते गीतायां –**सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः**। वस्तुतः स एव यज्ञपदवाच्यः। तदपि द्रव्ययज्ञस्तपो यज्ञः ज्ञानयज्ञादिभेदेन विविधः। तादृशं कर्म न त्याज्यमपि तु कर्तव्यमित्युक्तं गीतायां। कर्मपदेन ईस्वरार्पनबुद्ध्या आचरितं कर्मयोगमित्यपि आचक्षन्ति केचन। औपनिषदिकचेतनायां कर्मतत्त्वम् महद्गुरुत्वम् आवहति। प्रायः सर्वासु एव उपनिषत्सु तत्त्वं बोधयितुं कर्मरहस्यमुच्चारितम्। प्रारब्दं यत् कर्म तत् कुत्रचित् दैवमिति भाग्यमिति अदृष्टमिति वा नाम्ना अभिधीयते। तस्यैव कर्मणः महत्त्वमुररीकृत्य छान्दोग्योपनिषदि –**तस्य तावदेव चिरं यावन्न विमोक्षे अथ सम्पत्स्ये**। इति। अनेन ज्ञायते यत् मुमुक्षु जीवन्मुक्ताद्यवस्थासु प्रारब्धक्षयार्थमेव जीवति। तस्य कर्तव्यान्तरं नावशिष्यते। तथा च न्यायप्रस्थाने भगवता व्यासेन - **भोगेन त्वितरे क्षपयित्वा सम्पद्यते**। इति। मोक्षानन्तरं नैव कर्मणामवशेषः। तथा हि उच्यते भगवता शङ्कराचार्येण –**मिथ्याज्ञानावष्टम्भं हि कर्मान्तरं देहपात उपभोगानन्तरमारभते, तच्च मिथ्याज्ञानं सम्यग्ज्ञानेन दग्धमित्यतः साध्वेतदारब्धकार्यक्षये विदुषः कैवल्यमवश्यं भवतीति।**

<u>**कर्मणः विभागः**</u>

कर्म हि विहितं प्रतिषिद्धञ्चेति द्विविधम्। पुरुषप्रवृत्तिमधिकृत्य यद् वेदेन विधीयते तद्विहितम्। स्वभावसिद्धरागद्वेषादिवशादनुष्ठीयमानास्तु चेष्टारूपाः क्रिया न कर्मणीत्युच्यन्ते। प्रवृत्तिनिवृत्त्यर्थं वेदोक्ता एव क्रिया कर्मणीत्युच्यन्ते, न तु उदासीनक्रियाः सर्वा अपि। तस्माद् द्विप्रकाराण्येव कर्माणि। विहितं कर्म चतुर्विधम्। नित्य-नैमित्तिक-काम्य-प्रायश्चित्तानि इति। मीमांसकास्तु नित्यं नैमित्तिकं काम्यं चेति कर्मणः त्रैविध्यमङ्गीकुर्वन्ति।

मुख्यतः कर्मणः भागद्वयमस्ति। एकं **सकामकर्म** अपरं च **निस्कामकर्म** । द्वयमेव उपनिषदि यथास्थाने प्रतिपादितम्। कर्म एव जीवस्य संसारकारणं, कर्म एव इन्द्रियव्यापारहेतुः किञ्च मोक्षकारणम्। दार्सनिकास्तु **सञ्चित-क्रियमाण-प्रारब्धत्वेन** त्रैविध्यमङ्गीकुर्वन्ति। बहूनि जन्मान्यस्माभिः व्यतीतानि। तत्र कृतकर्मसु कानिचित् संस्काररूपेण **सञ्चितानि** भवन्ति। यतः एकस्मिन् जन्मनि सर्वाणि कर्माणि फलमुत्पादयितुं न शक्नोति। विविधविचित्रकर्मफलभोगाय बहुविधानि जन्मानि आवश्यकानि। यथा कस्यचिद् उत्तमफलभोगाय तावत् ब्राह्मणजन्म आवश्यकम्। असाधुफलभोगाय पुणः कुत्रचित् श्वयोनि शुकरयोनि वा प्रयोजनम्। कस्यचित् वा

कर्मफलभोगार्थं नारीशरीरमपेक्षते तस्मात् नारीजन्म। एवं जाते सति जीवः प्रतिनियतं विविधकर्माणि आचरति। परन्तु तेनानुष्ठितानि कर्मजातानि तस्मिन् एव जन्मनि सर्वं फलं न तस्य भोगाय कल्पते। तस्मात् भुक्तावशिष्टं फलं संस्काररूपेण **सञ्चियमानं** वर्तते।एतत् क्रियमाणं कर्म इत्यपि उच्यते। यतो हि प्रतिक्षणं कर्माणि क्रियन्ते, तदनुसासारञ्च फलानि भुञ्जन्ते। परन्तु तस्मात् कानिचन फलभोगार्थं कालान्तरमपेक्ष्यन्ते, यानि क्रमशः सञ्चिताख्यां लभन्ते।एतानि सञ्चितानि पुनः प्रारब्धरूपेण परिणम्य इह संसारे पुरुषं प्रेरयति तस्य भोगार्थम्। अस्मिन् जन्मनि लब्धमिदं शरीरं भवति **प्रारबधस्य** फलम्। अस्य कर्मत्रयस्य स्वरूपं प्रकटयितुमुदाहरणमेकं दीयते। तद्यथा केनचित् धनुर्धरेण निक्षिप्तं वाणं प्रारब्धकर्मवत्, तद्यथा निवर्तयितुमशक्यं तथा प्ररब्धकर्म अपि। तथा च धनुषि संयोजितं वाणं भवति सञ्चीयमानवत्। एवं तुनीरे वर्तमानाः ईषवः सञ्चितकर्मवत्।

**कर्माकर्मविकर्मस्वरूपम्**

**कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः। अकर्मणश्च बोद्धव्यं गहणा कर्मणो गतिः॥**

इत्यत्र कर्मेति च क्रियमाणेन्द्रियैः कर्माण्यहं करोमीति अध्यात्मनिष्ठतया कृतं कर्मैव **कर्म**। अकर्मेति च कर्तृत्वभोक्तृत्वाद्यहंकारतया बन्धरूपं जन्मादिकारणं नित्यनैमित्तिकतया व्रततपोदानादिषु फलाभिसन्धानं यत्तद् **अकर्म**। विरुद्धं कर्म च **विकर्म**। निषिद्धकर्म इति शब्दकल्पद्रुमः कुल्लुकभट्टश्च।य एवं कर्माकर्मविभागज्ञः कर्मणि देहेन्द्रियादिव्यापारे अकर्म कर्माभावं पश्येद् अकर्मणि च देहेन्द्रियादिव्यापाराभावे यः कर्म पश्यति स बुद्धिमान् पण्डितः मनुष्येषु युक्तः कृत्स्नकर्मकृत् च भवति ।

**कर्म एव बन्धकारणम्,कर्मनाशात् जन्माभावः**

कर्म संसारहेतुः ज्ञानविरोधि ज्ञाननाश्यं च। तदुच्यते –

**कर्म्मणा बध्यते जन्तुर्विद्यया च विमुच्यते।**

**तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः॥** इति ।

प्रारब्धादिषु त्रयेषु अन्तिमद्वयं ज्ञानेन निवर्तयितुं शक्यं परन्तु आदिमं हि लक्षस्थलपर्यन्तं यात्येव। उच्यते **च नाभुक्तं क्षीयते कर्म** इति। अर्थात् ज्ञानोत्पत्यनन्तरं सञ्चितानि सञ्चीयमानानि च बाध्यते। तद्गीतं गीतायां – **ज्ञानाग्निः सर्वकर्माणि भष्मसात् कुरुतेर्जुन**। इति। परन्तु जीवस्य प्रारब्धः यावदस्ति तावद् प्राप्तेऽस्मिन् शरीरे तत्

भोक्तव्यः। ज्ञाने जाते देहपाते सति कर्मसंस्काराभावात् पुनः देहोत्पत्तिः न भवति। यथा दग्धवीजाद् अङ्कुरोत्पत्तिः असम्भवः तद्वद् ज्ञानदग्धानि कर्माणि फलं न उत्पादयन्ति। उच्यते ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः। तेषामादित्यवज्ज्ञानं प्रकाशयति भारत ॥ इति । अविद्या कामकर्म एव देहोत्पत्तिं प्रति हेतुः। तस्मात् कारणनाशे कार्यनाशवत् अविद्या नाशे कामकर्मसंस्कारनाशः ततः शरीरनाशः। अज्ञानाभावे देहाभावः। परन्तु यस्य कर्मनाशो न जातः अपि तु विविधफलेच्छया कर्माणि अनुष्ठीयन्ते तेन साधुकर्म क्रियते चेदपि संसारनाश न कथमपि भविष्यतीति अद्वैतनिश्चयः। तस्य आत्मा सूक्ष्मशरीरोपकरणैः अर्जितसंस्कारैः च बद्धः सन् देहात् देहान्तरं याति। कर्मानुसारम् **अन्यन्नवतरं कल्याणतरं रूपं कुरुते**। तस्मादेव कारणात् भगवद्गीतायामनाशक्ततया कर्मकरणाय उपदेशः कृतः। अज्ञानपूर्विका वासना एव कर्मद्वारा फलमुत्पादयति। तस्मात् शभाशुभफलभोगार्थं शरीरधारणम्। मुक्तपुरुषाः आप्तकामाः तस्मात् तेषां प्राप्तव्यं किमपि नास्ति। सर्वत्रैवात्मदर्शनात्। यथोच्यते वृहदारणकोपनिषदि – **यदा सर्वमात्मैवाऽभूत् तदा केन कं पश्येत्** इति। कर्म कुर्वन्ति चेदपि वासनारहिततया अनाशक्ततया वा। एवं कर्तव्यमात्रबुध्या कर्मकरणेन चित्तशुद्धिर्भवति। शुद्धान्तःकरणेनैव आत्मसाक्षात्कारः। उच्यते च – **चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये**। इति। तथा च भगवद्गीतायाम् – **नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्**। अपि च – **ब्रह्मण्याध्याय कर्माणि सङ्गं त्यक्त्वा करोति यः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥** इति। तस्मात् मुक्तेन क्रियमाणेन कर्मणा अपि पुनरागमनं नास्ति, फलोत्पत्यभावात्।

**<u>कर्मणैव हि मोक्षः</u>**। इदानीं कर्मणा पितृलोकः विद्यया देवलोकः इति यदुच्यते अथवा कर्मानुष्टानेन स्वर्गादिषु गमनं, कर्मफलक्षये सति ततः आगमनं , यदुक्तं –

**ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति॥**

इत्यादिवचनं सकामकर्मकारीषु युज्यते न तु निष्कामे कर्मणि। अपि च भगवद्गीताया-मस्ति– **गतागतं कामकामा लभ्यन्ते** इति। योगीनां ज्ञानिनां सविधे इदमेव कर्म वैराग्यमुत्पादयति। यदाम्नातं – तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन। इति। कर्म एव बन्धकारणम् चेत् कर्म त्यक्तव्यम् भवति। परन्तु कर्म अकृत्वा न कोऽपि स्थातुमर्हति। यदुक्तं गीतायां –**न हि कश्चिद् क्षणमपि जातु तिष्ठत्यकर्मकृत्**। इति। अपि

च ईशावास्योपनिषदि –**कुर्वन्नेवेह कर्माणि जिजीविशेच्छतं समाः**।इति। एवं कर्म सर्वैः सर्वदा अनुष्ठीयते चेत् तत् कथं करणीयमिति ज्ञेयम्। वस्तुतः यदा कर्मफलतृष्णाप्रयुक्तः कर्मणि प्रवर्तते तदा कर्मफलस्य एव जन्मतो हेतुः भवेदिति आचार्यसिद्धान्तः। इदानीं फलं विहाय कर्म कथमाचरणीयमिति चेदुच्यते –

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्यो समो भूत्वा समत्वं योग उच्यते॥**

एवं फलतृष्णारहिततया समत्वबुद्ध्या कृयमाणं कर्म योग इति उच्यते। अनेन चित्तस्य शुद्धिर्भवति। अन्तःकरणं च पात्रस्थजलराशिवत्। पुत्रवित्तलोका इति एषणात्रयं कामकाञ्चनादिवासना वा अन्तःकरणे तरङ्गम् उद्भावयति। एवमनेन वासनावासितेन अशान्तेन अन्तःकरणेन न केवलमात्मसाक्षात्कारः अपि तु सर्वमेव यथार्थतया कर्तुम् असम्भवः। तस्मात् आत्मसाक्षात्कारार्थं चित्तशुद्धिरपेक्षते। चन्द्रस्य प्रतिबिम्बं यथा अचञ्चले निर्मले जले सम्यक् भाति न तु विविधमलदुषिते अशान्ते जले तथैव शुद्धेन चेतसा भवति आत्मसाक्षात्कारः। तस्मादेव कारणात् योगिनः कर्म न त्यजति परन्तु फलं त्यक्त्वा कर्तव्यधीया ईश्वरार्पनबुध्या कर्म करोति। योगिनः कर्म कुर्वन्ति संङगं त्यक्त्वात्मशुद्धये। तदेव योगः। एतदेव कर्मसु कौशलम् रहस्यं वा। तादृशकर्मानुष्ठानेन जीवः शाश्वतं पदमाप्नोति। न कर्मणामनारम्भात् नैस्कर्मं पुरुषोऽश्नुते। नच सन्नासनादेव सिद्धिं समधिगच्छति॥ इत्यतः कर्मारम्भात् एव नैस्कर्मसिद्धिः इति गम्यते। तस्माद् कर्म कर्तव्यमेव। तच्च अस्माकं स्वभावोऽपि। तर्हि कर्म कथम् कर्तव्यं कानि वा कर्माणि करणीयानि इति प्रश्ने सति उच्यते - **यान्यनवद्यानि कर्माणि तानि सेवितव्यनि नो इतराणि।** इत्यनेन सहजं कर्म एव करणीयं नेतर इति बोद्धव्यम्।सहजं नाम जन्मना सह उत्पन्नम्। भगवता तदादौ चतुर्थे अध्याये चातुर्वर्णं मया सृष्टमित्यादिना आरभ्य अन्ते अष्टादशाध्याये सुचारुतया प्रपञ्चितम्। किञ्च उक्तम् – **सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।** अपि च **स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।** इति।एवं फलाकाङ्क्षाशून्यतया जीवः सर्वकामेभ्य निस्पृहः सन् स्वस्वभावजं कर्म कृयते चेत् कर्मयोग इत्युच्यते। ईश्वरार्पनबुध्या इदमनुष्टीयते चेत् ततः आत्मप्रसादमुत्पद्यते। ततः बुद्धिः स्वरूपे प्रतिष्ठितो भवति। तदा शरीरान्तःकरणभिन्नतया आत्मोपलब्धिर्भवति। स च मोक्षः।

**उपसंहारः**

अन्त्ये च कर्म कर्तव्यमुत न इत्यस्मिन् विषये अद्वैततत्त्वततिभिः कः निश्चयः कृतः इति वक्तव्यम् । कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते। तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः॥ इति व्याचक्षाणा कर्मैव सर्वानर्थहेतुभूतमित्यतः कर्म त्यक्तव्यः। आचार्यशङ्करेणापि सर्वत्र सिद्धान्ते उच्यते–**मोक्षमिच्छन् सदा कर्म त्यजेदेव ससाधनम्। (के उ भा 4.3)**परन्तु तत्र भगवता निश्चितं यत् यज्ञ दानं तपः एतत् त्रयं न त्यक्तव्यम्, अवश्यमेव कर्तव्यम्। मोहकारणद् अज्ञानात् तस्य परित्यागः क्रियते चेत् स तामसः उच्यते। कर्म बन्धकारणं दुःखप्रदायकमिति मत्वा यः शारीरक्लेशभयात् त्यजति सः त्यागफलं नाप्नुवन्ति। परन्तु यः कर्तव्यधीया कर्म आचरति, फलासक्तिं च त्यजति स एव यथार्थः त्यागः। सः त्यागि एव कर्मयोगी।

भारतीयाध्यात्मिकदर्शनस्य कर्मतत्त्वानुसारेण अस्य तत्त्वस्य उपादेयत्वमिदानीं यथामति प्रस्तूयते –

1. अस्मिन् जन्मनि यत् सुखदुःखादिकं प्राप्यते तत् स्वकृतकर्मफलमिति विचिन्त्य अनुद्विग्नेन चेतसा अङ्गीकरणीयम् भवति।

2. कर्म एव संस्कारं जनयति, तदनुसारेण अस्माकमग्रिमं जन्म।

3. वस्तुतः वेदान्ते कर्म यथा व्याख्यातं तेन जीवाः एव स्वस्य भाग्यनिर्माता इति स्पष्टम्।

4. अत्र पुरुषाकारस्य यथा अवकाशः वर्तते तथा कुत्रापि नास्ति।

5. कर्मत्यागः अत्र न प्रतिपाद्यःनिष्कामतया कर्मकरणमेवात्र प्रतिपाद्यम्।

6. सुकृतेन दुष्कृतस्य न्यूनता सम्पादनीया।

7. स्वस्वभावजं कर्म एव करणीयम्।

अनेन स्पष्टं यत् वैदान्तिककर्मवादः स्वनियन्त्रणवादः। स च अनियन्त्रणवादविरोधि अपि। तत्फलतया कर्मविषये जीवेच्छायाः अङ्गीकारत्वात् तस्मिन् जीवस्य नैतिकदायित्वमपि जायते इति शम्

# चाणक्यनीतिदर्पणे अनुसन्धानकार्यपरामर्शाः

**डा. डि. वेणुगोपालरावः**, शिक्षाशास्त्रविभागः

**विस्मयो न हि कर्तव्यो बहुरत्ना वसुन्धरा।** (चा.नी.द.14.8) इति चाणक्योक्त्यनुसारमियं भारतभूमि नैकैः अमूल्यरत्नैः गुह्यतयालङ्कृता वर्तते। तथैव भारतस्यास्य संस्कृतसाहित्यजगदपि यतः उच्यते खलु व्यासेन **यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्** इति ।अत एव वर्तमानसमाजः सर्वस्मिन् क्षेत्रे अमूल्यरत्नमन्विषन्, नूतनत्वमेव परिगणयन् नैकेषु विषयेषु अनुसन्धानप्रक्रियां विधीयमानः वर्तते। तेनैव अनुसन्धानकार्येण स्वाभीष्टं कार्यं सम्पाद्य समाजाय अपि दिशानिर्देशने मानवः कृतकृत्यो दृश्यते। अनुसन्धानप्रक्रियेयं विज्ञानेन सह स्वगतिं वेगं चातिक्रम्य धावन्ती वर्तते। यादृशी शिक्षा विद्वद्भिः आविष्क्रियमाणा वर्तते सैव शिक्षा पुनः मानवं ततोप्याधुनिकतां सम्पादनाय प्रेरयन्ती दृश्यते। शिक्षा अनुसन्धानकार्यमिति द्वावपि विषयौ प्रतिक्षणं स्वीयरूपरेखां परावर्त्य मानवजीवनसार्थकतायै, आनन्दमयजीवनाय च कारणभूतौ भवतः। विचारोऽयमाधुनिकः विज्ञानपरश्च नास्ति। प्राचीनार्वाचीनाः ये सामाजिकविचाराः विद्यन्ते ते समेऽपि ताभ्यां द्वाभ्यां विषयाभ्यां प्रभाविताः एव। तत्र सामाजिकार्थिकभौतिकसांस्कृतिक, वैज्ञानिकसाङ्केतिकादयः सर्वेऽपि विषयाः अन्तर्भवन्ति। साहित्यकदृष्ट्या विचार्यते चेदेतयोः द्वयोः विषययोः प्रभावः सम्पूर्णसंस्कृतसाहित्ये दरीदृश्यते। वैदिकसाहित्यं प्रमाणरूपेण स्वीकृत्य तदनन्तरसंस्कृतसाहित्याविष्करणं विद्वद्भिः सरलतया सारभूतेन च जनहिताय पृथक् पृथक् नैकशास्त्रत्वेन सम्पादितं विद्यते। **नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम्** इति तत्कथनेन नैकानि बहुभिः ग्रथितानि शास्त्राणि अधीत्य अनुसन्धानाय च राजनीतिविचारविषयसंग्रहणं चाणक्येनाकारि इति स्पष्टायते। अतः शिक्षादृष्ट्या अनुसन्धानदृष्ट्या च चाणक्यसाहित्यमिदं समेभ्यः विषयेभ्यः, सर्वेभ्यश्च मार्गप्रदर्शकं भवतीति धियात्र आनुसन्धानिकपरमर्शाः विमृश्यन्ते।

**अनुसन्धानस्य स्वरूपम्**–

अनुसन्धानकार्यं तावत् तत्तत्क्षेत्राधीनं भवतीति विदितांशः। तत्तत्क्षेत्रानुगुणम् अनुसन्धानक्षेत्रस्य स्वरूपमपि भिद्यते। तथापि प्रधानतया अनुसन्धानकार्येण लोकोपकारकं कमपि विषयं नूतनत्वम्, औचित्यं, प्रयोजकत्वं, नैतिकता, प्रामाणिकता, आचरणीयता, विश्वसनीयता, सार्वजनिकता, सांस्कारिकता इत्यादीनि लक्षणानि आश्रित्याविष्करणीयं भवति। **शून्यात् किमपि नोत्पद्यते** इति अस्तित्ववादविचारानुगुणं गवेषणकार्ये अपि सामान्यतया कथञ्चित् किमपि

प्रतिपादयितुं न शक्यते। यदि आविष्क्रियते तन्मूल्ययुक्तं, लोकहितं च न भवति। तस्मात् कथयति चाणक्यः- **अनन्तशास्त्रं बहुलाश्च विद्याः अल्पश्च कालो बहुविघ्नता च।**

**यत्सारभूतं तदुपासनीयं हंसो यथा क्षीरमिवाम्बुमध्यात्।।** (चा.नी.द.15.20)

इति।नैकानि सर्वाण्यपि शास्त्राणि काव्याद्यवेक्षणेन, प्रतिभया, स्वशक्त्या, नैपुण्येन, सृजनात्मकतया चैव प्रणीतानि ग्रथितानि च सन्ति। तथापि अल्पे एव काले नैकानि शास्त्राणि अधीत्यावगत्यान्विष्य च यत्सारभूतं विषयं तदेवात्रानुसन्धानकार्येण सम्पाद्यमिति चाणक्यकथनम्। यद्यपि समस्याः, विषयबाहुल्यता लोके अथवा शास्त्रेषु, तथापि हंस इव तत्सागरसदृशसाहित्यात्सारभूतमंशमेव ग्राह्यं, चेतव्यं, गवेषणीयं, प्रतिपादनीयञ्चेति चाणक्याभिप्रायः। **अनन्तशास्त्रम्** इति पदेन तत्सम्बद्धानि सर्वाणि शास्त्राणि ज्ञातव्यानीति, **बहुलाश्च विद्याः** इति कथनेन तत्सम्बद्धशिक्षाग्रन्थाः (सम्बद्धसाहित्येतिहासः) ज्ञातव्या इति, **अल्पश्च कालो** इति पदेन सीमिते समये कार्यं सम्पादयेदिति, **बहुविघ्नता** इति पदेन कार्यकाले नैकाः समस्याः विघ्नकल्पाः भवन्ति इति, **यत्सारभूतं तदुपासनीयमिति** पदेन साररूपेण यदाचरणयोग्यं तदेव आविष्करणीयमिति अत्र ज्ञायेत।

**अनुसन्धानकार्यस्य औचित्यम्**

इहलोके न कश्चित् मानवः प्रयोजनाभावात् कार्यलग्नः भवति। अत एव उच्यते यत् **प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तत** इति। अनुसन्धानकार्यं विधीयते अस्माभिः लोककल्याणाकांक्षयेति कदापि न विस्मर्तव्यम्। यदा यत्कार्यमनुसन्धानाय स्वीक्रियते तदा उचितानुचितविचक्षणपुरस्सरं योग्यं विषयमेव चिनुयात्। कार्यस्यौचित्यं सर्वैः अङ्गीकरणीयं स्यात्। ततः चाणक्यः कथयति-

**अधीत्येदं यथाशास्त्रं नरो जानाति सत्तमः।**
**धर्मोपदेशविख्यातं कार्याकार्यं शुभाशुभम्।।** (चा.नी.द.1.2)
**तदहं सम्प्रवक्ष्यामि लोकानां हितकाम्यया।**
**येन विज्ञानमात्रेण सर्वज्ञत्वं प्रपद्यते।।** (चा.नी.द.1.3)

इति चाणक्येन प्राच्यसाहित्याच्चितश्लोकद्वयम् अनुसन्धानविषयचयनावसरे सर्वेभ्यः मार्गप्रदायकं भवति। अत्र कार्याकार्यं, शुभाशुभं, यथाशास्त्रं, लोकहितं, विज्ञानात्मकं इति पदानि अनुसन्धानौचित्यसम्पादने मुख्यलक्षणीनीव द्योत्यन्ते। कार्यसमाप्तेः अनन्तरं तस्य पठनेन प्रधानतया लोकहितं सर्वैः यदि तत्रानुभूयेत तर्हि कार्यौचित्यमङ्गीकर्तुं शक्यते। अतः

तावद्दीर्घचिन्तनपुरस्सरं शाश्वतं, मूल्ययुक्तं, लोकहितं च कार्यमेव अनुसन्धानकार्यं भवितुं शक्नोतीति भावः अत्र ग्राह्यः। तथापि

वर्तमानकाले अनुसन्धानकार्यं तेनैव साधुत्वं याति येन उत्तममार्गनिर्देशकचयनं क्रियते इति विदितांशः एव। यःकश्चित् मार्गनिर्देशकाभावात् किमपि कार्यं साधयितुं न शक्नोतीति अनुभवाधारितः। अनुसन्धानकार्येऽस्मिन् अनुसन्धानविषयः, अनुसन्धाता, मार्गदर्शकः इति त्रयः विषयाः मुख्याः भवन्ति।त्रिष्वप्येतेषु विषयेषु चाणक्यचिताः इमे श्लोकाः सन्मार्गनिर्देशने सशक्ताः विद्यन्ते। यथा-

**शैले शैले न माणिक्यं मौक्तिकं न गजे गजे। साधवो न हि सर्वत्र चन्दनं न वने वने।।(चा.नी.द.2.13)**

**एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना। वसितं तद्वनं सर्वं सुपुत्रेण कुलं तथा।।(चा.नी.द.3.14)**

**एकेन शुष्कवृक्षेण दह्यमानेन वह्निना। दह्यते तद्वनं सर्वं कुपुत्रेण तथा।।(चा.नी.द.3.15)**

**एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना। आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी।।(चा.नी.द.3.16)**

**किं जातैर्बहुभिः पुत्रैः शोकसन्तापकारकैः।वरमेकः कुलाऽऽलम्बी यत्र विश्राम्यते कुलम्।।(चा.नी.3.17)**

इत्येवं चाणक्यचितश्लोकाः अनुसन्धानकार्यसम्बद्धेषु त्रिषु विचारेषु औचित्यतासम्पादनाय उपकृताः भवेयुः। सामान्यः यः कश्चन विषयः नानुसन्धेयः, अपि च एकः कश्चन तादृशः विषयः अनुसन्धेयः येन कुलमिदं सुखेन विश्रम्यते इति विषयपक्षतः, सर्वे मार्गोपदेशकाः एव, परन्तु कश्चन तादृशः मार्गोपदेशकः स्याद्येन शिक्षाकुलं सुगन्धितं स्यादिति मार्गनिर्देशकपक्षतः, भवन्तु बहवः अनुसन्धातारः, परन्तु स एव उत्तमः अनुसन्धाता भवितुमर्हति यः स्वप्रतिभया विज्ञानान्वेषणं करोति इति अनुसन्धातुः पक्षतश्च अनुसन्धानसैद्धान्तिकविचाराः चाणक्यनीतिश्लोकेभ्यः ग्राह्याः।

**अनुसन्धानक्षेत्रस्य विषयस्य वा चयनम् -**

अनुसन्धानकार्ये महत्तरं कष्टतरञ्च कार्यं भवति विषयस्वीकरणम्।प्रायः अनुसन्धातारः, मार्गदर्शकाश्च विषयस्य स्वीकरणावसरे एव बहुकष्टमनुभवन्ति। बहवः अत्रैवाशक्ताः

अनुसन्धानकार्याद्विरमन्ति। सन्दर्भे अस्मिन् चाणक्यकथनं वर्तते यत् अनुसन्धाता स्वक्षेत्रमाश्रित्यैव अनुसन्धत्तेत न तु परक्षेत्रमाश्रित्येति सूचयति। यथा-

**कष्टात्कष्टतरं चैव परगेहनिवासनम्।(चा.नी.द.29-1) इति।** तदेव न कालः, प्रदेशः, व्ययः, लाभः, कः अहं, का शक्तिर्मम, का प्रतिभा मम इति वारं वारं विचिन्त्य विषयं क्षेत्रं वा चिनुयादिति अनेन सुभाषितेन जागरयति चाणक्यः।यथा-

**कः कालः कानि मित्राणि को देशः कौ व्ययागमौ। कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः।। (चा.नी.द.4.19)** इति। तथैव येन कार्येण सम्मानः न भवति, उद्योगः न मिलति, ज्ञानं न भवति तादृशः विषयः न स्वीकरणीय इत्युपदिशति। यथा -

**यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवाः। न च विद्यागमः कश्चित् तं देशं परिवर्जयेत्।।(चा.नी.द.1.9)**

**लोकयात्रा भयं लज्जा दाक्षिण्यं त्यागशीलता। पञ्च यत्र न विद्यन्ते न कुर्यात् तत्र संस्थितम्।। (चा.नी.द.1.10)**

तथैव निश्चिताः विषयाः त्यक्त्वा अनिश्चिताः विषयाः नानुसन्धेयाः।यतः निश्चितान् स्वयं त्यक्त्वा अनिश्चितमन्विष्य धावनं श्रेयस्करं न, अपि च तत्सर्वं नाशयतीति चाणक्यः। यथा-

**यो धृवाणि परित्यज्य अधृवं परिषेवते। ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च।।(चा.नी.द.1.13)**

**विषादप्यमृतं ग्राह्यममेध्यादपि काञ्चनम्। नीचादप्युत्तमा विद्या स्त्रीरत्नं दुष्कुलादपि।।(चा.नी.द.1.16)**

तथैव कष्टं विषतुल्यं चेदपि निश्चितादेव यत्किमपि सुसाध्यमिति चाणक्यस्योपदेशः विषयचयने सारभूतोपदेशः।

**अनुसन्धानकार्यसम्पादनावसरे जागरूकता–**

वर्तमानकाले प्रत्येकं कार्यं विशिष्टं कष्टसाध्यं च वर्तते।तत्र अनुसन्धानकार्यमपि तादृशमेव भवति।यस्य कस्यापि कार्यस्य सम्पादने चाणक्यस्य राजनीतिस्तु प्रधानतया वर्तते यत् रहस्यरूपेणान्तं यावत् संरक्षणम्। तथैवात्रापि सः विचारः कार्यसाफल्याय वर्तमानानुसन्धानकार्यनियमानुसारं उपकरोति। कार्यसमाप्तिपर्यन्तं मित्रमपि न सूच्येत इति विचारः एतस्मात् ग्राह्य एव।यथा-

**न विश्वसेत् कुमित्रे च मित्रे चापि न विश्वसेत्। कदाचित् कुपितं मित्रं सर्वं गुह्यं प्रकाशयेत्।।(चा.नी.द.2.6)**

**मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत्। मन्त्रेण रक्षयेत् गूढं कार्ये चापि नियोजयेत्।।(चा.नी.द.2.7)**

**अनुसन्धानकार्यसम्पादने अनुसन्धातुः कार्याणि –**

यस्मात् दिनात् अनुसन्धानकार्यं प्रारभते अनुसन्धाता ततः पश्चात् नैकेषु विषयेषु स्थितप्रज्ञो भूत्वा कार्याणि सम्पादयेत्। स्वीकृतविषयात् नवीनं किमपि साधनीयं चेत्तत्र प्रत्येकं श्लोकः, श्लोकार्धः, पादः, अक्षरं वा सुस्पष्टम् अधीयेत इति उपदिशति चाणक्यः।यथा-

**श्लोकेन वा तदर्धेन पादेनैकाक्षरेण वा। अबन्ध्यं दिवसं कुर्यात् दानाध्ययनकर्मभिः।।(चा.नी.द.2.13)**

**तावद् भयेषु भेतव्यं यावद्भयमनागतम्। आगतं तु भयं दृष्ट्वा प्रहर्तव्यमशङ्कया।।(चा.नी.द.5.2) इति।**

तथैव विद्यमानं भीतिं त्यक्त्वा, शङ्कां च त्यक्त्वा धैर्येण सर्वं साधयेदिति चाणक्यः।तथैव नियतसमयसारिणी कार्यसम्पादने अनुसरणीयेति समयपक्षतश्च निर्दिशति। श्वः पश्यामः इति आधुनिकानां गवेषकाणां स्थितिः वर्तते। नैतत्साधु।अपेक्षितं कार्यं सर्वं निश्चितसमयात्पूर्वमेव सम्पाद्य अनन्तरं सुखेन कार्यं सर्वं सम्पादयेदिति चाणक्यः।यथा-

**दिवसेनैव तत्कुर्याद् येन रात्रौ सुखं वसेत्। अष्टमासेन तत्कुर्याद् येन वर्षाः सुखं वसेत्।।(चा.नी.द.3.61)**

**यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।**

**तथा चतुर्भिः पुरुषः परीक्षते त्यागेन शीलेन गुणेन कर्मणा।।(चा.नी.द.5.2)**

कस्मिन्नपि कर्मणि समेपि विषयाः भिन्नप्रकारेण अनुस्यूततया परीक्षणीयाः यथा स्वर्णाभरणनिर्माणावसरे स्वर्णं परीक्ष्यते। वस्तुतः अनुसन्धानकार्यदृष्ट्या विशेषरूपेण अनुसन्धाता, मार्गदर्शकः, विषयः इति त्रयः विषयाः अपि तथैव परीक्षणीयाः वर्तन्ते। विषयसंग्रहणावसरे प्रधानतया शास्त्राणि अन्विष्य मुहुर्मुहुः परीक्ष्य गुणवत्ततापूर्वकं सर्वं कार्यं साधयेदनुसन्धाता इति ज्ञायते।

**अनुसन्धातुः कार्यसम्पादननैपुण्याणि गुणाश्च –**

अनुसन्धानकार्ये अनुसन्धाता, मार्गदर्शकः, विषयः इति पक्षत्रये अपि नैपुण्यतायाः, गुणानां च प्राधान्यता वरीवर्ति। अनुसन्धानकार्यं प्रतिक्षणं **नूतनत्वमिति** विषयाश्रितं भवति। शिक्षाविषये उपदिशन् चाणक्यः उत्तमानि विंशतिगुणोपेतोदाहरणानि प्रास्तुवन्। यथा-

**सिंहादेकं बकादेकं शिक्षेच्चत्वारि कुक्कुटात्। वायसात्पञ्च शिक्षेच्च षट् शुनस्त्रीणि गर्दभात्।।(चा.नी.द.6.14)**

शिक्षार्जने छात्रः नैकगुणभूयिष्ठः स्यात्। सन्दर्भे अस्मिन् सिंहबककुक्कुट-वायसशुनगर्दभेभ्यः सहजाः कतिपय गुणाः आर्जनीयाः भवन्ति। तत्र प्रभूतमल्पं वा कार्यं भवतु अनुसन्धाता स्वीयां सर्वविधशक्तिं क्रोडीकृत्य शतं प्रतिशतं मनसा, शरीरेण, ज्ञानेन च कार्यं सिंहवत् कुर्यादिति उपदिशति।यथा-

**प्रभूतं कार्यमल्पं वा यन्नरः कर्तुमिच्छति। सर्वारम्भेण तत्कार्यं सिंहादेकं प्रचक्षते।।(चा.नी.द.6.15)**

**इन्द्रियाणि च संयम्य बकवत् पण्डितो नरः। देशकालबलं ज्ञात्वा सर्वकार्याणि साधयेत्।।(चा.नी.द.6.16)**

**प्रत्युत्थानं च युद्धं च संविभागं च बन्धुषु। स्वयमाक्रम्य भुक्तं च शिक्षेच्चत्वारि कुक्कुटात्।।(चा.नी.द.6.17)**

**गूढं च मैथुनं धार्ष्ट्यं काले काले च संग्रहम्। अप्रमत्तमविश्वासं पञ्च शिक्षेच्च वायसात्।।(चा.नी.द.6.18)**

**बह्वाशी स्वल्पमसन्तुष्टः सुनिद्रो लघुचेतनः। स्वामिभक्तश्च शूरश्च षडेते श्वानतो गुणाः।।(चा.नी.द.6.19)**

**सुश्रान्तोपि वहेत् भारं शीतोष्णं न च पश्यति। सन्तुष्टश्चरते नित्यं त्रीणि शिक्षेच्च गर्दभात्।।(चा.नी.द.6.20)**

**य एतान् विंशतिगुणानाचरिष्यति मानवः।कार्यावस्थासु सर्वासु अजेयः स भविष्यति।।(चा.नी.द.6.21)**

तथैव बकवत् देशकालबलं ज्ञात्वा इन्द्रियनिग्रहपुरस्सरं कार्यं सम्पाद्येत। कुक्कुट इव विषयप्राप्तये विषयसज्जीकरणे प्रत्युत्थानं, युद्धं, संविभागः,आक्रमणादिगुणयुक्तः स्यात्। इत्थं गूढता, मैथुनं, धार्ष्ट्यं, काले काले संग्रहः, अप्रमत्तता, अविश्वासः इति पञ्च गुणाः वायसात् , बह्वाशी, स्वल्पमसन्तुष्टः, सुनिद्रा, लघुचेतनः, स्वामिभक्तः चेति षट् गुणाः शुनकात् च

अवधेयाः। अनुसन्धानकार्ये अनुसन्धाता चाणक्योक्तविंशतिगुणोपेतः भवति तर्हि सः अवश्यं स्वकर्मणि अजेयः इति सारभूतः विषयः अत्र ग्राह्यः वर्तते।

**उपसंहारः –**

सूक्ष्मेक्षिकतया विचार्यते चेत् भारतीयसाहित्यकारेषु गणनीयानुसन्धातृषु चाणक्य एव श्रेष्ठ इति कथने नातिशयोक्तिः।चाणक्यनीतिसूत्राणीति नाम्ना विस्तृतान्, सारगर्भितान् च साहित्यविषयान् स्वप्रतिभया सरलवाक्यैरेव लोकावबोधनाय प्रास्तौत्। अत एव प्राप्तानुभवेन, कृतपरिश्रमेण च कस्मिन्नपि मानवकार्ये प्रतिभैव सर्वाधारिता इत्यवदत्। यथा-

**यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्। लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति।।** इति।

तथैव कस्मिन्नपि कर्मणि मानवः बहुधा चिन्ताव्याकुलः भूत्वा भूतभविष्यकालयोः विषये अधिकं न चिन्तयेदिति चाणक्योक्तिः। अनुसन्धानकर्मणि अनुसन्धात्रापि वर्तमानकालिकप्रयोजनं मनसि निधाय कार्यं सम्पाद्यम्। गते भविष्ये वा शोकः न करणीयः भवति। यथा-

**गते शोको न कर्तव्यो भविष्यं नैव चिन्तयेत्।वर्तमानेन कालेन प्रवर्तन्ते विचक्षणाः।।** इति।

तथैव मानवकार्यसाफल्यं कार्याधारितं, विज्ञानं कर्मानुसारिणी च भवति। तथापि बुद्धिमन्तः यदा कदापि सुविचिन्त्यैव सर्वविधं कार्यं साधयन्तीति चाणक्यः। ततः अनुसन्धानकर्मणि सुधयः सुविचार्य कार्यं सम्पादयेयुरिति सूचनात्र प्राप्यते। यथा -

**कार्यायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी। तथापि सुधयश्चार्याः सुविचार्यैव कुर्वते।। (चा.नी.द.6.14)**

**परिशीलितग्रन्थसूची –**

1. चाणक्यनीतिदर्पणः, परमहंसस्वामी जगदीश्वरानन्द सरस्वती, विजयकुमारगोविन्दराम हासानन्द, दिल्ली।
2. मनुस्मृतिः, भारतीयविद्याभवन्, मुम्बई,1972.
3. संस्कृतसाहित्येतिहासः, दाहालः लोकमणि, वाराणसि, कृष्णदास अकाडमी,1999.
4. The Great Epic of India, Hopkins Washburn E., Motilal Banarasidass Publishers, 1993.

# Polonius' advice to his son Laertes

**Dr. Murthy S. V. R.**
**HOD, General Department**

Polonius was a main character of William Shakespeare's play, "Hamlet." He was Chief Councillor (Lord Chamberlain) to King Claudius, King of Denmark. He had a son, Laertes and a daughter, Ophelia. His character was modelled on 'New Man' of Renaissance and though a sincere father, still a suspicious rambler of wisdom. In Act I of Scene III, he gave some pieces of advice to his son, Laertes, when he returned back to Paris after attending the coronation ceremony of King Claudius. What he did in France, Shakespeare had not mentioned in the drama. Polonius' advice to Laertes was in sententious maxims, which can be related with the behaviour of humans in any age or time or country.

Laertes' ship was ready for sailing and his father asked him to imbibe 'a few precepts' in his mind to shape his character.

"Be thou familiar, but by no means vulgar"

There is a thin line separating familiarity and vulgarity. He asked his son to be friendly with everyone. But, he should not be exceeding his limits, which would be resulting in absurdity and vulgarity. He should maintain his dignity while being familiar among his friends. In other sense, he should never reveal the secrets or important issues of his personal life to his friends to prove another maxim, "too much familiarity breeds contempt." So his intimacy should not go beyond the limits of dignity of his pivacy.

**"The friends thou hast, and their adoption tried,**
**Grapple them to thy soul with hoops of steel;**
**But do not dull thy palm with entertainment**
**Of new-hatch'd, unfledg'd comrade."**

He should bind his friends to his heart as strongly as steel so that they should attain the ultimate stage of relationship with them being his soul mates. But then he should exercise caution and should not accept the offers of friendship as some unseen dangers would be lurking behind. He should not extend his hand to shake with everyone and become cheap. He should be extremely careful

when making friendship with new people and strangers. So he should observe them in a perfect manner before offering his hand for friendship. He should be wise in selecting his friends who would be transformed as his soul mates later. So it would prove to match another maxim, ‘tell me about your friends and I will tell about you’.

**“Beware**
**Of entrance to a quarrel, but, being in,**
**Bear’t that th’ opposed may beware of thee.”**

He should not enter into a quarrel with anyone. He should remain calm and should not initiate himself into it. But, once he entered into a quarrel, he should make his rivals realise that they had made a mistake. So he should make rivals to take note of him. They should also be made afraid of picking up a quarrel with him in future. So he should refrain himself from indulging in a quarrel, but if dragged into any, he should see the end of it.

**“Give everyman thine ear, but few thy voice;**
**Take each man’s censure, but reserve thy judgement.”**

The best piece of advice and the most difficult one to follow. He should be a good and patient listener. At the same time, he should be a controlled one in not voicing his views and ideas. The human being in this creation is always impatient in listening and egoistic in giving unwarranted sermons to others. So, Laertes must exercise uninterrupted patience in listening to others. He should not lend his voice to air his views and comments. He should listen to all the comments and criticism patiently. But, he should not give or express his conclusion. So, he should retain his (judgment) calm demeanour and thus should avoid himself from becoming a braggart.

**“Costly thy habit as thy purse can buy,**
**But not express’d in fancy; rich, not gaudy;**
**For the apparel oft proclaims the man,**
**And they in France of the best rank and station**
**Are most select and generous, chief in that.”**

He should go for costly dresses as his purse could offer. At the same time care should be taken in not buying fancy dresses. He

should be fastidious and should look rich through his dresses and again he should be careful to avoid buying and wearing gaudy dresses. Because the French used to take at most care in presenting themselves in rich and dignified dresses, and they used to be the perfect masters and superior to all in that respect.

**"Neither a borrower, nor a lender be;**
**For loan oft lose both itself and friend,**
**And borrowing dulls the edge of husbandry.**"

He should not borrow money from others. He should pool his resources in such a way that he should not be dependent on others for his needs or desires. At the same time, he should not lend his money to his friends. Often this kind of act would lose both the money and friendship. Moreover borrowing would make him forego his dignity and prestige. It would diminish his stature in public eye. So the policy of non-borrowing and non-lending would teach him to manage his economy in a better way and would make him less extravagant and thriftier and wiser. Thus, he should not spend beyond the limits of his purse and also should not create a false sense of dependency to his friends. Then he could become the happiest and wisest man in life.

**"This above all; to thine own self be true,**
**And it must follow, as the night the day,**
**Thou canst not then be false to any man."**

Lastly, Polonius advised his son, Laertes to remain true to himself. His truthfulness must follow him as the night follows the day. He said that if Leartes was true to himself, then he would be true to all and would never be false with anyone.

Thus, Polonius advised his son and blessed him to become a perfect man. I think these advices are relevant even today. They can transform anyone into a happy one and thus the society a happy one to live in.

**"Sarve janah sukhino bhavantu!"**

# Vedantic Undercurrents in Indian Renascent Movements

Dr. Ramankutty. P.V.
Retd.Govt.College Principal

Let me begin this article with a few lines from *Gitanjali*, that breathe with a spirit of freedom and awakening:

Where the mind is without fear
And the head is held high;
Where knowledge is free;
Where the world has not been broken up
Into fragments by narrow domestic walls
Where words come out from the depth of truth
Where tireless striving stretches its arms towards perfection
Where the clear stream of reason
Has not lost its way
Into the dreary desert sand of dead habit;
Where the mind is led forward by thee
Into ever widening thought and action-
Into that heaven of freedom, my father,
Let my country awake.

The philosophical schools based on the Brahmasutra-s of Badarayana are generally given the name Vedanta. Vedantic streams of thought of all hues and shades have played a significant role in Indian renascent movements. The medieval devotional movements and the renascent awakening later in the $19^{th}$ century had an undercurrent of one or the other kind of Vedantic reflection. Gaining momentum as a great wave of change throughout the country, they possessed the principles equality, fraternity and oneness and they heralded an era of social and cultural uprising ushering in new values and priorities.

According to Advaita Vedanta of Srisankara, the most popular and best known influential school of Indian philosophy, the ultimate reality is the principle of Brahman. It is pure reality, pure consciousness and pure bliss. Brahman is nirguna, devoid of any attributes. It is also nirvisesa or devoid of all categories of the intellect. The world is real only from the phenomenal point of view. Its reality is there until the supreme knowledge dawns. Iswara also exists so long as the world is there. The relation between Brahman and the material world is like

dream and awakening. A dream is true as long as it lasts. The moment one is awake, the dream and what is seen in it vanishes.

Sankara's philosophy of absolute monism was so abstract, idealistic and profound that it was beyond the reach of common man. His emphasis on attaining salvation by means of knowledge could be grasped only by the learned. Though Advaitavedanta does not philosophically advocate worship of individual god, its principles nevertheless were conceived by people as having an undercurrent of oneness and a sense of equality that govern all human beings. Such a principle was felt to be attractive to common man. So Sankaravedanta exerted deep influence on intellectuals like Raja Ram Mohan Roy and Vivekananda who were the harbingers of a significant epoch of renascent ideals and activities during the $19^{th}$ century.

Renaissance, in the general sense, is the activity-oriented spirit of awakening in the field of art, literature and learning. In this sense the medieval Bhakti movement(from $13^{th}$ to $17^{th}$ centuries AD) possessed all that is embedded in the concept of renaissance. The slow but steady winds of change and new awareness gained momentum over the years and blew over the Indian sub-continent from Kshmir to Kerala like a storm. This cultural epoch was so powerful that it has been likened to the period of Reformation in European history. Marked by a kind of emotional and passionate devotion, there emerged a new form of worship namely Kirtan. Love songs to gods came to be sung with deep devotional fervor . Thousands of such songs were composed and they almost became scriptures. People began to sing them enmasse to please god. Polytheism was giving way to the concept of one god and his incarnations, especially Rama and Krishna. The ideology imbibed by the medieval devotionalism was from the Hindu scriptures and the concept of Vedantic monism was at the heart of it. The movement brought forward the idea of brotherhood and equality and ushered in a new message against rampant casteism and other social inequalities practised against the marginalized. The medieval devotional movements were led by Ramanuja(died in 1137), Ramananda (1400-1470), Tukaram (1598-1650), Guru Nanak, Surdas (1483-1563), Chaitanya(1485-

1533), Meerabai(1503-1573), Tulsidas (1532-1623) and a host of others. They were the great 'saint-integrators' as Dr. V. Raghavan has put it. . In place of Sankara's Advaitavedanta or absolute Monism, Ramanuja (1060-1118) introduced Visisthadvaita or the doctrine of qualified monism. At the outset the thought and actions of Ramananda also became the central energy of the devotional movements. Ramanuja and Ramananda held that every person had the right to worship the god of his choice and identify with Him. Freedom, justice, equality and security which formed the principles of any kind of renaissance constituted the motivating force of the Bhakti Movement also. The path of devotion mingled with the path of Karma and the path of knowledge became a great tool for transformation and positive social change. Ramananda had a great number of followers including Kabir, the author of the great soul-stirring doha-s. Ramananda admitted disciples of all castes to his fold. He called his disciples avadhuta-s which means persons emancipated from old prejudices. Ramananda's devotioinal cult that spread swiftly among the masses, reached its peak in Tulasidas, the author of *Ramacaritamanas* of the 16$^{th}$ century. Denouncing the complicated forms of Hindu worship and religious orthodoxy, Ramananda's chief stream of influence was the visishtadvita doctrine of absolute self-surrender and reliance up on god's redemptive love and goodness.

Advaitavedanta was given a human touch by Ramanuja's (1017-1137) Visistadvaita, the philosophy of qualified non dualism. . Brahman in the neuter gender was turned into the masculine in Visisthadvaita. According to Ramanuja Brahman is not devoid of qualities. Indeed it is the possessor of of divine merits. The world and individual souls are not illusion. They have intrinsic reality. According to Ramanuja God is not purely an abstract being and this god is none other than Visnu. He is a just god possessing real qualities of goodness and love. Hiriyanna quotes Maxmuller to stress that the doctrine of Visishtadvaita was ' an attempt (F.N.)to give the Hindus their souls back'. The concept of Sagunabrahman, that is, the existence of a just and loving god was a significant deviation from Sankaravedana. Ramanuja took lessons even from a Sudra called Kanchipurna and

admiited to his fold Jains, Buddhistsd and Sudras and even the ones who were considered untouchables. He had a large number of disciples including 700 ascetics, 12000 monks, 300 nuns. Ramanuja is sometimes adjudged more as a leader of Vaisnava cult than a philosophical doctrinaire.

The influence of the study of Rgveda, the Upanisads and the Bhagavatgita along with the vedantic thought , in all its variety and richness, echoed in the Doha-s of Kabir (1440-1518). He said that the ignorant kept discarding the Atman and worship stone. They were under the impact of Maya or illusion. Whether one is a Hindu or Muslim, there is one and only Atman like all earthen pots are made of the same soil. See the influence of the concept of Brahman in the following lines of Kabir:

My soul is not a righteous one
Nor is it unrighteous
I do not speak, nor do I hear
I am not a worshipper
Nor am a lord worshipped
I am not bonded, nor am I one emancipated
I am not detached, nor am I attached
I do not go to hell or heaven
I perform my actions, but I am away from them. [@]

It is also not accidental that the name of the organization founded by Dadu(1554-1603), one of the protagonists of the Bhakti movement, was 'Parabrahmasampradaya'. Madhva (1197-1276) accepted the Bhagavata as a scripture with the same authority of the Veda-s. Renaissance in the 19th century

The positive effect of vedantic thought is evident in the renaissance movement in the 19th century. As noted earlier, the ideals of equality and oneness, the result of the study of Vedic literature and the Vedanta system of philosophy along with the world-view gained from modern education by great men and neo vedantins like Raja Ram Mohan Roy and Vivekananda induced and inspired the movement.

Raja Ram Mohan Roy is often adjudged as the pioneer of modern Indian renaissance. In 1814 he formed the Atmiyasabha in order to initiate social and religious reforms. He learnt the Veda-s, Upanisads and Indian philosophy deeply whose positive influence was evident in all his ventures. The

Atmiyasabha was transformed into Brahmasamaj in 1828. It emerged as a modern Indian movement advocating a monotheistic religion based on Vedantic as well s Upanisadic learning blending it with principles of western thought. His monotheism is not to be understood as the worship of Individual god like Rama or Krsna and euoligising them with rhythmic prayer-songs. It was a kind of Ekatattvavada, the theory of recognizing a single dominant principle which is the underlying factor of everything in the universe. Ram Mohan held that it is natural that human psyche has a tendency to turn towards an eternal and immanent principle. According to him the sacred, formless, unqualified Brahman is the symbol of human unity. What remains luminous in an individual is nothing but Brahman itself. In this sense one is here reminded of the principles of oneness and equality expressed by Kabir, Chaitanya and others. Kabir had kept reiterating that the sentience inherent in every being is the same irrespective of whether he is a Muslim or Hindu. That is why some scholars have held that Ram Mohan's activities formed an extension of the medieval Bhakti movement. His was a rational and at the same time deistic religion mixing immanent monism and transcendent dualism which enabled Ram Mohan to fight against all sort of social bigotry, conservatism and superstitions. Freedom for women and their participation in nation-building constitutes a vital aspect of nation-building and Ram Mohan ventured for the promotion of education for women and widow-marriage and to put up a vehement social movement against polytheism, idolatry, Sati or widow-burning, child marriage, female foeticide, polygamy and casteism.

After the death of Ram Mohan (1833), it was a group of scholars led by Devendranath Tagore (1838-1884) who stood for the cause of Brahmasamaj who further modified and codified its principles and established a kind of religion which can be named Brahmoism. Some of its principles are summarized below:

1. Veda-s, Brahmana-s, and Smrti-s are not infallible and the role of reason is significant
2. The essence of individual endowed with great excellences is what is called god

3. Temples and various modes of worship of god are unnecessary
4. The sources of the knowledge of god are Nature and awareness of Self.
5. No written work is infallible or authoritative.

Thus the principle of Brahman as the primal source and ultimate goal of all beings, has exerted great impact on thinkers who succeeded Ram Mohan Roy. The Prarthanasamaj, established by Mahadeva Govinda Ranade in Maharashtra in 1870 had many parallels with that of Brahmasamaj. Ranade was also against idolatry and held that there are no incarnations to god . All humans are equal since they are the children of a single god and no written work however holy or great can claim infallibility and authority. Vedanta in Sreenarayanaguru also meant not taking resort to the impersonal Supreme Being called Brahman, but to have an awareness of equality of all humans and a will to make positive change in their life. Even his dictum of ‘one caste, one religion, one god’ emerged out of Vedanta, or perhaps the way how he utilised and interpreted Sankara’s Advaita Vedanta pragmatically as a tool for social change.

**Vivekananda**

The role of Vedanta in the thought and actions of Vivekananda, another luminary of the $19^{th}$ century renaissance is also too conspicuous to be underestimated. He always introduced himself as a vedantin. According to him freedom is the primary requirement for growth. Growth and development in the spiritual life of any country will be impossible without social and economic uplift. The universe is not the creation of any individual god. The universe itself is god. It is not the result of any superhuman or divine intervention. The universe creates itself and wanes on its own. It is self-luminous. The essence of universe is one and immeasurable and this phenomenon is nothing other than Brahman. It is the only thing that exists. Brahman only is real. It is saccidanandasvarupa, that is, of the nature of pure reality, pure consciousness and pure bliss.

The influence exerted on Vivekananda by the vedantaic maxims like soham ( I am that), tattvamasi ( that thou

